श्रीः

।। सप्तशोऽध्यायः।।

## १.० अवतरणिका

अये छात्राः।

पूर्वस्मिन् पाठे भवन्तः प्रश्नमार्गस्य पूर्वोर्धे षोडशाऽध्याये प्रतिपादितानां प्रच्छकप्रदेशलक्षण-प्रच्छकद्रव्य-भूतभविष्यद् सम्पद्चिन्ता-सामादि उपायलक्षण-गुप्तधनलक्षण-प्रश्नकाले नरनार्यागमन-यात्रशकुनविवाहप्रश्नलक्षणादीनाञ्च विषये प्रायः समीचीनतया अधीवन्तः स्युः। साम्प्रतं प्रश्नमार्गस्य सप्तदशाऽध्यायमधिकृत्य विचारयिष्यामः।

आयुनिरूपणानन्तरं विवाहप्रश्नस्य विचारः विधेयः। मानवस्य जीवने घटनात्रयं प्रामुख्यं भजते। तानि जन्मविवाहमणरणञ्चेति। तेषु जननमरणे कस्यापि स्वाधीने न स्तः। अस्माकं जन्म कस्मिन् परिसरे, कीदृशी देशे, कस्मिन् समये वा सम्भवतीति निर्देष्टुं न शक्यते। एवमेव मरणमपि आदेष्टुं न शक्यते। परन्तु विवाहः तावत् अस्माकं मनोवृत्तानुसारेण प्रज्ञावस्थायां पुरतः एव क्रियते। तथाऽपि स विवाहः यदि गभीरतया विमर्शयामः अस्माकं स्वाधीने नास्ति एव। अपि तु अस्ति 'दैवाधीनम्'। गृहे प्राप्यमाणो आनन्दः सर्वेषामानन्दानाम् उपेक्षया महत्वपूर्णमस्ति। यद्ययं आनन्दो न लभ्यते तस्मिन् पक्षे जीवितम् अद्देश्यरविरहितं स्यात्।

विवाहस्य विषमपरिस्थितिवशेन पतिपत्न्योर्वैशम्यात् दाम्पत्यजीवने सुखस्य लेशमपि अप्राप्य केचन सन्यासग्रहणं कुर्वन्ति। इयमेका पलायनमनोवृत्तिः। केचन इतरे जनाः संसारम् अर्धे परित्यज्य विरक्ताः भवन्ति। अपरे च केचन विवाहेन सम्भाव्यमाणं विषमपरिणामं विलोक्य विवाहकरणात् दूरे एव तिष्ठन्ति। तथाऽपि इन्द्रियनिग्रहविहीनाः सन् समाजे नीतिरहिताश्च भवन्ति।

अतो अस्माकं पूर्वजा एतत्सर्वं सुविचार्य विवाहार्थं केचन नियमान् चक्रुः। एतेषां नियमानां पालनेन न केवलं विवाहाः सफलं भवन्ति किन्तु तेन प्रत्येकस्य जनस्य सुखं

शान्तिं च सञ्जायते।

पूर्वस्मिन् काले यदा वधूवरौ बाल्यावस्थायां आस्तां तदानीमेव मातापितृभिः विवाहं क्रियते स्म। ते च पूर्वं 'अष्टवर्षा भवेत् कन्या' इत्यस्य वचनस्य पालनं चक्रुः। परन्तु इदानीं वधूवरौ प्रबुद्धो यदा भवतः तदानीमेव विवाहो विधीयते। वरः कन्यायाः कुल-शील-रूप-विद्या-वित्तञ्च सम्यक् परीक्ष्य तां वृणोति। एवमेव कन्याऽपि स्वीयावश्यकवरेण विवाहं कर्तुं यथेच्छं स्वातन्त्र्यं प्राप्तवती अस्ति। इयमेका रीतिः पाश्चात्यसंस्कृतेः प्रभावः इत्यपि वक्तुं शक्यते।

यद्यपि वधूवरयोः जीवने प्राधान्येन विचार्यमाणाः चत्वारो विषयाः सन्ति। ते च विवाह-वैवाहिकजीवन-सन्तति-अपत्यसुखञ्चेति। पूर्वोक्तानां एतेषां सर्वेषां विषयाणां कृते हेतुभूतमस्ति विवाहः।

स विवाहः तावत् हृदयद्वयस्य मेलनम्। द्वयोः वस्तुनोः मेलनापेक्षया इदं भिन्नमस्ति। अतः तादृश विवाहस्य सम्भवः कदा इत्यस्य निर्णयविधिः सप्तदशाऽध्याये निरूप्यते।

**उद्देश्यानि**

* **विवाहप्रश्नविचारः**
* **प्रश्नलग्नात् वधूवरयोर्लक्षणान्वेषणप्रकारः**
* **वधूवरयो पित्रमात्रचिन्तनक्रमः**
* **विवाहविघ्नचिन्ता**
* **अङ्गस्पर्शलक्षणम्**
* **दम्पत्योः मरणयोगः**
* **यामशुक्रफलचिन्ताविधिः**
* **विवाहविघ्नकारकलक्षणानि**
* **शीघ्रविवाहयोगः**
* **विवाहात्परभाग्ययोगः**
* **सुन्दरीस्त्रीप्राप्तेर्लक्षणम्**

* **प्रकारान्तरेण दम्पत्योर्मरणयोग:**
* **पुत्रहन्त्रीयोगविचार:**
* **दम्पत्यो: प्रीति:**
* **चन्द्रवेलाभिलाषी-राश्यादिस्फुटक्रम:**
* **जामातु: दिग्विचारविधि:**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषया: ज्ञायन्ते।

## १.१ विवाहप्रश्नविचार:

पूर्वं प्रश्नमार्णस्य पूर्वार्घे आयुर्निरूपणं कृतम्। अत: परं विवाहप्रश्नविचार: वर्ण्यते। प्रश्नसंग्रहशास्त्रै विवाहस्य समय: कदा सम्भवेति प्रोच्यते। तदेव अत्र विचारयिष्यते-

दैवज्ञ: सर्वत: प्रथमं कन्याया: पुरुषस्य च आयुश्चिन्तनं कृत्वा तत: परं सन्तानभाग्यादि चिन्तनं कुर्यात्। विवाहविषयकं सकलं शुभाशुभफलं जातकवशात्, विवाहप्रश्नलग्नवशादपि अवलोकयेत्। दम्पत्यो: जनिष्यमाण-सन्तानेन पित्रणां गण: नितरां तृप्यति। अत: जातकेन प्रश्नेन च विवाहार्थं निखिलं विषयं सुविचार्य पाणिग्रहणं कुर्यात्।

अथ अत्र विवाह-प्रश्नस्य औचित्यं प्राहु: बृहस्पत्याचार्या: - विवाहस्य विषये प्रश्नम् अवश्यं कार्यमित्याहु:। माधवीयाख्ये ग्रन्थे माधावाचार्यैरपि प्रश्नं विवाहस्य विषये सुतरां कार्यमित्युच्यते। यदि जातके विवाहयोगस्य विचारं सम्यग् विधीयते चेदपि विवाहमधिकृत्य अवश्यमेव प्रश्न: कर्तव्य इत्यभिप्राय:।

एवं विवाहप्रश्नस्य आवश्यकताया: प्रतिपादनानन्तरप्रश्नकरणविधिं प्रवक्ष्यति-

शुभदिवसे ग्रहपूजार्थं मणिकनककुसुमान्यहृत्य ज्यौतिषिकमुपेत्य भक्तित: तं सम्पूज्य आदौ यथा बलं दक्षिणां प्रदास्य वधूवरयो: नामनक्षत्रञ्च उक्त्वा सकृदेव विनयेन तस्य समीपे सम्प्रच्छेत्। अत्र 'सकृत' शब्दप्रयोगेन एकवारमेव विवाहप्रश्न: कार्येति।

अत्र प्रश्नलग्नवशात् भावीकरग्रहस्य शुभाशुभफलं प्रविचिन्तनीयम् अस्ति। अत:

सुमुहूर्ते अथवा सुसमये विवाहविषयकं प्रश्नं पृच्छेत्। यतः विवाहप्रश्नलग्नवशादेव वधूवरयोः भविष्यतच्चिन्तनं स्यात् खलु। **''प्रश्नलग्नात् सप्तमे तु शुभदाः भवन्ति शुभग्रहाः।''** एतेन अस्माभिः भाव्यं यत् प्रश्नकालस्य शुभाशुभनिमित्तानि यानि विलोक्यन्ते तान्येव विवाहकालस्य मूहूर्तस्याऽपि शुभाशुभफलत्वेन संसूचकानि सम्भवन्तीती।

एषः वरः वधोरस्माकं कीदृग् भवेदिति जिज्ञासा रूपस्य प्रश्नस्य प्रकार अयम् अस्ति। एका अनोढा कन्यका इयम् अयं वरं वृणोति चेत् भतृपुत्रभाग्यादिसंयुता भविता किम् वा न वेति ईदृशः विवाहप्रश्नः कार्यः।

## १.२ प्रश्नलग्नात् वधुवरयोर्लक्षणान्वेषणप्रकारः

विवाहविषयकप्रश्ने वधूवरयोः नामनक्षत्रम् उक्त्वा प्रश्नो विधीयते। प्रश्नेऽस्मिन् वधुरेव प्रधाना। प्रश्नलग्नमेव वधुः। प्रश्नलग्नात् सप्तमभावः पतिं सूचयति। सप्तमभावेन वरस्य चिन्तनं, लग्नभावेन च वधोः लक्षणं वाच्यमिति बृहस्पत्याचार्याः निगदन्ति।

वधूवरस्यलक्षणवर्णनप्रसङ्गे भावफलचिन्तनं कार्यम्। तद्यथा-

सप्तमभावेन भर्त्तुः स्वभाव-रूप-गुणादयश्च ज्ञेयाः। सप्तमभावात्- द्वितीयभावेन तस्य धनचिन्ता वक्तव्या। सप्तमभावात् तृतीयभावेन वरस्य सहजान् परिचिन्तयेत्। एवमेव सप्तमभावात् अष्टमभावेन भर्तुरायुश्चिन्तां कुर्यात्। एवं रीत्या सप्तमभावात् 12 स्थानानि विचार्य वरस्य सर्वं विषयं ब्रूयात्। किञ्च अस्माभिः विवाहप्रश्नस्य आरूढलग्नात् कन्याया अपि रूपं गुणं च, द्वितीयभावेन धनं, चतुर्थभावेन गृहस्य परिसरं, अष्टमभावात् आयुष्यं नवमेन भाग्यम् इत्थं द्वादशभावैः तत्तद्भावसम्बन्धिविषयाः चिन्त्याः भवन्ति। अत्र फलचिन्तनस्य प्रकारः पराशरवचनानुसारेण यथा प्रोक्तं तथैव ज्ञेयः।

तद्यथा-

**''यद् भावाद् यत् फलं चिन्त्यं तदीशात्तत्फलं विदुः।**
**ज्ञेयं तस्य फलं तद्धि तत्र चिन्त्यं शुभाशुभम्''॥ इति**

## १.३ वधूवरयोः पित्रमात्रचिन्तनविधिः

सूर्यः स्वनीचराशिगो शत्रुक्षेत्रगतो वा भवेत्, स सूर्यः प्रश्नकालिकं तात्कालिकलग्नं आरूढलग्नं वा यदि न विलोकयति चेत्तदा, कन्यायाः पिता नास्तीति वदेत्। एवमेवरीत्या चन्द्रात् मातुः स्थितिमपि विचिन्त्य ब्रूयात्। चन्द्रः शत्रुक्षेत्रगतो स्वनीच राशौ वा स्थितो भवेत् चन्द्रः लग्नं च यदि न पश्यति सत्येवं कन्यायाः कृते माता नास्तीति कथयेत्। अत्र सूर्यस्य दृष्टिः लग्नस्योपरि नास्तिचेदपि यदि बली सूर्य इष्टभावे स्थितश्चेत् पिता अस्तिचेदपि तेन कन्यायाः कृते किमपि प्रयोजनं नास्तीति विमृश्य प्रवदेत्। नीचराशौ शत्रुक्षेत्रे वा स्थितः सूर्यः कदाचित् लग्नं पश्यति चेदपि कन्यायाः पिता जीवितो नास्तीति वदेदिति केचन शास्त्रकाराः जगुः।

यथा कन्यायाः पित्रमात्रचिन्तनं क्रियते तथैव इतरेषां मातुलादिकारकग्रहैवशात् सर्वस्वं विज्ञातव्यम्।

यथा पूर्वं तात्कालिकलग्नं आरूढलग्नं वा सूर्यो अपश्यति चेत् पिता नास्ताति प्रवदेत् इत्यवोचन् तथैव आरूढलग्नात् तात्कालिकलग्नात् वा सप्तमभावं सूर्यः यदि न पश्यति स सूर्यः शत्रुक्षेत्रे, स्वनीचराशौ वा तिष्ठेत्तर्हि वरस्य पिता नास्तीति ब्रूयात्। एवं चन्द्रेण वरस्य माता नास्तीति वाच्यमित्याभिप्रायः।

पूर्वं प्रश्नमार्गस्य पूर्वार्धे ''दैवज्ञेन समाहितेन समये'' इत्यस्मिन् श्लोके प्रोक्ताः प्रश्नसमय-प्रश्नप्रदेश-स्वाश्वासगति-अवस्था-प्रच्छकव्यापार-पृष्टुस्पर्शन-प्रश्नाक्षर-पृच्छकचेष्टा-तत्कालिक शब्दादयश्च किञ्च आयुः प्रश्नविभागे कथितान् अनेकप्रकारकशकुनफलान् सर्वान् विवाहप्रश्नकालेऽपि योज्यम्। यदि प्रश्नकाले पूर्वोक्तानि शकुनानि लक्षणानि च शुभानि दृष्टानि स्युः तदानीं दाम्पत्यसुख-सन्तानलाभ-भाग्यवृद्धि-विवाहसिघ्यादीनिच फलानि शुभानि वाच्यानि। पूर्वोक्तानि यद्यशुभानि दृष्टानि प्रश्ने तर्हि तद्विवाहेन सुखं शुभत्वं वा नास्तीति पृच्छते ब्रूयात्।

पूर्वं यत्र क्वावि प्रश्नमार्गस्य पूर्वार्धो विवाहसम्बन्धिाप्रश्ने उपयोगित्वेन यद्यत् शकुनं वर्णितं किञ्च **''नववस्त्रद्वयादीनां दर्शनं करसंग्रहे''** इति विशिष्य पाणिग्रहण शुभसूचक शकुनान्यपि सर्वं धीमता दैवज्ञेन चिन्तनीयम् अत्रापि।

## १.४ विवाहविघ्नचिन्ताक्रमः अङ्कस्पर्शनलक्षणञ्च

वराहमिहिराचार्याः स्वहोराशास्त्रस्य चतुर्थाध्याये प्रथमश्लोके ''कुजेन्दुहेतुप्रतिमासमार्तवम्'' इत्यत्र पूर्वार्धेन मानुषजन्महेतुभूतं कन्यायाः ऋतुकालस्य कारणं सूचयामासुः। तत्रैव श्लोके **''उत्तरार्धे अतोऽन्यथास्थेशुभपुंग्रहेक्षिते नरेण संयोगमुपैति कामिनी''** इति गर्भाधानक्षमं कालं च प्रोचुः। अतः अत्र ऋतुमुतिर्भूत्वा विवाहस्य अवरोधास्थितिं श्लोकस्य पूर्वार्धेन निरूपणीया। **''नरेण संयोगमुपैति कामिनी''** इत्यस्य उत्तरार्धास्य अन्तिमपादेन वधुः वरेण सह संयोगम् उपैति इत्युक्त्या विवाहप्रश्नेऽपि विवाहसिद्धिर्भविष्यतीति विचारं विमर्श्य प्रच्छते ब्रूयात्। तद्यथा- विवाहप्रश्नस्य आरूढलग्नात् अथवा तत्कालोदयलग्नात् 3-6-10-11 भावेषु (उपचयस्थानेषु) कुजेन दृष्टः चन्द्रः स्यात्तदा आर्तवस्य कारणेन कन्यायाः विवाहे विघ्नं सम्भवतीति समादिशेत्। 2-4-5-7-9-12 एषु भावेषु गुरूणा दृष्टः चन्द्र वर्तमानश्चेत्तदा विना विघ्नेन विवाहं प्रचलतीति भावः।

पुनः प्रकारान्तरेण विवाहे विघ्नचिन्तनक्रमं वर्णयति। तद्यथा- विवाहार्थं विहितं प्रश्नं बहुलपक्षे स्याद्, किञ्च चन्द्रः प्रश्नारूढलग्नात् 2-4-6-8-10-12 एषु युग्मराशिषु अन्यतमराशौ भवेत् अथवा पापदृष्टः चन्द्रः अष्टमभावे स्थितो भवेत्' एतादृशलक्षणं यदि विलोकितो भवति सम्बन्धं नैवमाप्नुयात्। इदमस्ति बृहस्पतेर्मतम्।

प्रश्नकाले अङ्गस्पर्शनवशादपि लक्षणानि चिन्तनीयानि।

1. वामहस्तेन दक्षिण हस्तस्पर्शम्
2. वक्षस्थलस्पर्शः
3. मस्तकस्पर्शः

पाणिग्रहणसिद्धिकृद्शकुनानि उपर्युक्तानि त्रीणि सन्ति।

स्पर्शवशात् विलम्बेन विवाहकृद्स्थाने जानुः अंघ्रिद्वयं च भवतः।

वामहस्तेन पृष्टभागकटिप्रदेशयोस्पर्शवशात् विवाहे विघ्नम् वक्तव्यम्। प्रश्नारूढे यदि -

1. लग्नाधिपतिः सप्तमाधिपतिश्च योगं कुरुतः।

2. लग्नाधिपति: शुक्रश्च परस्परं योगं कुरूत:।

3. लग्नाधिपतिसप्तमाधिपत्यो: मिथ: दृष्टिसम्बन्धेन, तयो: लग्नेशसप्तमेशयो: उच्चराशौ स्थितिवशेन, तयोर्बन्धुक्षेत्रस्थितिवशात्, पूर्वोक्तयो: तयो: परस्परपरिवर्तनयोगवशाच्च विवाहसिद्धिं वदेत्।

## १.५ प्रकारान्तरेण विवाहे विघ्नं जारिणीलक्षणञ्च

विवाहप्रश्नरूढलग्नात् पापा: अष्टमभावे नीच-शत्रुवेश्मनि स्थिता: भवेयु: तदा केनाऽपि वा हेतुना विवाहे विघ्नानि सम्भवन्ति। लग्नात् षष्टगता: पापा: पापैरवलोकिता: सन् नीचारिराशौ स्थिता: स्यु: तदा वधो: वा वरस्य वा रोगेण निश्चयीकृतस्य विवाहस्य भंगो भवति। यद्वा तयो: बान्धवानां दुष्कृतिवशात् विवाहो अवरूद्धो भवति। प्रचलितष्यमाणप्रश्नस्य स्थलसमीपे पक्षिमृगसर्पादीनाञ्च सुरतक्रीडा परिदृश्यमाणे सति तत्सम्बन्धी वधो: व्यभिचारत्वं वाच्यम्।

## १.६ दम्पत्योर्मरणलक्षणं यामशुक्रफलञ्च

विवाहप्रश्ने लग्नात् चन्द्र: पापाढ्य: षष्ठ-भावगो वा अष्टमभावगो वा भावति विवाहात् अष्टमे वर्षे दम्पत्यो: मृत्युकृद् स्यात्। तच्चन्द्रात् अष्टमस्थाने अथवा षष्टस्थाने कुज: स्थितश्चेत् वर्षाभ्यान्तरे अपत्यजननात्पूर्वमेव पुरूषस्य मृति: सञ्जायते। लग्ने सप्तमे वा शशिमंगलयोग: स्यात्तदा पत्यु: मरणं सप्तमासाम्यन्तरे एव। विवाहप्रश्नारूढलग्नात् यामशुक्रो वा यामशुक्रात् कर्मेश्वरो वा 6-8-12 भावे वर्तमानश्चेत् विवाहे विघ्नं चिन्त्यं भवति। इह यामशुक्रात् षष्टाष्टमद्वादशे शुक्र स्थितश्चेत् विवाह: समये खलु नैव सिध्यति। यामशुक्रप्रश्नकालिकशुक्रलग्नाधिपस्य च एतेषां त्रयाणां स्फुटराशिअंशकलानाञ्च योगं कार्यम्। योगवशात् य: राशि: प्राप्तो भवति तस्मिन् राशौ राहुकेतुमान्दिषु य: कोऽपि स्यात् अथवा तेषां त्रयाणां मध्ये कस्यापि दृष्टि: योगराशेरूपरि स्यात्तदा विवाहानन्तरं दम्पत्यो: सुखं नास्तीति वक्तव्यम्। अत्र पूर्वप्रतिपादितयामशुक्रो नाम मान्दिवत् एको उपग्रह:।

सूर्यादिवासरेषु यामशक्रस्य उदय एवं गदित:। तद्यथा-

| वासरा: | दिवायामशुक्रोदयकालघटिका: |
|---|---|
| रविवासर: | 22 घटिका: |
| सोमवासर: | 18 घटिका: |
| कुजवासर: | 14 घटिका: |
| बुधवासर: | 10 घटिका: |
| गुरूवासर: | 06 घटिका: |
| शुक्रवासर: | 02 घटिका: |
| शनिवासर: | 26 घटिका: |

सूर्योदयस्य समयं ज्ञात्वा मान्दिस्फुटवत् अस्यापि स्फुटं कार्यम्। अत्र दिनमानं सामान्यत: त्रिंशद् घटिका इति भाव्य पूर्वोक्ता: यामशुक्रस्य उदयघटिका: सामान्यत: वर्णिता: सन्ति। दिनमानस्य न्युनाधिक्ये सति त्रैराशिकवशात् ह्रासवृद्धिश्च कर्तव्यम्। इदं यामशुक्रस्फुटम् उद्वाहप्रश्नस्य कृते अत्यावश्यकम् अस्ति।

उद्वाहप्रश्नस्थाने परिदृश्यमाणनिमित्तानुगुण्येन पुनर्विवाहयोगं वाच्यम्।

1. एक: पुरुष: स्त्रीभ्यां युक्त: यद्यागच्छति चेत्तदा,
2. परिणतनृयुग्मौ तत्र आगमिष्यतश्चेत्,
3. गौवृषभौ प्रश्नस्य प्रदेशे परिदृश्यमाणौ भवतश्चेत्,
4. प्रश्नस्य चक्रलेखनं द्वाभ्यां यदिकृतमस्तिचेत्,
5. दैववशात् पुनर्विवाहस्य वार्ता केनापि तत्र सम्भाष्यमाणं श्रूयते चेत्,
6. उपयमकीर्तनपरकशब्दानां दैवज्ञेन तत्र श्रवणाच्च,

एभि: लक्षणै: पुनरूपयमस्य योगमस्तीति वाच्यम्।

## १.७ विवाहविघ्नलक्षणं शीघ्रविवाहयोगज्ञानञ्च

अथ पुनः पुष्पोद्गमाद्यै उपयमविरोधीनि लक्षणानि कभ्यन्ते। तद्यथा–

1. प्रश्नप्रदेशे वासन्तीतररक्तपुष्पाणाम् अवलोकनम् (वासन्तीपुष्पं यद्यपि रक्तपुष्पविशेषश्चेदपि इदं पुष्पं दोषकरं नास्तीति भावः)
2. शरीरे कण्डूयनदर्शनम्
3. रक्तेक्षणम्

एतेषां दर्शनेन विवाहसमये एव अकस्मात् रजोनिर्गमनस्य कारणेन उपयमे विघ्नमायातीति वक्तव्यम्।

किञ्च, महिषगजयोः आरवश्रवणात् वृक्षात् रक्तपुष्पस्य पतानावलोकनेन, प्रश्नकुण्डल्याः मध्ये रचिताम्बोजे पणकस्य न्यासवशेन, विश्लेषः करयोः द्वयोर्दर्शनेन, मृतशवावलोनकानात्–मृतिप्रेक्षणवशात्, परस्परं कलहायमाणशब्दश्रवणच्च, एतादृशपूर्वप्रतिपादित अनिष्टलक्षणेषु एको वा लक्षणद्वयो वा यदि विलोक्यते चेत् कारणान्तरेण विवाहे विघ्नमायाति। लक्षणान्येतानि निश्चयेन विवाहकवघ्नकारकत्वेन वाच्यानि।

इतः परं शीघ्र उपयमसिद्धिकृद्लक्षणानि प्रोच्यन्ते। तत्तल्लक्षणदर्शनेन तु निश्चयात् तत्तत्फलं कथयेत्। तद्यथा–

प्रश्नस्य स्थले वस्त्रविक्रयकृद् यदि कोऽपि आगच्छति, नवीनवस्त्रं दार्य प्रक्षालितवस्त्रं हस्ते गृहीत्वा गमिष्यमाणोऽस्ति चेत्, जन्तोर्वामिथुनेक्षणंच एषु एकं लक्षणं अथवा लक्षणद्वयम् तत्र अवलोक्यते तदा शीघ्रम् उद्वाहसिद्धिर्भवतीति प्रवदेत्।

अत्र केचन नवीनवस्त्रधारणं कुर्वन् प्रक्षालितवस्त्रं गृहीत्वा प्रश्नस्थले आप्तजनस्यागमनमिति अर्थमपि स्वीकुर्वन्ति। प्रश्नस्य परिसरे केनाऽपि भूमेः खननं, क्रियतेन चेत्, वृक्षस्य कर्तने प्रयुज्यमानस्य क्रकचस्य शब्दश्रवणेन च विवाहप्रश्नविषयककन्या दुष्टेति वेद्यम्।

प्रश्नस्य समये तत्र वर्तमानस्य कस्यचिद् पुरुषस्य योषिदस्याऽपि वा वासोविश्लेशनशब्दः यदि श्रूयते अथवा विलोक्यते चेदपि प्रश्नविषयककन्यका दुष्टैव स्यात्।

अथ पुनः शीघ्रविवाहसिद्धिप्रदयोगाः विवर्ण्यन्ते। तद्यथा–

प्रश्नकाले पुच्छसहितं कुण्डीमपि विहाय, इतरलोहमयपात्रं विक्रेतुं समुपानयेत्तदा, मुकुरालोकदर्शनं, तुम्बपुष्पेक्षणं, रजतेन निर्मितपदार्थानां दर्शनं, दृगामर्शनं, सद्य अभ्यंगस्नातः पुरुषः कश्चित् उपवीतं धार्य यदि आगच्छति तत्र, एतेषु लक्षणेषु यत्किमपि लक्षणमेकं परिदृश्यते तर्हि शीघ्रम् उद्वाहो भवतीति वाच्यम्।

पुनः प्रकारान्तरेण अतिशीघ्रविवाहसिद्धिप्रदयोगाः कथ्यन्ते। तद्यथा- विवाहप्रश्नसये द्रव्ययोर्द्वन्द्वस्थितिः वस्तुद्वयोर्बन्धनं, अकस्मात् दम्पत्योरागमनं, ऊर्णसूत्र निबद्धपाणिपादयोरवेक्षणं, कलभ द्रव्येक्षणं, गयकानाम् आगमनञ्च एतानि लक्षणानि परिदृष्टानि स्युः तानि शीघ्रम् उद्वाहकृद्घोतकाः सन्ति। तेषु लक्षणेषु यद्येकोऽपि लक्षणं दृष्टश्चेत् तदानीं शीघ्रं विवाहसिद्धिं वाच्यम्। अत्र कलभो नाम गन्धााभिषेकः। कस्यापि पूर्वसंकल्पित-कर्मणः सिद्धेरनन्तरं देवाय श्रीगन्धाभिषेकं क्रियमाणपद्धितिः केरलदेशे विलोक्यते। अतः अत्र कलभस्य वस्तूनि नाम श्रीगन्धः, चन्दनकाष्टम्, गन्धस्य शिला इत्यादयः।

## १.८ विवाहात्परभाग्ययोगः सुन्दरी स्त्रीप्राप्तियोगलक्षणञ्च

उद्वाहलग्नात् 3-6-10-11 एषु स्थानेषु शुक्रसप्तमेशौ स्थितौ भवतः तर्हि दम्पत्योः कृते विवाहात्परं सौभाग्यवृद्धयादयो सम्भवन्ति। एवमेवरीत्या पुत्रकारकः पुत्रभावेशश्च उभौ लग्नात् उपचयस्थानेषु वर्तमानौ स्तः तर्हि पुत्रोत्पत्तेरनन्तरं समृद्धिः जायते इति बोद्धव्यः। अत्र प्रश्नरत्नकाराणां मतेन किञ्चिद् वैशिष्ट्यमुच्यते विवाहविषये। तद्यथा- युग्मराशौ युग्मराशेर्नवांशे चन्द्रशुक्रौ वीर्यान्वितौ यदि स्तः तौ च लग्नं वीक्षमाणौ भवतः तर्हि या विवाहार्थम् उपलभ्यमाणा कन्या सा दृष्टपूर्वा एव अथवा प्रश्ने या कन्या पूर्वं निश्चयीकृता आसीत् सा एव लभ्या भवति।

तत्र स्त्रीद्रेष्काणकं प्रश्नलग्नं भवेत्, युग्मराशेर्नवांशे च स्यात् चन्द्रशुक्रौ यदि लग्नं पश्यतः शीघ्रं विवाहं भवेदिति ज्ञेयम्।

सुन्दरी स्त्री प्राप्तियोगो यथा-

विवाहप्रश्नलग्नात् केन्द्रत्रिकोणे (1-4-7-10-5-9) शुभग्रहाः स्युः, सप्तमभावः शुभग्रहस्य क्षेत्रं भवेत्, तद्भावोपरि शुभानां दृष्टिः स्यात्तदा सुन्दरी कन्यया सह उद्वाहो

भवतीति ज्ञेयः। सप्तमभावः पापानां क्षेत्रो भूय पापग्रहाणां दृष्टिः तत्र यदि स्यात्तदा कुरूपिं कन्याम् असौ पृच्छकः लभतेति प्रवदेत्।

पुनरपि शिघ्रविवाहयोग उच्यते। तद्यथा-

प्रश्नारूढलग्नात् अथवा तत्कालोदयलग्नाद् 3-6-7-10-11 एषु भावेषु चन्द्रः शुभदृष्ट्या स्थितो भवेत् अथवा लग्नं मिथुनकन्यातुलाकुम्भेषु एकतमं भवेत्, शुक्रचन्द्रौ तत्रैव लग्ने सप्तमे वा स्यातां, बुधागुरूशुक्राः केन्द्रे अथवा सप्तमे विशिष्य स्थिताः भवेयुः अमी योगाः निगदिताः क्षिप्रं विवाहप्रदाः।

तत्रैव पुनरप्योगान्तरं वक्ष्यति। विवाहप्रश्नारूढात् 1-7-8-5-9 भावेषु तत्तद्भावाधिपाः वर्तमानाः स्युः। शुभग्रहाणां योगः दृष्टिश्च तत्तद् भावेषु स्यात्, तत्तद्भावाधिपविरहितानां पापग्रहणां योगः दृष्टिञ्च यदि न स्यात्तदा विवाहानन्तरं दम्पत्योः शुभवृद्धिः भवति। एतद्वैपरीत्येन पूर्वोक्तपञ्चभावानां कृते शुभानां दृष्टिः योगश्च न स्यात् भावाधिपत्यरहितः पापग्रहः तत्र यदि स्यात् तस्मिन् योगे मतिमान् दैवज्ञेन पाणिग्रहणं कारयितुम् अनुमतिः न दातव्यः। तादृशयोगे दृष्टे सति विवाहो न कर्तव्यमित्यभिप्रायः। तत्र लग्नचन्द्रौ शुभनवांशकगतौ शुभदौ स्याताम्। पापनवांशकगतौ मृत्युदौ भवतः।

## १.९ दम्पत्योर्मरणयोगः, पुत्रहन्त्रीयोगः दम्पत्योः प्रीतिश्च

पापग्रहैर्युतं विवाहप्रश्नलग्नं भवेत्। ते पापाः स्वनीच-क्षेत्रे-शत्रुक्षेत्राद्यनिष्टस्थानेषु स्थिताः स्युः। अष्टमसप्तमभावे च पापाः नीचशत्रुक्षेत्रगताः भवेयुः, एवं विधस्य योगवशात् दम्पत्योर्मत्युफलं वाच्यम्।

प्रश्नकालिकलग्नाद् पञ्चमभावे नीचराशौ शत्रुग्रहेण दृष्टः पापग्रहः वर्तते चेत्तदा सा नारी व्यभिचारिणी भवति अथवा मृतपुत्रा वा भवेत्।

पापग्रहाः पञ्चमे स्युः विलग्नात्, तत्स्थानं तेषां पापग्रहाणां नीचराशिः शत्रुराशिर्वा यदि भवेत्तर्हि सा नारी भवेत् स्ययं पुत्रहन्त्री।

सप्तमाधिपः वीर्यान्वितश्चेत् उद्वाहानन्तरं शोभनधनोपेता भवति नारी। सप्तमभावेशः नीचक्षेत्रगः शत्रुगेहगो वा तिष्ठति दारिद्रयेन स्त्री धानविरहिता रूपगुणहीना च भवति।

स्त्रीग्रहौ चन्द्रशुक्रौ मित्रक्षेत्रे स्थित्वा ओजराशेर्लग्नं यदि पश्यतः तर्हि स्त्री पुरूषं स्नेहेन अभिप्रैति। एतद् वैपरीत्येन लग्नं युग्मराशेर्भवेत्, पुरूषग्रहेषु रविकुजगुरूषु यद्येकोऽपि ग्रहः मित्रक्षेत्रे स्थित्वा लग्नं विलोकयति चेत् पुरूषस्य कृते स्त्रीया उपरि महान् अनुरागो विद्यते इति विचिन्तयेत्।

वराहमिहिराचार्यैः स्वहोराशास्त्रे स्त्रीजातकाध्याये अशेषतः प्रतिपादितं त्रिशांशकादीनां फलादिकं सर्वम् अत्र प्रश्नकाले समीचीनतया योजनीयम्।

विवाहप्रश्नकाले काचित् तस्मिन् स्थाने कन्या आगत्य सम्भाषयति, कन्या एका तत्र निरीक्ष्यमाणा दृश्यते, यदि स्थास्यते कन्या तत्रैव, अथवा कन्यायाः विषयं यः कोऽपि तत्र भाषमाणो वर्तते, तदृशी आकार-वर्ण-गुण-स्वभावाद्युता कन्या विवाहार्थं मिलतीति वदेत्। उदयलग्नप आरूढलग्नपयोर्मध्ये बलाबलवशात् बलीग्रहस्यराशेर्दिशः कन्या विवाहार्थं लभ्या इति कथयेत्। आरूढराशेः लग्नराशेश्च दिग्-गुण-स्वभावयुतां कन्यावरणवशात् सन्तानस्य संसिद्धिर्भवति।

विवाहस्य संसिद्धिः कदा भवतीति ज्ञानाय- प्रश्नकालिकचन्द्रस्य द्वादशांशराशौ वा आरूढलग्नाद् सप्तमभावस्य अधिपतेः नवांशराशौ चन्द्रः यदा आयाति तदा विवाहस्य संसिद्धिः जायते।

## १.१० चन्द्रवेलाभिलाषी राश्यादिस्फुटक्रमः जामातुः दिग्विचारविधिश्च

प्रश्नकालिकचन्द्रस्फुटं कलात्मकं कृत्वा 800 संख्याभिः विभाजयेत्। भक्ते सति आगतं शेषं स्थानद्वये स्थाप्य एकं शेषं त्रयेण संगुणयेत्। 200 तः भाजनेन राशेः संख्या लभ्यते। शेषं त्रिंशद्भिः सगुण्य पुनः शतद्वयेन भाजयेत्तदा लब्धिरंशो भवति। शेषं षष्ट्या सगुण्य शतद्वयेन भाजनवशाद् भवति लब्धिः कला। इत्थं राशि अंश-कलात्मकेन आगतं परिमाणम् अभिलाषी चन्द्रस्फुटं भवति। पूर्वं स्थानद्वये स्थापितेन अपरं शेषं नवभिः सगुण्य शातद्वयेन आप्तश्चेत् लब्धिर्भवति राशिः। शेषं त्रिंशता सगुण्य शतद्वयेन भाजयेत्तदा या लब्धिः लभ्यते स अंशः। शेषं षष्ट्या सगुण्य 200 तः पुनर्विभाजयेत्तदा या लब्धिः सा

कला। इदं राशि-अंश-कलात्मकं मानं चन्द्रवेलास्फुटं भवति। चन्द्राभिलाषीराशेर्वशात् पूर्वप्रतिपादितविवाहसिद्धेः सम्यक् विचारो विधेयः।

साम्प्रतं जामातुः दिग्निर्णयविधिः प्रोव्यते। प्रश्नकालिकराशिचक्रे आरूढस्य तात्कालिकलग्नस्य च या दिग् प्रोक्ता तस्यां दिशि जामातु असंशयं स्थिति विद्यात्। इत्थं पुरूषप्रश्नेऽपि स्त्रियाः दिशं विचिन्तयेत्।

इत्थं सप्तमदशाऽधयाये प्रतिपादितशुभग्रहस्थित्या शुभशकुनैश्च सकाशात् अयं विवाहः शुभप्रदेति प्रश्नलग्नद्वारा परिशोध्य तदनन्तरं तदनुसारेण वधूवरयोः निश्चयं कृत्वा विवाहं समुहूर्ते समनुष्टेयम्। पूर्व द्वितीयाध्यायस्य 150 श्लोके 'पाणिग्रहणमन्योन्यं द्वयोः कस्यापि चागमः' इत्यादिरीत्या तत्र तत्र विवाहसम्बन्धिनं शुभशकुनफलमपि विमश्र्य सम्यक् योजनीयम्।

***

# प्रश्नावली

I. संक्षेपेण उत्तरं लिखित 5x7=35

1 वधूवरयोः पितृमात्रचिन्तक्रमं विलिखत।

2 विवाहविघ्नकारकलक्षणानि कानि?

3 शीघ्रविवाहयोगलक्षणं लिखत?

4 विवाहत्परभाग्ययोगः कथं ज्ञेयः?

5 जामातुः दिग्विचारविधिं सुस्पष्टयत?

II. विस्तरेण उत्तरं विलिखत 10x4=40

1 यामशुक्रफलचिन्तनक्रमं विशदयत?

2 अङ्गस्पर्शलक्षणेन विवहसिद्धिप्रदयोगं वर्णयत?

3 दम्पत्योः मरणयोगं निरूपयत?

4 चन्द्रवेलाभिलाषी राश्यादिस्फुटक्रमं विशदयत।

III. द्वयोः प्रश्नयोः निबन्धात्मकम् उत्तरं प्रदेयम् 12½x2=25

1 दम्पत्योः मरणयोग-पुत्रहन्त्रीयोग-तयोः परस्परं प्रीतियोगश्चेति योगत्रयं विशदीकुरुत।

2 प्रश्नलग्नात् वधूवरयोः लक्षणान्वेषणप्रकारं निरूपयत।

*******

श्रीः

## ॥ अष्टादशोऽध्यायः॥

## १.० अवतरणिका

अये छात्राः।

स्त्रीणां तावत् अपत्यसुखं प्रमुखं स्थानं भजते। शास्त्रेषु प्रोच्यते सन्तानोत्पत्तिवशात् पितरो न पतन्ति नरके। सन्ततेः विषये पतिपत्न्योः जातकं विमर्श्यते। तस्मिन् विषये तत्राऽपि विशिष्य स्त्रिणां जातके परिचिन्त्यते अपत्यम्। लोके विबीजिनां पुरूषाणाम् अपेक्षया स्त्रीयाः एव बाहुल्येन बन्ध्यात्वदोषं प्राप्नुवन्तीति प्रतीतिः। यद्यपि इदानीं सन्ततेः विषये आस्था एव न्यूना परिलक्ष्यते। अस्याः मूलमस्ति वर्धिष्यमाणा जनसंख्या एव। एवं सत्यपि दम्पत्यौ कदापि तयोः कृते सन्तानं मास्तु इति नेच्छतः। उद्वाहस्य उद्देश्येषु सन्ततेः सुखं प्राधानं वर्तते। विवाहानन्तरं यद्यपत्योत्पत्तिर्नजायेत तर्हि सा स्त्री बन्ध्येति उच्यमाणा भवति। अतः सन्ततेः सुखं वर्तते वा न वा? कदा वा अपत्यस्य प्राप्तिर्भवति। कस्मिन् वयसि विशिष्य सन्तनयोगे वर्तते? अपत्येषु पुत्रसन्तानं कति स्यात्? कन्यासन्ततिर्वा कति? जायमानेषु अपत्येषु रूप-गुण-भाग्य-आज्ञापालन-निरोगादयश्य स्थास्यन्ति वा न वेति विज्ञातुं सर्वेऽपि इच्छन्ति। अतोऽत्र सन्तानप्रश्नः प्रधानः विषयः।

### उद्देश्यानि

* **सन्तानप्रश्नः**
* **क्षेत्रबीजगुणदोषचिन्तनविधिः**
* **अनपत्ययोगाः दत्तकपुत्रयोगाश्च**
* **पुत्रशोक-बहुकन्याजनन-सन्ताननाशयोगाश्च**
* **सन्तानलाभयोगाः बहुसन्तानकन्यासन्तानयोगाश्च**
* **सन्तानप्रतिबन्धकयोगाः दत्तकपुत्रदानयोगाश्च**
* **गर्भाधान-यमकण्टकयोगस्फुट-आरूदेश-यमकण्टकस्फुटयोगश्च**

- **सन्ततेरभावयोगः-पूर्णसन्ततिः-सन्ततेः कालनिर्णयश्च**
- **गर्भादानकालनिर्णयः, स्त्रीजातिचिन्तनक्रमश्च**
- **गर्भप्रश्नः गर्भिणीमरणयोगश्च**
- **भूतोदयवशात् सन्ततेः चिन्तनविधिः**
- **गर्भस्य चतुर्दशलक्षणानि, गर्भिण्या आसक्तिः, गर्भस्रावश्च**
- **पुरूषस्त्रीचिन्तनविधिः**
- **प्रसवकालः मान्दिवशात्प्रसवकालज्ञानं वर्णचतुष्टय विवरणञ्च**
- **सन्तानप्राप्तये अभिहितानि प्रायश्चित्तानि**
- **सन्तानसंख्याज्ञानक्रमः, दत्तकस्फुटफलं सन्तानत्रिफुटञ्च**

## १.१ सन्तानप्रश्नः

विवाहविषयकप्रश्नं संवर्ण्य इदानीं सन्तानप्रश्नस्य विचारः प्रथमम् उच्यते। सर्वे प्रश्नाः शुभमुहूर्तेषु एव प्रारभ्यमाणाः भवन्ति। यतो हि कालस्य शुभत्वं नितरां सर्वेषु कार्येषु प्रधानमस्ति। अतः तत् प्रश्नकालस्यैव औचित्यम् आदौ वर्ण्यते।

पुरा यदुवंशे जाम्यइत्याख्यो महाराज्ञः शैभ्यइत्याख्यां कन्यां वरय्य बहुकालं यावत् तस्याम् अनपत्यत्वमवलोक्य एकदा शुभ दिवसे सुमुहूर्ते देवपूजादिकं कृत्वा पूजायाः प्रसादं सुमुहूर्ते एव तस्याः शैभ्यायाः हस्ते निक्षिपन् भवती 'पुत्रवती भव' इत्यवदत्। सुमुहूर्ते मुखारविन्दात् आगतस्य तस्य वाक्यस्य प्रभावेनैव अचिराद् एव सा गर्भवती बभूव। ततः प्रभृति सा भर्तुः प्रीतिपात्रवतीभूय सुसन्तानेन जीवनं यापितवती। अतः सर्वे सज्जनाः सुसमये शुभलग्ने शुभग्रहाणां स्थित्यादीन् अवलोक्य दैवज्ञस्य समीपे भार्याचिन्तन-सन्तानलाभधनादिलाभश्च अभीष्टं यदि विचारयन्ति तर्हि शुभमेव भवति।

ज्योतिवित्समीपे गत्वा अस्य पुरूषस्य तस्यां यौषित्यै पुत्रं किं भविताा ना वा इति दम्पत्योः नामनक्षत्रम् उक्त्वा सन्तान प्रश्नं सन्ततेविषये प्रच्छेत्। यद्यपि अस्ति अयं सन्तानप्रश्नः दम्पत्योः द्वयोरपि विषयत्वेन समानः। तथापि सन्ततिप्रश्ने तत्कालीनलग्नेन पुरूषस्य सम्बन्धीनि देह-धन-भ्रात्र-सुखादयश्च चिन्तनीयाः वर्तन्ते। तत्रैव विशिष्य सन्तानप्रश्ने

आरूढलग्नवशात् स्त्रियाः देह-धन-भ्रात्र-सुख-अपत्यादयश्च विचार्याः भवन्तीति प्रश्नसंग्रहनामके ग्रन्थे शास्त्रकाराः प्रवदन्ति। इत्थं दम्पत्योर्मध्ये पुरूषस्त्रीभेदेन विधीयमाण प्रश्नस्य वैशिष्ट्यं चिन्तयेत्।

### १.२ क्षेत्रबीजगुणदोषचिन्तनविधिः -

आरूढलग्नाधिपः तल्लग्नाद् नवमाधिपतिः द्वौऽपि मूढौ यदि स्यातां भवतः तर्हि स्त्री क्षेत्रदोषवशाद् अपत्याभावः। तस्याः स्त्रियाः गर्भकोशस्य किमपि दोषाद् गर्भधारणसामर्थ्याभावेन क्षेत्रन्यूनतां विभावयेत्। एवं प्रश्नवशाद् क्षेत्रेदोषो परिलक्ष्येत तर्हि सन्तानसिध्यै उद्वाहं काचिद् अन्यया कन्यया कुर्यात्। तत्काले उदयलग्नाधिपः पञ्चमेशश्च उभौ मूढौ (अस्तं गतौ) भवतः तदा पुरूषस्य कृते सन्तानोत्पादकवीर्यशक्तेरभावेन बीजदोषेण सन्ततिर्नभवति। एवं यदि बीजदोषो परिदृश्यमाणो वर्तते चेत् विष्णुपूजया, ब्राह्मणाराधानञ्च विधाय दोषस्य प्रशमनं कुर्यात्। क्षेत्रबीजयोः द्वयोरपि दोषबाहुल्ये सति अपत्यं न जायतेति वक्तव्यम्। तद्यथा-

**''आरूढेशः शुभपतिरतो द्वौच मूढौ यदि स्यात्**
**दुष्टं क्षेत्रं पुनरिह विवाहोस्तु सन्तानसिध्यै।**
**यद्वा मूढावुदयसुतपौ बीजदोषोत्र विष्णुः**
**विप्रार्च्याः तनय जनयेनात्मजाप्तिर्द्विदोषे।।'' इति**

आरूढलग्नाद् 3-6-10-11 एषु भावेषु चन्द्रः विद्यमानश्चेत् अथवा तात्कालिकलग्नाद् 1-2-4-5-7-9-12 भावेषु चन्द्रो वर्तते चेत्, आरूढलग्नं स्त्रीराशिकं यदि भवेत्, आरूढलग्नम् अग्निभूतोदये वर्तमानश्चेद्, आरूढलग्नं तात्कालिकलग्नं च वृषसिंहकन्या-वृश्चिकेष्वन्पतमं प्रश्नलग्नं वा स्यात्, प्रश्नकालिकगुरूः यस्मिन् नक्षत्रे विद्यमानोऽस्ति तन्नक्षत्रस्य कारकवृक्षे फलस्योपरतेः कालः यदि प्रवर्तमानश्चेत् पुत्रलब्धिः दुर्लभेति भाव्यम्।

अत्र नराणाम् अनपत्यत्वं, दत्तकपुत्रादीनां स्वीकारस्य लक्षणं सञ्जायमानपुत्रशोकः, अल्पसन्तानयोगः, बहुसन्तानयागादयश्च उच्यन्ते। पूर्वोक्तविषये सन्तानदीपिकाकारस्य मतं वक्ष्यन्ति।

## १.३ अनपत्ययोगाः दत्तकपुत्रयोगाश्च

गुरूः, लग्नाधिपतिः, दारेशः पञ्चमाधिपतिश्च एते सर्वे बलहीनेषु सत्सु अनपत्यता वक्तव्या भवति।

तदुक्तं यथा -

**''गुरूलग्नेशदारेशपुत्रस्थानाधिपेषु च।**

**सर्वेषु बलहीनेषु वक्तव्या त्वनपत्यता॥''** इति।

पञ्चमभावे पापग्रहः, नीचस्थितो पञ्चमाधिपतिः यदि शुभदृष्टिविहीनो वर्तेत तर्हि अनपत्यता वक्तव्या। तद्यथा-

**''पुत्रस्थानगते पापे तदीशे नीचसंस्थिते।**

**शुभदृष्टिविहीने च वक्तव्या अनपत्यता॥''** इति।

गुरूः विद्यमानराशितः, लग्नाद्, चन्द्राच्च पञ्चमस्थैच्च पापकैः शुभदृष्टिविहीनैर्वशाच्च सन्तानस्य अभावो वक्तव्यः।

अत्र दत्तकपुत्रस्वीकारो वर्ण्यते। यथा- पञ्चमभावः मिथुनकन्यामकरकुम्भेषु अन्यतमो राशिर्भवेत्। (नपुंसकग्रहयोः क्षेत्राणि) तत्पञ्चमभावस्योपरि मन्दमान्द्योः योगो दृष्टिर्वा स्यात्तदा दत्तकपुत्रस्वीकारः क्रियते सुन्तानाभावेन।

तद्यथा-

**''पुत्रस्थाने बुधक्षेत्रे मन्दक्षेत्रेऽथवा सति।**

**मन्दमान्दियुते दृष्टे तदा दत्तादयः सुताः॥''**

सम्पूर्णबलसंयुतः शुभग्रहः पञ्चमभावे स्थितो भवेत्। तत्पञ्चमभावस्योपरि पुत्रेशस्य दृष्टिः न स्यात्तदा दत्तकपुत्रयोगेति मन्तव्यम्। अत्र भावेशस्य दृष्टिविरहितः यः स अनिष्टफलदः स एव भावेशस्य दृष्टियुतः इष्टफलदेति भावः।

## १.४ पुत्रशोक-बहुकन्याजनन-सन्ताननाशयोगाश्च

आरूढलग्नवशात् तत्कालीनप्रश्नलग्नवशाद्वा देवगुरूः मकरमीनराशौ वा गतः तद्भावः

आरूढलग्नात्पञ्चमभावत्वेनागतश्चेत् पृच्छक: पुत्रशोकभाग् भवति, यद्वा पुत्रशोकस्य हेतुभूतोऽयं योग:। कर्कटराशि: पञ्चमभावो भूत्वा तत्र गुरूर्वतते चेत्तदा तस्य मनुष्यस्य बहुकन्याजननं भवतीति मुनयो वदन्ति, नात्र संशय:।

अष्टमभावस्य पति: पञ्चमभावे, पञ्चमेश: अष्टमभावे गते सति, पञ्चमेश: शत्रुक्षेत्रे, नीचक्षेत्रे वा विद्यमानो स्यात्, सौम्यैरदृष्टो भवति च तदा सन्तातिर्नाशो विनिर्देश्य:।

बलहीनो गुरू:, पञ्चमेशश्च पापग्रहमध्यवर्तिनौ स्याताम्। (द्विद्वादशे पापा: स्यु:) सौम्यानां योगदृष्टिविरहितो चेत्तदा अपत्यनाश: स्यात्।

तद्यथा-

**''पापद्वयमध्यगते जीवे पुत्राधिपेन बलहीने।**

**सौम्ययुति दृष्टिहीने सन्ततिनाशो विनिर्देश्य:॥''** इति।

सुतेश: स्वनीचराशौ वा, शत्रुक्षेत्रे वा मौढ्योपगतो वा भवेत् रन्ध्रेशव्ययाधिपयो: संयुत: सन् शुभदृष्टिविहीन अथवा पञ्चमभावस्योपरि शुभदृष्टिहीनता स्यात्तदा सन्ताननाशयोगेति मुनय: कथयन्ति।

## १.५ सन्तानलाभयोगा: बहुसन्तानकन्यासन्तानयोगाश्च

पञ्चमभावो पापविमुक्तश्चेत्तदा सन्ततिलाभो विनिर्देश्य:॥ मेषसिंहवृश्चिकमीनानां मध्ये अन्यतमो एको राशि: लग्नात् पञ्चमभावे स्थितो भवेत्, तत्र दृष्टियुतिभ्यां कुजजीवाभ्यां पुत्रप्राप्तिं विनिर्दिशेत्।

पञ्चमभाव: शुभानां मध्ये विद्यमानो भवेत्। अर्थाद् पञ्चमभावस्य द्विद्वादशे शुभानां स्थितिर्भवेत्, पुनश्च शुभानां वीक्षणं योगो वा पञ्चमभवस्योपरि यदि स्यात्तदा सुतावाप्ति: भवतीति निर्दिशेत्।

वीर्यान्वित: पञ्चमेश: 1-5-7 तमे भावे स्थित्वा तस्योपरि पापानां दृष्टि: पापै सह योगो वा न स्यात्तदा सन्ततेर्लाभो वाच्य:।

अपत्यकारक: बलसंयुत: देवगुरू: 1-5-7 एषु भावेषु विद्यमान: पापै: न विलोकितो भवति तदानीं सन्ततेर्लाभो आदेश्य:।

सुतेशः बलसंयुक्तः शुभमध्यगतः, शुभ दृष्ट्या युतः शुभानां योगे वा विद्यमानश्चेत्तदा पुत्रस्य प्राप्तिर्भवति। तद्यथा–

**"सुतेशे बलसंयुक्ते शुभमध्यगतेऽथवा।**

**शुभदृष्टियुतोवापि सुतावाप्तिं विनिर्दिशेत्॥"** इति।

इदानिं बहुसन्तानयोगान् वर्णयन्ति। तद्यथा– बलान्विताः शुक्रगुरूबुधाः पञ्चमभावे विद्यमानाः स्युः, यद्वा वीर्यान्वितानां पूर्वोक्तानां ग्रहाणां दृष्टिः पञ्चमे यदि स्यात्तदा बहुसन्ततियोगो वर्तते इति वदन्ति सन्तः। पञ्चमभावेशस्य कृते यावान् अधिकबलं वर्तते तावान् अपत्यानां वृद्धिं वदेत्। **'सुतभवनेश बलेन चिन्त्यमेतत्'**– इत्युतत्वात् बली पञ्चमेशस्य अंशकेन संख्याज्ञानं कर्तव्यमित्याशयः।

पञ्चमेशः परमोच्चांशकगतः, पुरूषराशेर्नवांशे शुभग्रहेण अवलोकितश्चेत्, पञ्चमभावस्य कृते पापायोगः दृष्टिर्यदि न स्यात्तदा धीमन्तः बहुपुत्रलाभयोगो वर्ततेति प्रवदन्ति।

पञ्चमेशः, गुरूकुजरवयश्च एते पुरूषराशिषु पुरूषराशेर्नवांशके 6'8'12 स्थानान् विहाय कुत्रापि अन्य राशिषु गता स्युः तत्रापि बहुपुत्रलाभो भवतीति मुनयो वदन्ति। पञ्चमेशस्य वीर्यवशात् गुणवान् पुत्रस्य जननं वाच्यम्।

पञ्चमेशचन्द्रशुक्राश्च एते युग्मराशौ स्थित्वा युग्मराशेर्नवांशे यदि स्युः बहुकन्यकालाभम् अथवा बहुकन्यासन्ततिप्राप्तियोगेति धीमान् ज्योतिष्कः वदेत्।

तद्यथा–

**'सुतेशशशिशुक्रेषु स्त्रीराश्यंशगतेषु च।**

**तथैव कन्यकालाभं प्रवदेन्मतिमान्नरः॥'**

## १.६ सन्तानप्रतिबन्धकयोगाः दत्तकपुत्रदानयोगाश्च

1. लग्नं चन्द्रहोरागतं स्यात् वामभागगं श्वासोच्छवासो यदि प्रश्नसमये दृश्येत, आरूढलग्नं तात्कालिक लग्नं च युग्मराशौ वर्तेत तदा पुत्रलाभयोगो न विद्यते।
2. सूर्य–होरागतं लग्नं, वायुश्च दक्षिणभागगः, आरूढलग्नमपि ओजराशिगतं यदि न स्यात्तदानीमपि पुत्रलाभो नास्तीति।
3. लग्नं चन्द्रहोरागतं स्यात्, वायुरपि वामभागगो वर्तेत चन्द्रलग्न आरूढलग्न तात्कालिक

लग्नानि च एषु त्रीषु वृष-सिंह-कन्या-वृश्चिकेषु राशिष्वेको अन्यतमराशिर्यदि लग्नं स्यात्तदानीमपि पुत्रलाभयोगो नास्तीति भाव:।

4. सूर्यहोराकं लग्नं वायु दक्षिणभागग: चन्द्र: लग्नं आरूढं च वृष-सिंह-कन्या-वृश्चिकेषु अन्यतमो यदि भवेत्, लग्नस्फुटे अग्निभूतोदयो प्रतीयमानं दृश्येत, एवम् एतादृश योगेन सन्तानलाभो न भवति। एते च चत्वारो योगा: सन्तानप्रतिबन्धाकयोगेति जानीयात्। पूर्वोक्त चतुर्णां योगानां कृतेऽपि अग्निभूतोदयस्य आवश्यकताम् इच्छन्ति केचन।

अथ पुत्रं दत्तकत्वेन दानयोगमाह -

पञ्चमेश: 1-7-5 तमे स्थाने विद्यमानो स्यात्, अथवा लग्नेशपञ्चमेशौ पञ्चमभावे स्थितौ यदि स्त:, पञ्चमेश: लग्नेशेन अथवा सप्तमाधिपतिना सह वर्तमानश्चेत् स्वपुत्रं दत्तकत्वेन प्रदीयमाणो-योगेति विज्ञातव्य:। अत्र गुरूरपि पञ्चमेशवत् फलप्रदाता वर्तते। अत: पञ्चमेशस्य फलं गुरोरपि वाच्यम्।

लग्नेशपञ्चमेशौ एकस्मिन्नेव राशौ स्याताम्, एकस्यैव राश्यंशके यदि भवत:, तयो: परस्परं लग्नेशपञ्चमेशयो: दृष्टि: स्यात्, लग्नाधिपति: सप्तमे सप्तमाधिश्च लग्ने स्यात्, एतादृशयोगो यदि स्यात्तदा पुत्रलाभो भवतीति ब्रूयात्।

सन्ततिप्रश्ने चन्द्र: आरूढलग्नात् अनुपचयस्थानेषु यत्र कुत्रापि स्थितो भवेत् (1-2-4-5-7-8-9-12) अथवा तात्कालिकलग्नाद् उपचयस्थानेषु (3,6,10,11) चन्द्रो यदि विद्यमानो भवेत् एतौ उपर्युक्तयोगद्वयौ सन्तानलाभयोगौ स्त:। आरूढलग्नात् स्त्रिया: विचार:, तात्कालिक लग्नाद् पुरूषस्य विचार: कर्तव्य:। आरूढात् 3.6.10.11 एषु भावेषु चन्द्रस्य स्थितेर्वशात्, तात्कालिकलग्नाद् 1-2-4-5-7-9-12 भावेषु चन्द्रस्य स्थित्या च अपत्ययोगो न विद्यतेति मुहूर्तमाधवीये माधवाचार्यै: विपरीतक्रमेण कथितोऽस्ति।

## १.७ गर्भाधान-यमकण्टकयोगस्फुट-आरूढेशयमकण्टकस्फुटयोगश्च

कन्याया: विवाहानन्तरं ऋतुकाले स्त्रिया: जन्मराशित: अनुपचयस्थानेषु कुजेनेक्षित: चन्द्र: वर्तते चेत् जायमानं रज: खलु गर्भफलप्रदं भवतीति चिन्तयेत्। यस्मिन् काले सा ऋतुमतिरभवत् स काल: गर्भाधाारणयोग्य: कालेति। अनुपचयस्थनगतस्य चन्द्रस्योपरि

कुजस्य दृष्टिः यदि स्यात्तदा इदानीं जायमानं गर्भं निष्फलं भवति। पुरूषजन्मराशेः सकाशाद् उपचयस्थानेषु गुरूण ईक्ष्यमाणो चन्द्रोप्यस्ति तदा गर्भादानार्थं योग्यः कालः सन्निहितो अस्तीति बोद्धव्यम् गर्भादानार्थम्। अन्नप्राशनार्थञ्च 16 नक्षत्राणि मूलनक्षत्रं च ग्राह्याः। पर्वकालोज्झिते शुभकाले गर्भादानं क्रियते चेत् वदम्।

यद्यपि सन्तानप्रश्नकर्मणि बहवः सम्प्रदायाः सन्ति। तेषु गुरूपदिष्टः एको सम्प्रदायः अत्र कथ्यते-

उपक्रमैऽस्मिन् आदौ गुरूपदिष्टसम्प्रदायानुगुण्येन यमकण्टकस्फुटस्य विषये उच्यते-

यमघण्टको नाम गुरोः पुत्रः। सन्ततेः चिन्तनावसरे अस्य ग्रहस्य महत्वं आधिक्येन वर्तते। तस्मात् तत् यमकण्टकस्फुटानयनक्रमः विवर्ण्यते। प्रश्नकाले पूर्वक्षितिजे उदितस्य तात्कालिकलग्नस्फुटं यमकण्टकस्फुटं च कृत्वा तयोः योगं कुर्यात्। योगफलं यद् आयाति तदृवशात् सन्ततिविचारः कर्तु शक्यते। अस्मिन् द्वयोः स्फुटयोः राश्यंशकयोर्मध्ये यत्कृते बलाधिाक्यं तद्वशात् अग्रिमं फलं विचिन्तयेत्।

**''दिव्यो बन्धो नटस्तज्ञः**

**प्राज्ञश्चन्द्रोरूरूक्रमात्''**

इत्युक्तवत् रव्यादिवासरेषु अधोनिर्दिष्टक्रमेण यमकण्टकस्य उदयो भवति।

| **वासराः** | **यमकण्टवोदयघट्यः** |
|---|---|
| रविवासरः | दिव्यः 18 |
| इन्दुवासरः | बन्धः 14 |
| भौमवासरः | नटः 10 |
| बुधवासरः | तज्ञः 06 |
| गुरूवासरः | प्राज्ञः 02 |
| शुक्रवासरः | चन्द्रः 26 |
| शनिवासरः | ऊरूः 22 |

दिनमानम् यदि त्रिंशत् घट्यः स्युः तदानी यमकण्टकस्योदयः पूर्वोक्तेषु घटीषु क्रमशः भवन्ति। परन्तु अभीष्टकाले तावत् किमिति त्रैराशिकवशात् अभीष्टादिने मान्दिस्फुटवत् अस्याऽपि स्फुटं कार्यम्।

यमकण्टकयोगस्फुटराशौ अंशके वा बलाबलं सम्यक् वीक्ष्य तत्र यः प्रबलः राशिः स पृष्टोदय-अधोमुख- युग्मराशिस्थिति- नुपुंसकग्रह-पापग्रहयोगः च तेषां पापानां दृष्टि-प्रभृतयो यद्यागता तदा सन्तानलाभो नास्ति। यमकण्टकयोगस्फुटराशि अंशको वा नरनाशिः यद्यागतश्चेत् सन्ततेर्योगः सुतरां वर्तते। अयं योगस्फुटराशिः उर्ध्वास्य मूर्धोदय-नरराशि-ओजराशिश्च यदि भवति तत्राऽपि शुभानां योगः दृष्टिश्च यदि स्यात्तदा शीघ्रं सन्ततेर्लब्धिं प्रवदेत्।

तात्कालिकलग्नस्याधिपतिः यमकण्टकयोगस्फुटराशिः तद्राशेः अंशकराशीनां बलाबलयोगम् उक्त्वा इदानीम् आरूढेश यमकण्टकयोगस्फुटराशेर्वशाच्चापि सन्ततेः चिन्तां कर्तुं शक्यते इत्यभिप्रायं स्पष्टयामासुः। पूर्वोक्तं योगस्फुटं नरराश्यंशकगतं वा स्यात् निश्चयेन सन्ततेर्लाभो स्यादेव इति ऋषीणां परमोपदेशो वर्तते।

## १.८ सन्ततेरभावयोगः, पूर्णसन्ततिः, सन्ततेः कालनिर्णयश्च,

पुत्रेशयमकण्टकगुरूश्च येषाम् उपरि नपुंसकग्रहयोः दृष्टिः तैः सह तयोः नपुंसकग्रहयोः योगो वा स्यात्, पूर्वोक्त पुत्रेशयमकण्टकराश्यधिपगुरूश्च एते युग्मराशौ युग्मांशके वा अनिष्टवभावे स्थिताः, पञ्चमभावस्य कृते बुधस्य अथवा नपुंसकग्रहस्य योगः अथवा दृष्टिः स्यात्, शुभानाम् ईक्षणं यदि न वस्यात्तदा, पञ्चमभाव ओजराशिगतो भवेत्, अपत्यभावेश ओजांशके विद्यमानः सन्ततितिथेरागमनं बहुलाष्टमीतः परं संदृश्यमाणं स्यात्, आहत्य एते एकत्र दृष्टाः भवेयु तदा सन्ततेर्योगो नास्तीति वाच्यः। केचन पूर्वोक्ताः योगाः दोषदाः संदृष्टाः तदानीं धर्ममूलाद् नाम धर्मकार्यरूपप्रायश्चित्तादिना भवेत् सन्ततिः इति वदन्ति। अत्र षण्डग्रहौ शनिबुधौ मन्तव्यौ।

पूर्णासन्ततियोगः -

गुरू-यमकण्टक-पञ्चमेशश्च उच्चादिस्थानेषु स्थिताः शुभक्षेत्रे विद्यमानाः, पुरूषराशौ

पुरूषराशेर्नवमांशकयुता: ते च इष्ट भावे स्थित्वा शुभैरवलोकिता: पापैर्बुधेन च न दृष्टा:, तथा च पञ्चमभाव: शुभग्रहस्य योगेन दृष्ट्या च युत: पापानां योग दृष्टेर्विना ओजराशौ ओजराशेर्नवाशे यदि स्यात्, सन्तते: तिथि: शुक्ल पञ्चमेरूर्ध्वगता स्यात्तर्हि नियतं स्त्रीपुत्रादि पूर्णासन्ततेर्लाभं वर्ततेति विभावयेत्। एतावत् पर्यन्तं यत्र लग्नमितिशब्दप्रयोग: विहित: तत्र सर्वत्र लग्नम् आरूढलग्नपरकमेवेति बोध्दव्य:। परन्तु सर्वत्र तात्कालिकलग्नस्य कृते उद्यल्लग्नमिति संकेत: कथितोऽस्ति।

तत्कालोदयलग्नस्य द्वादशांशराशे: पञ्चमराश्याधिप: आरूढलग्ने यदि वर्तते चेत् पृष्टु एकवत्सरत: पुरैव सन्तानजन्म ध्रुवं भवति।

अयं पञ्चमराश्यधिप: षष्ठभावान्तवर्तिराशिषु वर्तमानश्चेत् एकैकस्य भावस्य कृते एकैकं वर्षमिति गणय्य तत्तद् वर्षे सन्तते: प्राप्तिरिति वदेत्। प्रथमभावे स्थिते सति एकवर्षाभ्यान्तरे, द्वितीयभावे स्थिते सति वर्षद्वयाभ्यन्तरे, तृतीयेभावे स्थिते सति वर्षत्रयाभ्यन्तरे एवं क्रमेण सम्यक् ज्ञात्वा ब्रूयात्।

पूर्वोक्तपञ्चमराशीश: षष्ठभावादूर्ध्वतेमे राशौ वर्तमानश्चेत्तदा बहुधर्मकर्मानुष्टानादिना सन्ततिर्भवति अतिविलम्बेन। तत्रापि विशिष्य 6,8,12 तमे राशौ स्थितञ्चेत् अतिविलम्बेन प्रायश्चितबाहुल्येन अपत्यं जायतेति ब्रूयात्।

पूर्वोक्तयमकण्टकयोगस्फुटराशे: नवांशकाद् 5-7-9-11 एषु भावेषु यदि गुरू: सञ्चरति तदा पृष्टु: सन्ततिसम्भवो वाच्य:। एषु 5-7-9-11 भावेषु यस्मिन् भावे शुभयोग: दृष्टिश्च स्यात् तद्भावे गुरूर्याते सति गर्भलक्षणं वदेत्। तत्समये गर्भोत्पत्तिर्भवति चेत् सफलं भवति गर्भ:। पूर्वोक्तेषु 5-7-9-11 भावेषु अशुभानां योग: दृष्टिश्च यदि स्यात् तद्राशौ गुरो: सञ्चरणं सद्भावे सति गभोत्पत्तिर्भवति चेदपि गर्भस्रावो भवति। निष्फलं भवति च तद्गर्भोत्पत्ति:।

तत्कालोदयलग्नस्फुटं-चन्द्रस्फुटं-यमकण्टकस्फुटं मान्दिश्च येषा चतुर्णां स्फुटं कुर्यात्। तेषां चतुर्णा स्फुटं योगं क्रियते चेत् तत्स्फुटं चतु:स्फुटैति कथ्यते।

इदं चतुस्फुटराशि: ओजराशि ओजराशिर्नवांशे यदि स्यात्, गुरू: तद्राशित: केन्द्रत्रिकोणे आगते सति, अथवा बुधशनिराहुकेतव: केन्द्रत्रिकोणस्थानेषु न चेत्तदा नियतं पृष्टु: सन्तति

सम्भवो समादिश्यताम्। इदं चतुःस्फुटं युग्मराशिकं युग्मराशेर्नवमांशे च स्यात् तच्चतुः स्फुटराशितः केन्द्रत्रिकोणे बुधाशनिराहुकेतवः यदि स्युः गुरोः केन्द्रे चतुःस्फुटराशिर्यदि न वर्तते चेत्तदा सन्तत्यभावसूचकलक्षणमिति भावयेत्।

## १.९ गर्भाधानकालनिर्णयः स्त्रीजातिचिन्तनक्रमश्च

तात्कालिकलग्नस्य पञ्चमभावेशः यस्मिन् भावे वर्तते तद्भावस्य नवमांशे देवेज्यो भवेत्। आरूढलग्नस्य नवांशराशेः पञ्चमभावेशः यस्मिन् भावे विद्यमानः तद्राशेः नवांशे रविः स्थितो भवेत्। तात्कालीनप्रश्नलग्नाधिपतिः विद्यमानस्य राशेः नवमांशे चन्द्रो भवेत्। गर्भाधानं एतादृशकाले यदि क्रियेत तदानीं गर्भ सफलं भवतीति मतिमान् दैवज्ञः पृच्छकस्य कृते वदेत् रहस्यम्।

1. प्रश्नकालिकलग्नस्फुटचन्द्रस्फुटयोः योगं कृत्वा तद्योगस्फुटस्य द्वादशांशराशौ वर्तमानो चन्द्रः स्यात्
2. तद्योगस्फुटनवांशराशौ यदा सूर्यो आयाति,
3. पूर्वोक्तयोगस्फुटस्य कृते गुरोः स्फुटं च संयोज्य यः राशिरागच्छति तद्राशेः नवमांशराशौ गुरूः सञ्चरिष्यमाणसमये,
4. लग्न-चन्द्र-सूर्य-मान्दिश्च येषां चतुर्णां स्फुटानां योगवशात् यः राशिर्लभ्यते तद्राशि गर्भाधानलग्नमिति मत्वा तत्र गुरोः स्थास्यमाने वर्षे-तत्रैव सूर्यो यदा आयाति तन्मासे, तत्र हिमांशुः यदा आगच्दति तन्नक्षत्रे, लग्नाद् गर्भादानसमयं विज्ञाय (योगस्फुटलग्नवशात्) गर्भाधानं विधीयते चेत्तदा सफलं भवति गर्भः। नष्टजातके, गर्भाधाने, प्रसवकालपरिचिन्तायां च इदं चतुःस्फुटं सम्यक् उपयुज्य आधानस्य कालं कथयितुं शक्यते। एतादृश द्विविध-कालचिन्तनक्रमः सर्वत्र ग्राह्यः।

अथ स्त्रियाः जातिचिन्तनक्रमे पञ्चमेशस्य कृते ब्राह्मणक्षत्रियवैश्यादिग्रहेषु यस्य ग्रहस्य दृष्टिः योगो वा स्यात् तद्राश्यंशकसम्बन्धवशात् तत्तद्जात्याः स्त्रियाः सकाशात् पृच्छकस्य आत्मजजन्मलाभो वाच्यः। यद्वा पञ्चमाधिपतिः ब्राह्मणादिराशौ स्थित्वा तद्राशेः अंशकै वर्तते चेत्तदा ब्राह्मणादिजातो जातायाः स्त्रियाः सकाशाद् सन्तानलाभो समादेष्यः 'विप्रस्यान्मीनराशि' इत्यादिक्रमेण मीनः ब्राह्मणराशि मेषः क्षत्रियः, वृषः वैश्यः, मिथुनः शूद्रश्चेति इत्थं सर्वत्र विधिः।

देवगुरोः भार्गवस्य च योगः दृष्टिर्वा पञ्चमभावे यदि स्यात्तदा स्वजातेः स्त्रियाः सकाशाद् (स्वस्यां स्त्रियाम्) सन्तानलाभो समादिश्यः।

यो राशिर्भवति लग्नस्फुटयमकण्टकस्फुटयोः योगेन स राशिः उभयराशिश्चेत् प्रथमोद्वाहेन अपत्यमप्राप्य द्वितीयविवाहकरणेन सन्तानं समजायतेति व्याचक्ष्येत। यद्वा बहुभार्या योगवशात् सन्तानलाभो भवतीति भावः। पूर्वोक्तलग्नस्फुटयमकण्टकयोगस्फुटराश्युपरि पापग्रहाणां योगो दृष्टिर्वा यदि स्यात्तदा सा स्त्री म्रीयते अथवा भवति वन्ध्या। अस्य योगस्फुटराशेरूपरि शुभानां योगो दृष्टिश्च यदि स्यात् सर्वासु भार्यासु सुतोत्पत्तिर्भवति। यदि बुधशन्योः दृष्टिः योगस्फुटराशौ वर्तते तर्हि सन्तरेरभावेन दत्तकपुत्रस्वीकारो कर्तव्येति प्रवक्ष्येत्।

लग्नयमकण्टकयोगस्फुटराशिर्यदि कन्याराशिः स्यात्, तद्राशिं बुधशनी विलोकयतः शनिकुजान्वितो अयं स्फुटराशिः, सूर्य दृष्टया बुधदृष्टयाचान्वितो भवति तर्हि दत्तकपुत्ररूपेण पुत्रद्वयं स्वीक्रियते। दत्तकपुत्रौ उभौ कलाहायमाणौ भवतः। अतः द्वयोरपि धनक्षेत्रयोः लाभो न सम्भवति। योगस्फुटस्यास्य कृते गुरूभार्गवयोः दृष्टिः यदि वर्तते चेत्तदा द्वितीयः दत्तकपुत्रः अनुकूलः सन् दत्तकपुत्रफलमवाप्नोतीति प्रवदेत्। एतावत् पर्यन्तं सन्तानप्रश्नान् वर्णयामासुः। अधुना गर्भप्रश्नो वर्ण्यते।

## १.१० गर्भप्रश्नः गर्भिणीमरणयोगश्च

गर्भप्रश्ने गर्भस्थशिशोः पित्रोश्च शुभाशुभं वक्तव्यमस्ति। अतः तत्प्रकारो अधुना विवर्ण्यते। गर्भप्रश्ने तावत् लग्नस्फुटयमकण्टकयोः योगराशिः लग्नमस्ति। तल्लग्नात् चन्द्राच्च मातुः विचारः, तद्राशितः सप्तमभावात् सूर्याच्च पितुर्विचारः गुरोर्वशाच्च गर्भस्थस्यापत्यविचारं कुर्यात्। राशीनां बालाबलं योगदृष्ट्यादीनां च बलाबलं विचार्य शुभाशुभफलं निरूपणीयम्।

लग्नस्फुटयमकण्टकयोः योगराशिः तद्राशितः सप्तम राशिः, चन्द्रसूर्यगुरवश्च अमी सर्वेऽपि बलहीनाः अशुभैर्विलोकितयुताः शुभयेगेक्षणरहिताः स्युः, तदा नियमेन दम्पत्योः मातापित्रोः मरणयोगः। एतादृशयोगे केवलं गुरूरेव बलवान्, अन्ये सर्वेऽपि दुर्बलाः स्युः, जातः शिशुरेव जीवति। लग्नस्फुटयमकण्टकस्फुटयोः योगः योगस्फटराशिरित्युच्यते, तादृशयोगस्फुटस्य लग्नराशिः, लग्नाधिपतिः चन्द्रश्च एते बलरहिताः पापैश्चयुक्तेक्षिताः

स्युः गर्भिण्याः मरणं भवति। गुरूः सबले सति सुतेन सह मातुरपि मरणं वाच्यम्। अपि च गुरूः बलसहितश्चेत् प्रसवानन्तरं शिशुर्जीवति मरिष्यति च माता। सूर्यः, सप्तमभावेशः सप्तमभावः एते च बलहीनाः पाग्रहवीक्षितयुता वा स्युः मृत्युं विनिर्दिशेत् पितुः। पूर्वोक्तयोगे जीवे वीर्ययुते अपत्योत्पत्तेः पश्चात् पितुः मृतिः भवति।

गर्भप्रश्ने योगस्फुटराशौ सूर्यकुजयोः योगे सति पितुः रोगः, चन्द्रशन्योर्युतिवशात् मातुः कृते रोगः, चन्द्रेण सह कुजशनिराहुणां मध्ये अन्यतमस्य एकस्य योगात् तदितरयोः दृष्टिर्यदि स्यात्, शुभानां योगः दृष्टिश्च न स्यात्तदा सगर्भामातुः मृतिः भवति। योगस्फुटराशौ त्रयाणां कुजशनिराहूणां योगः अथवा दृष्टिर्यदि स्यात् तदा पूर्वोक्तं फलम् अवश्यं वक्तव्यम्। सूर्यकुजयोः योगः अथवा परस्परं दृष्टिः, शनेः कृते राहोः दृष्टिः तयोः द्वयोः योगो वा स्यात् शुभानां योगदृष्टेऽभावे सति मातुः प्रसूतेः प्राक् पित्रमृत्युर्भवति। कुजशनिराहवः गुरोः योगेन दृष्ट्या वा स्थिताः शुभयोगदृष्ट्या रहिताः यदि स्युः गर्भस्थशिशुः गर्भे एव मरणमेति।

सन्ततिप्रश्ने लग्नात् द्वादशाधिपतिः गुरोश्च स्फुटस्य युतेर्वशात् यद्योगस्फुटराशिर्भवति तद्राशेः द्वादशभावे कुजशन्यौ यदि स्यातां तदा सन्ततिर्नास्ति। दम्पत्योः जातकेऽपि एतादृशयोगो यदि वर्तते तर्हि सन्ततिर्नभवति। मान्दियमकण्टकस्फुटयोः योगवशात् यद्योगस्फुटं भवति तद्योगस्फुटस्य नक्षत्रं दम्पत्योः नक्षत्रात् तृतीय-पञ्चम-सप्तम नक्षत्रञ्चेत् सन्ततिर्नभवति।

**अथ शापादिना सन्ततेर्हानियोगाः वर्ण्यन्ते**

लग्नात् पञ्चमभावे राहु अथवा पुत्रेशसहितोराहुः, पञ्चमभावः शुभैरनीक्षितश्चेत् सर्पशापाद् सन्ततेः क्षयो भवति। तद्यथा-

**''पुत्रस्यानगते राहौ पुत्रेशसहितेऽथवा।**
**शुभैरनीक्षिते विद्यात्सर्पशापात्सुतक्षयम्॥''**

लग्नाद् त्रिकोणे शनिः मान्दियुतः सन् स्थिते सति शुभैश्च नेक्षितश्चेत् पित्रशापाद् सुतक्षयं भवति।

पञ्चमेशः कुजेन संयुक्ते अथवा षष्ठेशेन युते सति स पञ्चमेशः शुभैरनीक्षितश्चेत् शत्रोः कृत्यदोषात् सन्ततेर्नाशः भवति। पञ्चमभावे कुज अथवा षष्ठेशः तौ शुभदृष्टिविरहितश्चेत् शत्रोः कृत्यदोषात् सुतक्षयं विजानीयात्।

पञ्चमेशः पञ्चमे शुभदृष्टिविवर्जितः पापग्रहेण संदृष्टश्चेत् देवताशापाद् सुतक्षयः जायते।

चतुर्थभावे पापः, मन्दसंयुतः सुतेशः, व्यये च पापग्रहयुतिः यदि स्यात् मातुः शापास्य कारणेन सुतक्षयं वाच्यम्।

नवमभावे पापग्रहः पञ्चमेशः मन्देन युतः, त्रिकोणे मन्दमान्द्योः युतिः कुत्राऽपि यदि स्यात्तदा पितृशापेन सन्ततेर्नाशः भवति।

गुरूपञ्चमेशलग्नेशश्च एते बलान्विताः, धर्मेशः मौढ्यगतश्चेत् देवताशापजनितदोषवशात् सन्ततेर्हानिः वर्तते नृणाम्। अस्मिन् एव योगे गुरूशुक्रौ पापयुतौ स्यातां तदा ब्राह्मणशापेन सन्ततेर्नाशः। रविचन्द्रौ पापयोगे स्थित्वा शत्रुनीचादिक्षेत्रे विद्यमानौ भवतः पितृमातृशापदोषेण सन्ततेर्हानिः।

लग्नाधिपतिपञ्चमेशगुरवश्च एते विबलाः सन् कर्मेशः अशुभयोगवीक्षणयुतः षष्ठाष्टमद्वादशभावेषु यत्र कुत्रापि विद्यमानश्चेत् कस्यापि महापापकर्मणः वशात् दम्पत्योः सन्ततेर्हानिः वक्तव्यः। लग्नेशपञ्चमेशगुरवश्च बलहीनाः कुजः षष्ठाधिपश्च बलिनौ अथवा तयोर्योगः यद्वा षष्ठेशः कुजश्च पञ्चमे यदि व्यवस्थितौ स्यातां तदा वैरिकृताभिचारदोषात् सन्ततेर्हानिं वक्तव्यम्।

लग्नेशपञ्चमेशगुरवः सबलाः चतुर्थभावे पापग्रहा अथवा चतुर्थभावाधिपतिः षष्ठाष्टमद्वादशशभावगतश्चेत्तदा वासस्थानस्य स्थलदोषेण सन्ततेः हानिं विनिर्दिशेत्। गुरूलग्नेशपञ्चमेशाः वीर्यन्विताः सन्तः पापग्रहाः बलहीनाः यदि स्युः तदा वासस्थानदोषं प्रवदेत् अवश्यम्। राहुः पूर्वोक्तत्रिभिः गहैरन्वितश्चेत् अथवा पञ्चमभावे राहुः विद्यमानश्चेत् सर्पशापाद् सन्ततेर्नाशः। पूर्वोक्तयोगेऽस्मिन् यदि कुजोऽप्यन्वितश्चेत्तदा दुष्कमर्णः वशात् वाताशिनां वैरेण सर्पशापेन सुतक्षययोगेति मन्तव्यम्।

गुरूलग्नेशापञ्चमेशाः त्रयोऽपि ग्रहाः बलान्विताः सूर्यः पापग्रहेणान्वितः, नवमभावश्च पापयोगदृष्ट्यायुतश्चेत् पृच्छकस्य पितृदोषेण सन्ततरेभावः। तातस्य मृतेरनन्तरं भवति सन्ततिः। पूर्वोक्त त्रयोग्रहाः सबलाः स्युः, परन्तु पापयोगान्वितः चन्द्रः यद्वा चतुर्थभावे पापानां योगः, चतुर्थभावोपरि पापानां दृष्टिर्वा यदि स्यात्तदा मातुः दोषेण सन्ततेरभावः। इहाऽपि पृच्छकस्य मातुः मरणादूर्ध्वं प्रजासम्भवः भवतीति विजानीयात्।

## १.११ भूतोदयवशात् सन्ततेः चिन्तनविधिः

सन्तानप्रश्नसमये तत्कालोदयलग्ने वायुभूतोदयो भवति चेत्– पितृणां शापेन सन्ततेक्षयः। अग्निभूतोदयेन देवताशापम् आकाशभूतोदयेन पितृशापदेवतापाच्च। यदि भूतद्वयोदयः युगपद् सम्भवति अथवा जलतत्वोदयः भवति तर्हि शीघ्रं सन्ततिं प्राप्नोति पृच्छकः।

लग्ने सूर्यहोराया उदयः प्रश्नकाले च श्वासस्य गतिः वामभागे यदि स्यात्, लग्नगत-चन्द्रस्य होरा श्वासस्य गतिः दक्षिणभागे यदि स्यात्, आरूढ लग्न युग्मराशिकं लग्नं स्यात्, तात्कालिकं लग्नम् ओजराशेर्लग्नं भवेत्, प्रश्नारूढलग्नस्य पञ्चमभावाधिपतिः यः वर्तते स एव जातकेऽपि पञ्चमभावाधिपतिर्भवेत्, प्रश्नलग्नात् यः पञ्चमभावेशः जातके यः पञ्चमभावेश अनयोर्द्वयोरपि योगः, परस्परं दृष्टिः, केन्द्रस्थितिः, एभिर्लक्षणै अचिरेण पुत्रलाभो वाच्यः। किञ्च प्रश्नकालिकगुरूः यस्मिन् नक्षत्रे वर्तते तन्नक्षत्रस्य कृते विहितः यः वृक्षः वर्तते स वृक्षः तत्समये फलवति सति शीघ्रं सन्ततिर्भवतीति आदेश्यः।

सूक्ष्मरूपेण कृतस्य सूर्यचन्द्रगुरूणां स्फुटस्य योगम् एकत्र कृत्वा तद्योगस्फुटस्य नवमांशं विलोक्य मन्दिस्फुटराशेः नवमांश च परिगणय्य अनयोः द्वयोः अंशकयोः परस्परं समसप्तकः नवमपञ्चमः, पञ्चमनवमो वा यदि स्यात्। अथवा लग्नाधिपस्य पञ्चमाधि पस्य च स्फुटं संयोज्य तद्योगस्फुटराशितः यद्वा तन्नवमराशितः त्रिकोणे गुरूवर्तते चेत् शीघ्रं भवति सन्ततिः। अस्मिन्नेव योगे गुरूः वर्तमानराशितः अथवा तन्नवमांशरशितः 5-9 स्थाने मान्दिर्विद्यमानश्चेत् तदानीमपि शीघ्र भवेत् सन्ततिः।

आरूढलग्नस्य कृते कुजस्य दृष्टिः यदि स्यात्तदा इदानीं गर्भसम्भवलक्षणं वाच्यम्। आरूढलग्नस्य कृते कुजस्य दृष्टिः न विद्यते चेत् रक्ताधिक्यात् इदानीं स्त्रीयाः कृते गर्भ सम्भवलक्षणं नास्तीति चिन्तनीयम्।

प्रश्नकालिकमान्द्याश्रितराशितः त्रिकोणे पृच्छकस्य जन्मकालिक सूर्याष्टकवर्गबिन्दवः यस्मिन् राशौ आधिक्येन वर्तन्ते तद्राशौ चारवशात् सूर्यस्य आगमनसमये सन्तानप्राप्तेः कालेति प्रवदेत्। मान्द्याश्रितराशेः त्रिकोणराशौ चन्द्राष्टकवर्गबिन्दुसंख्याधिक्यं यस्मिन् राशौ वर्तते तद्राशौ चन्द्रस्यागमनसमये सन्ततेर्लाभः। जातकस्य गुर्वष्टकवर्गे बिन्द्वाधिक्यं यत्र वर्तते तद्राशिः मान्द्याश्रितराशितः त्रिकोणराशिः सन् तत्र गुरूः चारवशाद् सम्प्राप्ते सति तत्समये

सन्तानलाभः, लग्ननवांशराशितः त्रिकोणे गुरोः चारवशाद् आगमनसमये सन्ततेर्लाभो वाच्यः।

अथ गर्भसूचकप्रश्नमुच्यते। तद्यथा-

गर्भोत्पत्तिनिमित्तेन स्त्रीभिः प्रश्ने कृते सति आरूढलग्नात् प्रश्नलग्नाद्वा अथवा छत्रराशौ वा यद्यस्ति राहुः तर्हि उदरे गर्भमस्तीति वदेत्।

प्रश्नकालिकचन्द्रात् लग्नाद्वा 5-7-9 भावेषु गुरूर्विद्यमानश्चेत् यद्वा पूर्वोक्तान् भावान् गुरूर्यदि विलोकयति चेत्तदा साम्प्रतम् इयं गर्भिणी वर्तते। 'यत्र क्वाऽपि स्थितः चन्द्रः शुभयुक्ते तु गर्भिणी स योषित्' इत्यभिप्रायः विलोक्यते। तस्याऽपि समन्वयः प्रश्नकाले कार्यः। प्रश्नकाले सूर्यचन्दयोः परितः परिधिः परिदृश्यमाणो भवेत्तदा गर्भवती अस्ति इदानीमिति भावः। तत्रापि सूर्यपरिधिः दिने विलोक्यते चेत् तद्वशात् पुरूषसन्तानं किञ्च चन्द्रपरिधिना स्त्रीसन्तानं वाच्यम्। (रात्रै प्रश्नः निषद्धश्चेदपि) अस्य परिधेरन्तः ग्रहाः परिदृश्यमाणाः स्युः तेषां पुस्त्री भेदेन सन्ततिं वदेत्।

ओजराशौ ओजांशके पञ्चमभावेशः स्यात् सः मान्द्याश्रितराशेः केन्द्रगतो भवेत् इदमेकं गर्भलक्षणम्। पञ्चमाधिपतिः शीर्षोदयराशौ यदि वर्तते चेत् ध्रुवं गर्भलक्षणं वाच्यम्। पञ्चमभावाधिपतेः नवांशकराशौ चन्द्रो वा राहुर्वा यदि वर्तते अथवा तयोः दृष्टि तद्भावे यदि स्यात्तदा इदानीं गर्भो न भवति। पञ्चमभावंशस्य अंशकराशिं कुजः विलाकेयति चेत् सम्प्रतं गर्भवती अस्ति। परन्तु देवगुरोः तत्र ईक्षणाभावे सति गर्भस्राव: भवति। स्थिरराशेः अधोमुखराशेर्वा पञ्चमभावेशस्य अंशको यदि भवेत् तत्र शनेः योगः दृष्टिर्वा स्यात्तदा न केवलं गर्भस्य अभावः अपि तु गर्भग्रहणयोग्यमार्तवमपि तस्यां युवत्यां नास्तीति भावः।

## १.१२ गर्भस्य चतुर्दशलक्षणानि, गर्भिण्या आसक्तिः, गर्भस्रावश्च

गर्भप्रश्नकाले गर्भिण्याः दर्शनं, अर्भकदर्शनं, घनरवस्य श्रवणं, विहगयोः द्वन्द्वयुद्धदर्शनं, दृष्टुः हस्त-भुज-पाद-नासिकाद्यवयवेषु कस्यापि चाकर्षणं, आरूढलग्ने शुक्र अथवा तदुपरि शुक्रेक्षणं, उद्यल्लग्ने शुक्रः तदुपरि शुक्रस्य दृष्टिः, आरूढलग्नत् उदयलग्नाद्वा पञ्चमे विद्यमानः शुक्रश्चेत्तदा गर्भोऽस्तीति ब्रूयात्। एषु चतुर्दशलक्षणेषु यद्येकोऽपि लक्षणं लक्षणद्वयं वा यदि विलोक्यते तदा गर्भलक्षणं वाच्यम्।

पुनरष्टौ गर्भसम्भवलक्षणान्याहुः। तद्यथा- मान्दिचन्द्रौ पञ्चमभावे विद्यमानौ स्याताम्

अथवा तयोर्युतिः कुत्रापि वा स्यात्, चन्द्रः भौनेन निरीक्षितः, शशिमंगलयोर्योगः, शुभाः धर्मभावगाः, पञ्चमेशः मान्दियोगे वर्तमानः, तस्योपरि मान्देः दृष्टिः, मान्दिचन्द्रयोः अंशकौ एकैव स्याताम्, त्रिकोणकेन्द्रदृष्ट्यादि सम्बन्धं तयोः स्यात्, एते योगाष्टकाः गर्भलक्षणसूचकाः सन्ति।

भूमिचक्रे गर्भिणीस्थितराशेरधिपस्य यः रसः प्रोक्त स रसः गर्भिण्याः दौर्हृदमस्तीति आदिशेत्। तथा च

**''इन्द्रियार्थांस्थु यान् यान् सा भोक्तुमिच्छति गर्भिणी।**

**गर्भाबाधाभयात्तांस्तान् भिषगाहृत्य दापयेत्॥**

**ता प्राप्तदोर्हृदापुत्रं जनयेत गुणान्विताम्॥'' इति।**

यदि राशीशः दुर्बलश्चेत्तदा तद्रसात् गर्भिण्याः रोगो वाच्यः। राशीशस्य वासभूमितत्सम्बन्धीकारकवस्तूनि तस्यां दोर्हृदमस्तीति वदेत्।

प्रश्नकालिक-समये मध्ये अन्त्ये च झटिति कस्यापि दूरगमनम्, अन्येन केनापि प्रश्नस्थाने द्रुतगत्या आगत्य गमनं, कर्णादितः मलपरित्यागः, पृच्छकेन प्रदत्तताम्बूले पञ्चमदलस्यच्छेदः, ताम्बूलपत्रे क्रिमिकीटादीनां शवस्य व्यासङ्गः श्चेति एतानि पञ्चलक्षणानि गर्भस्रावसूचकानि सन्ति।

अत्र पुनः गर्भस्रावसूसूचकयोगचतुष्टयमाहुः। तद्यथा -

1. लग्नात् केन्द्रभावे सूर्यभौमौ वर्तमानौ भवेताम्, अष्टमभावे कोऽपि ग्रहः वाक्पतिः केन्द्रं विना यदि तिष्टेत्।
2. केन्द्रस्थानेषु चन्द्रः, केन्द्रस्थानादन्यत्र गुरूः, अष्टमे पापग्रहः यदि स्यात्।
3. चन्द्रः लग्नगतः एकोनविंशतितमे द्रेष्काणे यदि पापग्रहो स्यात्,
4. केन्द्रे गुरूः, अष्टमे कुजः, लग्ने शनिश्च यदि स्यात्। अमी योगाः गर्भच्छिद्रदाः सन्ति।

प्रश्नकालिकचन्द्रसूर्ययोः परितः परिधिः यदि दृश्यते स्त्रीणां गर्भनाशो भवेदिति ज्ञानप्रदीपिकाकारोऽपि वक्ष्यति।

## १.१३ पुरूषस्त्रीचिन्तनविधिः

लग्नात् ओजराशौ चन्दः स्थिते सति पुंजन्मकरः भवति। लग्नाद्युग्मराशौ चन्द्रो वर्तते चेत् स्त्रीजन्मकारको भवति। प्रश्नसमयं यावत् गतनक्षत्रवारचन्द्रराशीनां संख्यायाः सम्पूर्णयोगवशात् या संख्या लभ्यते सा संख्या ओजसंख्यायद्यस्ति तर्हि पुंजन्मकरः, युग्मसंख्या यद्यस्ति तर्हि अङ्गनाजननमिति वाच्यः।

प्रश्नलग्नात् 3-9-10-11 एषु भावेषु यस्य कस्यापि भावे सूर्य अथवा शनिः स्थितश्चेत् पुत्रजननं स्यात्।

मेषमिथुनादि-ओजस्थानगतास्सर्वे ग्रहाः स्युः तदानीं पुत्रस्य सम्भवः। सर्वे ग्रहाः समस्थानगताः स्युः तर्हि पुत्री न संशयः।

लग्नस्य सप्तवर्गाः पुरूषवर्गे स्थिताः वीर्योत्कटैः पुंग्रहैरवलोकिताः स्युः तर्हि पुरूषजननम्। सप्तवर्गाः स्त्रीवर्गागाः वीर्ययुताभ्यां चन्दशुक्राभ्यां विलोकितश्चेत् स्त्रीजन्म भवति। बुधः लग्नगतश्चेत् गर्भसंस्था स्त्री अस्तीति वदेत्।

लग्नात् पञ्चमलाभोपगतैः सौम्यैर्वशात् स्त्री गर्भिणीति वक्तव्या। ओजराशिगतं लग्नं ततः विषमर्क्षगतः गुरूरविचन्द्राः स्युः पुरूषप्रजां गर्भे कुर्युः।

युग्मराशिगताः रविचन्द्रगुरुवः लग्नं च युग्मराशिगं स्यात्तदा स्त्रीशिशुर्वाच्यः। मिश्रोपगतैः बलाधिक्यात् पुंस्त्रीविभागं वाच्यम्। लग्नाद् विषमर्क्षदः सौरोऽपि पुत्रजन्मदः प्रोक्तः।

पुनः गर्भे पुंस्त्री भेदनिर्णयप्रकरः उच्यते। तद्यथा- विषमर्क्षे बलिनौ गुरूसूर्यौ भवतः तौ पुंजन्मकारिणौ प्रश्ने। युग्मर्क्षगताः चन्द्रशुक्रभौमाः स्त्रीजन्मकारिणः भवेयुः।

लग्नात् विषमभावेषु शनिः विद्यमानश्चेत् सुतस्य जननम्। लग्नात् समभावेषु मन्दः वर्तते चेत् स्त्रीजननम्। शनिः ओजभावे प्रबले सति प्रश्नः यदि स्यात्तदा शीघ्रं विवाहसिद्धिर्भवति। युग्मभावे शनिर्विद्यते चेत् विवाहस्य असम्भवं वाच्यम्।

प्रश्ने सप्तमभावे रविकुजशनिगुरवः यदि विद्यमानाः ते पुंजन्मकराः स्युः। पूर्वोक्तग्रहेतराः यदि द्यूनभावे स्थिताः स्युः तदानीं स्त्रीजन्मकराः भवेयुः। शनिः लग्नगतश्चेत् स्त्रीजन्मकरो भवति।

वराङ्गादीनि कालपुरूषस्य अवयवाः ये कथिताः तेषु शरीरावयवराशिषु पृच्छकः

ओजराशेः स्थानं दक्षिणहस्तेन दक्षिणभागे संस्पृशति चेत् पुरूषजननम्। पृच्छकः युग्मराशेः स्थानं वामहस्तेन वामभागे संस्पृशति चेत् स्त्री जन्म वाच्यम्। मिश्रे सति गर्भः मृतिभाग् भवेत्। तत्र ओजराशिः शिरः, मुखम् युग्मः, उरः ओजः, हृदयम् यग्मः, एवं क्रमेण विजानीयात्।

तत्रैव यमलत्वादिविशेषं कथ्यते प्रश्ने। तद्यथा-

लग्नम् आरूढस्य नवांशकश्च उभौ युग्मराशिकौ स्यातां तदा कन्यकाद्वयस्य जननं भवति। स्त्रीग्रहदृष्टिः लग्नभावे स्यात् लग्नारूढनवांशकोऽपि ओजराशेर्यदि स्यात्, किञ्च पुंग्रहाणां दृष्टिः तत्र स्यात्तदा पुरूषदृयस्य जन्म भवति।

लग्नात् केन्द्रत्रिकोणे जीवे संस्थिते सति पुरूषो भवेत्। गर्भप्रसूतिचिन्तायां संशयः उदीयमाने सति यद्यद्दृष्टं श्रुतं च शकुनं तत् बुध्वा फलं प्रवदेत्।

गर्भप्रश्नकाले पुरूषाणाम् अवलोकनं, पुंस्त्वविषयकविषयाणां कथाश्रवणं, पुरूषराशेरारूढराशिः तत्र पुंगहाणां दृष्टिः योगो वा स्यात्, पृच्छकानां स्थितेः दिशा तावत् पुंसूचक दिक्षु स्यात्, (पूर्वदक्षिण पश्चिमोत्तरञ्च ओज दिशाः) (विदिशा युग्मदिशाः) प्रश्नस्थाने आनीतवस्तूनां संख्या ओजसंख्याका भवेत्, आनीय स्थापितवस्तूनां स्थितिः दक्षिणभागे च वर्तते चेत्तदा एते पुंजन्मकारकाः प्रोक्ताः। पूर्वोक्तलक्षणस्य वैपरीत्यं विलोक्यते तर्हि स्त्री जननं वाच्यम्।

पृच्छकेन मूर्ध्नि दक्षिणाङ्गे वा स्पर्शनं, लग्नांशकः पुरूषराशेरंशे स्यात्, किञ्च दिवासंज्ञकराशेरंशे भवेत्, शनिबुधौ बलिनौ लग्नगतौ स्याताम् अथवा ओजराशिगतौ स्याताम्, इमानि लक्षणानि पुरूषजननसुचकानीति निरूपणीयानि। अन्यथा अङ्गनायाः जननं वाच्यम्।

अत्र आधानकालवशात् प्रश्नलग्नाद्वा स्त्रीपुरुषविभागलक्षणमाह। तद्यथा-

औजराशौ ओजनवांशकेषु बलयुक्तैः लग्नसूर्यगुरूचन्द्रैः पुरूषस्य जन्म प्रवदेत्। युग्मराशिषु युग्मांशसहितै लग्नार्कगुर्विन्दुभिः स्त्रीजन्मप्रवदेत्। अत्र लग्नं देहः, सूर्यः आत्मकारकः, गुरूः जीवः, चन्द्रः मनः। अत एतैरेव प्राधान्येन पुंस्त्रीविभागः कर्तव्यः। लग्नाद्विषमराशौ लग्नतृतीयपञ्चमसप्तमनवमैकादशभावेषु स्थितौ गुर्वर्कौ पुरूषं जनयतः। पुरूषग्रहत्वात् विषमभाववशादेव एतौ पुंजन्मकरौ भवतः। लग्नाद्युग्मभावस्थितौ शशिशुक्रौ स्त्रियं जनयतः।

वक्रश्च युग्मे स्त्रियं करोति। स्वतः पुरूषग्रहोऽपि युग्मराशिस्थित्या शोणिताधिक्यद्योतकत्वात् स्त्रियं जनयति। उभयराश्यंशगता तावेव गुर्वर्कौ शशिसितौ च बुधवीक्षणवशात् क्रमशः पुरूषद्वयं स्त्रीद्वयं च जनयतः।

लग्नं विहाय विलग्नात् ओजभावगतः शनिरपि पुरूषजन्मकरो भवति। जन्मकारक ग्रहाणां लग्नात् स्थितिः, बलाबलम्, ओज-युग्मकारकत्वादीन् अवलोक्य पुरूषो अङ्गना वा वाच्या।

गर्भिणीप्रश्ने ओजर्क्षादिश्लोकद्वये कथित पृथक् पृथक् चतुर्दशपुंस्त्रीजन्मलक्षणेषु ओजसंख्यायाः लक्षणानि यद्यधिकमागतश्चेत् निश्चयेन पुंजननं वाच्यम्। वराटिकाभिः स्थानद्वये इदं लक्षणं संगणय्य बाहुल्येन आगतस्य स्त्रीजन्मलक्षणेन स्त्री जननं ब्रूयात्।

प्रथमश्लोकस्य आदौ अर्धे अष्टौ-अष्टौ लक्षणानि प्रोक्तानि। तृतीयपादे द्वे द्वे लक्षणे, अन्त्ये त्रीणि त्रीणि लक्षणानि, द्वितीय पद्ये एकैकं इत्थं 8.2.3.1 योगवशात् चतुर्दश पुंलक्षणाानि तथैव चतुर्दश स्त्रीलक्षणानि ओजर्क्षादिपद्यद्वये कथितानि। एतदुक्तम्। तद्यथा-

**''ओजर्क्षे पुरूषांशकेषु बलिभिः लग्नार्कगुर्बिन्दुभिः**
**पुंजन्मप्रवदेत् समांशक सहितैः युग्मेषु तैर्योषिताम्।**
**गुर्वर्कौ विषमे नरं शशिसितौ युग्मे स्त्रियम्**
**द्व्यंशस्था बुधवीक्षणाच्च कुर्वन्ति पक्षे स्वके॥''**
**''विहाय लग्नं विषमर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात्।**
**प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरूषोऽङ्गना वा॥''** इति।

एकस्मिन् चिन्त्यविषये षड्लग्नानि चिन्त्यानि। अतः सर्वत्र लग्नशब्देन आरूढ एव गृह्यते। राशि शब्देन उदयलग्नम् अत्र कथ्यते। अनयोर्मध्ये बलाबलं परीक्ष्य फलं वदेत्। पूर्वं वराहमिहिराचार्याः विहायलग्नम्' इत्यनेन वाचा अयमेव अभिप्रायं सूचयन्ति। अतः प्रश्ने उदयारूढयोः बलाबलं सम्यक् विचार्य पुंस्त्रीजननं वक्तव्यमित्याशयः। अतः ओजराशौ अजराशेर्नवंशे पुमान् जायते इत्यस्याऽपि ध्वनिः भवति। युग्मराशौ युग्मराशेर्नवांशे वधूः जायते इत्यपि चिन्तनीयः।

पुनः यमलजननलक्षणं प्राहुः। तद्यथा-

लग्नम् आरूढस्य च नवांशौ युग्मराशौ संस्थितौ, स्त्रीग्रहयुतौ दृष्टौ वा सूचयेतां स्त्रीद्वयम्। अत्र स्त्रीग्रहत्वात् युग्मराशिवशादेव स्त्रियं जनयत इत्यभिप्रायः। एतद्विपरीतलक्षणं दृश्यते चेत् पुरूषद्वयम् जनयत इति सारः।

प्रश्न काले पुरूषराशैः अङ्गस्पर्शं दक्षिणभागे दक्षिणहस्तेन संस्पर्श्यते चेत् पुमान् सूचकः। पृच्छकेन प्रश्नस्य समये यग्मराश्यङ्गानां वामहस्तेन संस्पर्शनं क्रियते चेत् व्यत्ययात् स्त्रीयाः जननसूचकः।

दक्षिणहस्तेन वामाङ्गस्पर्शने सति मृतिभाग् भवति गर्भिणी। वामहस्तेन दक्षिणाङ्गस्पर्शने सति गर्भिण्याः पत्युः मृतिः भवति।

## १.१४ प्रसवकालः मान्दिवशात्प्रसवकालज्ञानं, वर्गचतुष्टयविवरणञ्च।

प्रसवकालचिन्तनप्रश्ने तत्कालिकलग्नस्फुटस्य राशीन् विहाय अंशान् कलात्मकं कृत्वा त्रिभिर्गुणयेत्। गुणनफलं पञ्चाशद्भिः भक्तश्चेत् लब्धिर्भवति राशिः। पुनः शेषस्य कृते त्रिंशद्भि संगुण्य पुर्वोक्त पञ्चाशद्भिः हरेत्। या लब्धिरायाति स भागात्मकं फलम्। पुनः षष्ठ्या संगुण्य पञ्चाशद्भिः भाजयेत्। यत्-फलं लभ्यते तत्कला। पूर्वं यत् राश्यात्मकं मानं त्यक्तं तन्मानं राशिस्थाने योज्यम्। राशिस्थाने द्वादशभिः अधिकं वर्तते चेत् चक्रात् विशोधयेत्। इदमेव प्रसवकालस्य सूर्यस्फुटम्।

एतेन मासदिनघट्यादयश्च ज्ञातुं शक्यन्ते प्रसवस्य। अथवा प्रश्नकालस्य सूर्यस्फुटंम् अष्ठोत्तर शतैरभ्यस्तम् अंशकलाः क्रमशः राशिस्थानगतान् त्रिंशतारोप्य भागदीन् षष्ट्यारोपयेत्। एवमारोप्यस्थिते फले राशेः स्थाने चक्रादधिके द्वादशभिः अपोह्य शिष्टं यत्फलं लभ्यते तदेव प्रसवकालिकं सूर्यस्फुटम्। अथवा लग्नस्फुटस्य राशीन् विहाय अंशकलाः चन्द्रस्फुटराशौ संयोज्य नवभिः गुणयेत्। तेन नवांशस्फुटं लभ्यते। इदमपि प्रसवकालिकं सूर्यस्फुटम्। इत्थं प्रसवकालिकं सूर्यस्फुटं त्रिविधं प्रोक्तम्। जायमानप्रसवः दशमे मासि भवति। अतः पूर्वोक्त तादृशी त्रिस्फुटे यत् स्फुटं सामीप्यं भजते तदशात् प्रसवस्य कालस्य परिगणना कार्या।

अथ प्रसूतिकालज्ञानार्थं कक्षाक्रमः वर्ण्यते। एकराशौ अष्टौ कक्षाः स्युः। कक्षैकस्य कृते त्रयो अंशाः 45 कलाः। प्रथमकक्षायाः कृते प्रत्यहं अधिपः शनिः भवति। द्वितीया या

अस्ति तस्या अधिपः बृहस्पतिः। तृतीयायाः कृते कुजः, चतुर्थकक्षाया सूर्यः, पञ्चमकक्षायाः शुक्रः षष्ठकक्षायाः बुधः, सप्तम कक्षायाः चन्द्रः, अष्टम-कक्षाया अधिपत्यं लग्नस्य। इत्थं कक्षाधिपत्यं प्रोक्तम्। उद्यलग्नस्थितकक्षायाः अधिपस्य द्वादशांशराशौ शीतगोः विद्यमानसमये प्रसूतेर्लक्षणं वदेत्। तत्समयः प्रसववेदनायाः प्रारम्भकालः। तन्नवांशे चन्द्रस्यागमनवेलायां प्रसवः। यद्वा कक्षाधिपस्य त्रिशांशाधिपः यस्मिन् राशौ प्रश्नकाले वर्तते तत् भवनस्य लग्ने प्रसवः। कक्षपाधिपस्य होरा यद्यस्ति सूर्यस्य तदा दिवा जन्म भवति। कक्षाधिपस्य होरा यदि चन्द्रस्य स्यात्तदा रात्रौ प्रसवः।

चन्द्रापेक्षया चन्द्रस्य द्वादशांशराशेरधिपस्य बलाधिक्ये सति चन्द्रस्फुटस्य राश्यात्मकं मानं हित्वा केवलं भागकलायाः मानं द्वादशभिस्संगुण्य राशिभागं लिप्तिकाश्च कृत्वा तत्र चन्द्रो वर्तमान समये प्रसवः। पुर्वानीतं यत् स्फुटं तत्स्फुटे आद्यद्रेष्काणे चन्द्रः यद्वा मध्यद्रेष्काणगो वा स्यात् तत्स्फुटराशीतः पञ्चमराशौ चन्द्रस्यागमनसमये प्रसवः। पूर्वानीतं फलं अन्त्यद्रेष्कागं यदि स्यात् तदा तद्राशितः नवम राशौ चन्द्रस्य आगमनकाले प्रसवः भवति। चन्द्रस्य द्वादशांशाधिपतेरपेक्षया चन्द्रस्यैव बलाधिक्ये सति प्रश्नकालिकचन्द्रस्य द्वादशांशराशिः यावान् संख्याको वर्तते तावान् राशौ अथवा मेषात् तावान् राशौ चन्द्रः विद्यमानसमये प्रसूतिर्वाच्यः।

अधुना मान्दिवशात्प्रसवकालः कथ्यते। तद्यथा- चन्द्रस्फुटस्य राश्यात्मकं मानं विहाय भागकलादीन् अष्टोत्तरशतेन संगुण्य गुणनफलस्य कृते षष्ट्या त्रिंशता च तष्टितं क्रियते चेत् राशिभागकलाः भवन्ति। तद्राशिः ततः पञ्चम अथवा नवमराशिर्वा प्रश्नकाले अधोमुखराशिर्भूय तत्र हिमांशोरागमनकाले प्रसवः। तत्कृते गुलिकस्य योगः दृष्टिर्वा स्यात्तदा निश्चयेन प्रसवं वदेत्। लग्नचन्द्रयोः योगस्फुट नक्षत्रे चन्द्रस्य आगमनवेलायां प्रसवः। अयं योगस्फुटराशिः निशाबलिराशिश्चेत् चक्रतः पूर्वानीतस्फुटं विशोध्य अवशिष्टराशिस्फुटस्य नक्षत्रे चन्द्रस्यागमनसमये प्रसवो वाच्यः।

चन्द्रस्फुटलग्नस्फुटयोर्योगवशात् यद्योगस्फुटं लभ्यते तत् स्फुटस्य राश्यात्मकं मानं विहाय भागकलाश्च द्वादशभिः संगुण्य आगतस्य स्फुटस्य नक्षत्रे अथवा दशमनक्षत्रे चन्द्रस्यागमनवेलायां निःसन्देहेन प्रसवो वाच्यः। चन्द्रस्य द्वादशांशराशितः पञ्चमराशौ यद्वा

नवमराशौ चन्द्रो यदा आयाति तदा प्रसवः। पूर्वोक्त प्रकारद्वयेऽपि यद्येकव नक्षत्रं राशिश्च आगतश्चेत् प्रसूतिर्भवति निश्चयेन।

लग्नात् द्वादशांशराशिः द्वादशांशराशेः नवमांश राशि एतौ प्रसूतेः लग्ने भवतः। मान्देः वर्गचतुष्टयादिसम्बन्धः तद्राशेः कृते वर्तते चेत् अवश्यम् इदं प्रसवलग्नम्। प्रश्नस्य दिने रात्रौ वा मान्दिः यस्मिन् राशौ उदयति तद्राशिः तस्य नवमांशराशिः तयोः त्रिकोणराशि एते सर्वे प्रसवलग्नसूचकाः सनि। वर्गचतुष्टयस्य वर्णनम् अग्रे क्रियते।

सूर्यस्य द्वादशांशराशौ तत्त्रिकोणराशौ वा रविः विद्यमानमासे प्रसवो जायते। उदयलग्नद्वादशांशराशिः द्वादशांशस्फुटस्य नवमांशराशिश्च इमे प्रसवलग्ने स्तः। अनयोर्लग्नयोर्मध्ये बलीलग्नमस्ति प्रसवलग्नम्। अत्र गुलिकराशेः त्रिकोणराश्याः चतुर्वर्गसम्बन्धवशात् प्रसवलग्नस्य निर्णयः कार्यः।

पूर्वोक्तं वर्गचतुष्टयं प्रतिपाद्यते। तद्यथा–

नवभिर्गुणितस्य ग्रहस्फुटस्य कृते एक वर्गो भवति। तद्वर्गस्य कृते नवांशस्फुटमिति उच्यते। ग्रहस्फुटस्य कृते एकाशीतिसंख्यया गुणिते सति नवनवांशकस्फुटं भवति। नवांशस्फुट द्वादशभिः संगुण्यते चेत् नवांशद्वादशांशस्फुटम्। नवांश द्वादशांशस्फुटस्य कृते गुणनसमये पृथक् स्थापित राशीन् पुनः योजयेत्। ग्रहस्फुटराशि त्यक्त्वा भागकलाः द्वादशभिः संगुणितराशेः कृते योजयेत्तदा द्वादशांशस्फुटो आयाति। इदं वर्गचतुष्टयम्।

प्रश्नकाले आरूढलग्नात् त्रिकोणे यो राशिरधो मुखं वर्तते तद्राशिगते चन्द्रे प्रायेण प्रसवः भवतीति एतत् परमं रहस्यम्।

## १.१५ सन्तानप्राप्तये अभिहितानि प्रायश्चित्तनि

सन्तानविषयकप्रश्ने ग्रहाणां दुःस्थित्या सन्तान विरोधिषु पूर्वोक्तग्रहेषु सत्सु तत्प्रतिक्रियाः कर्तव्याः भवन्ति। अतो प्रायश्चित्तानि कथ्यन्ते। तद्यथा–

प्रश्ने ओजराशौ सूर्यशनी अनभीषृस्थाने शशियुतौ स्यातां तदा सन्तत्यर्थं पित्रपूजनं कार्यम्। तत्र युग्मराशौ सूर्यः स्थिते सति क्षेत्रेषु पिण्डप्रदानं कार्यम्। शनिः युग्मराशौ अनिष्ट राशिगतश्चेत् मृष्टान्नभोजनं कारयेत् पित्रप्रीतये। सूर्यः ओजयुग्मराशिषु अनिष्टस्थानस्थिते

सति रूद्रसूक्त-पुरूषसूक्त-वेदपारायणादीनां करणेन अनिष्टस्योपशमः भवति। विशिष्य पवमानसूक्तमपि विहितमस्ति सन्ततेरवाप्तये। इत्थं ग्रहाणां दुःस्थित्या सन्ततेरवरोधस्सम्भवतीति विलोक्यमाणे सति तत्तद्ग्रहाणां प्रायश्चित्तनि विशेषेण कथयन्ति।

प्रश्ने सूर्यचन्द्रयोः दुःस्थित्या अनपत्यत्वं संदृश्यमाणो भवति तदा तत्परिहारार्थं वक्ष्यमाणविधिना प्रायश्चितं कारयेत्। तद्यथा- तत्र यदि चन्द्रः सन्तते दोषकतृकश्चेत् सन्ततेः प्राप्तये गयादिक्षेत्रेषु श्राद्धं कारयेत्। देव्याः प्रीत्यर्थं नृत्यगीतवाद्यादिकं च कुर्यात्। सूर्यचन्द्रयोर्मध्ये कस्यापि पापयोगश्चेत् दुमृतेर्वशात् प्रेतस्य सद्गतिर्नाऽभवत्। अतः तत् शमनार्थं क्षेत्रपिण्डप्रदानं नृत्यगीतादीनि च अवश्यं कर्तव्यानि।

अनपत्यदोषकृदौ कुजबुधौ स्यातां तद्धोषपरिहाराय प्रायश्चितं प्रोच्यते। तद्यथा-कुजः प्रश्नकाले ओजराशौ दुःस्थानगतत्वात् सन्तते र्दोषकृदित्यवलोक्यते सति तत्परिहाराय स्कन्दार्चनपुरः स्सरं षड्रसोपेतभोजनं विप्राणां कृते कारयेत्। यदि बुध अनिष्टस्थानगतः सन्ततेर्दोषकृदिति दृष्टश्चेत् विष्णोः कृते पूजा, पञ्चामृताभिषेक- पायससमर्पण-ब्राह्मणभोजन-सन्तानसौभाग्यसूक्तजपश्च सन्तान सिद्धिप्रदत्वेन विहिताः सन्ति।

प्रश्ने गुरू ओजराशौ अनिष्टस्थानगतः यदि सन्ततेः प्रतिबन्धकः वर्तते चेत् कल्याणादिघृतं (पञ्चगव्यघृत-सुकुमारघृतञ्च) पुरूषसूक्तेन सन्तानगोपालमन्त्रादिना अथवा सन्तान प्रदमन्त्रादिना अभिमन्त्र्य गर्भदोषहरणाय औषधा रूपेण प्रदापयेत्। गणहोमदि होमकर्माणि प्रोक्तानि। गुरूः युग्मराशिगः सन् सन्तानस्य कृते दोषप्रदश्चेत् दम्पत्यौ सम्यक् शङ्करनारायणदेवं आराधयेत्। सहक्षसंख्याकब्राह्मणाभोजनेन समाराधयेत्।

अथ अत्र सन्ततेः कृते शुक्रकृतदोषस्य प्रायश्चित्तं कथ्यते। तद्यथा-

ओजराशौ अनिष्टस्थानगतः शुक्रः सन्ततेः दोषकृद् यदि स्यात्, तर्हि अपूपभक्ष्य-पायस-सुगन्धासुवाद्यादिना स्त्रीदेवताः सन्तोषयितव्याः। युग्मराशिगतशुक्रस्य अनिष्टदोषापनोदनाय धार्मदेवतापूजा-इष्टमन्त्रहोमपुरस्सरं पुरञ्चरणविधिाना तर्पणमार्जन-ब्राह्मणभोजनादीन् कारयेत्। किञ्च प्रजप्तघृतादीनां सेवनानि प्रायश्त्तिानि।

प्रश्ने ओजराशौ अनिष्टस्थाने स्थितराहुः सन्ततैर्दोषकद् स्यात्तदा सर्पबलिं कारयेत्। युग्मराशौ राहुः सन्ततेर्दोषप्रदो वर्तते चेत् नृत्यागीतादिना नागदेवतायाः सेवां कुर्यात्। उभयराशौ

स्थितः राहुः सन्ततेर्दोषप्रदश्चेत् सर्पप्रतिमाद्वयं विधास्य तत्पूजनं कृत्वा दानं दीयते चेत् अनपत्यदोषस्य निवृत्तिः भवति। पुत्रलब्धिश्च सञ्जायते।

**सन्तानतिथिस्फुटक्रमः**

सन्ततेः प्रश्ने सूर्योदयात् प्रश्नसमयं यावत् यातेभ्यः विघटीभ्यः पञ्चाशद्भि आप्तश्चेत् शेषं यल्लभ्यते सः राशिः। पुनः शेषं त्रिंशता संगुण्य पञ्चाशद्भिः विभजेत्तदा अंशाः लभ्यन्ते। पुनः शेषं षष्ट्या संगुण्य पूर्वोक्तसंख्यया विभजेत्तदा कलाः स्युः। राशेः स्थाने द्वादशभिरधिकमस्ति चेत् चक्रात् तष्टितं कार्यम्। यत् स्फुटं लभ्यते तत्स्फुटं राश्यैकस्य प्रमाणे विशोधायेत्। विशोधनसमये भागः अधिकं वर्तते चेत् द्वादशराशीन् संयोज्य तदनन्तरं विशोधयेत्। एतत्फलस्य कृते पञ्चभिस्संगुण्य राशिभागकलात्मकं क्रियते चेत् सन्तानरविस्फुटं भवति।

सूर्योदयात् प्रश्नसमयं यावत् यातेभ्यो विघटीभ्यः कृते पञ्चाशद्भिः संगुण्य राशि भागकलात्मकं कृत्वा तत्फलस्य कृते अष्टौ राशयः पञ्चदशभागाः योज्याः। चक्राद्धिकं भवति चेत् द्वादशेभ्यो अपनीय अवशिष्टं स्फुटं पञ्चभिः अभ्यस्य राश्यंशकलात्मकं क्रियते चेत् तत् सन्तानचन्द्रस्फूटं भवति। अन्यः क्रमः प्रश्नसमयस्य सूर्यस्फुटं पञ्चभिरर्गुणयेत्तदा सन्तानसूर्यस्फुटं भवति। प्रश्नकालिकं चन्द्रस्फुटं पञ्चभिर्गुणयेत्तदा सन्तानचन्द्रस्फुटं भवति। आरूढलग्नस्य बलाधिाक्यं वर्तते चेत् पूर्वोक्त क्रमे आद्यः क्रमः सन्तानस्फूटक्रमत्वेन परिगणनीयः। तात्कालिकलग्नस्यैव प्राबल्ये सति द्वितीयः क्रमः अनुरसरणीयः भवति। प्रश्नकालिकं चन्द्रस्फुटं पञ्चभिस्संगुणितं चेत् सन्तानचन्द्रस्फुटं भवति। तत्कालिकलग्नस्फुटं पञ्चभिस्संगुण्यते सन्तानरविस्फुटं च भवतीति केचन आचार्याः जगुः।

पूर्वोक्तसन्तानतिथिदोषवगात् प्रायश्चित्तं वर्ण्यते। तद्यथा- सन्तानचन्द्रस्फुटात् सन्तानसूर्यस्फुटं ऊनीक्रियते चेत् सन्तानतिथिर्भवति। पूर्वोक्तस्फुटद्वययोः सकाशादपि सन्तानतिथिस्फुटं कर्त्तुं शक्यते। इयं सन्तानतिथिः शुक्लपक्षे यद्यायाति तर्हि सन्ततिर्भवति। इयमेव तिथिः कृष्णपक्षे यद्यागता भवति तदा प्रायश्चित्तादिना भवति सन्ततिः। अत्र वक्ष्यन्ति केचित् विशेषम्। तद्यथा- सन्तानस्फुटवशात् या तिथिरायाति सा कृष्णपञ्चमीं

यावत् स्यात्तर्हि सन्ततिर्भवति। कृष्णषष्टिश्चेत् सुब्रम्मण्यसेवया भवति सन्ततिः। कृष्णसप्तम्यादि तिथिचतुष्के सन्तानस्फुटतिथिरायाति चेत् पुनर्विवाहेन भवति सन्ततिः। तत्र द्विजानाम् आराधनेन तेषां सन्तुष्टिवशात् भवेत् सन्ततिः। परन्तु सन्ततिः यौवनावस्थायां परिपूर्णतावसरे द्वितीयभार्यायां भवति। कृष्णैकादशी द्वादशी च यदि सन्तानतिथिर्भवेत्, द्वादशीहोमतः पुत्रसन्ततेर्लक्षणं विलोक्यते चेदपि गर्भस्रावो भवति। कृष्णत्रयोदशी चतुर्दशी च सन्तानतिथिरागतश्चेत् दत्तकपुत्रस्वीकारो कार्यः। सन्तान तिथिर्यदि अमास्यात्तदा दत्तकपुत्रस्वीकारः क्रियते चेदपि प्रयोजनं न विद्यते। कुद्धाः पितरः सन्ततेर्नाशकाः भवन्ति। अतः पित्रकोपात् सन्ततेरभावो अस्तीत्यभिप्रायः। तदर्थम् अष्टकश्राद्धं यद्वा पार्वणाश्राद्धाविधिना पितृणां प्रीतिम् उपपादयेत्। पैत्रककर्मलोपात् प्रायः सन्तव्यभावो भवति नृणाम्।

पूर्वानीतसन्तानतिथिस्फुटस्य तिथयः शुक्लकृष्णपक्षयोर्यद्रिक्तातिथयः स्युः ताः नाशुभदाः। शुक्लपक्षस्य रिक्तातिथयः सन्तानतिथित्वेन यद्यागताः स्युः तदा नूतनतया कृत आभिचारदोषवशात् सन्तानप्रतिबन्धाकदोषमिति प्रवदेत्। यदि कृष्णपक्षस्य रिक्तातिथयः सन्तानतिथित्वेन आगताः स्युः तर्हि पूर्वमेव शत्रुकृताभिचारदोषेण सन्ततेरभावः। चतुर्थी नवमी चतुर्दशी च रिक्तातिथयः। तत्रापि यदि सन्तान तिथिः कृष्णपक्षस्य चतुर्थिश्चेत् उत्तमजनै आभिचारस्य शान्तिर्विधेयः। नवमिश्चेत् क्रूरैः तस्योपशमनशान्तिं कारयेत्। चतुर्दशिश्चेत् नीचैः आभिचारशान्तिं विधेयम्। विष्टिकरणञ्चेत् सर्पशापम् ( तिभ्यर्धं करणम्) शुक्लपक्षस्य विष्टिकरणञ्चेत् इदमिदानीम् आगतं शापम्, कृष्णपक्षस्य विष्टिकरणेन बहोः कालात्पूर्वमागतं सर्पशापम्।

पक्षद्वये तिथिचतुष्टये विष्टिकरणं नियमेन आयाति। शुक्लपक्षस्य अष्टमीचतुर्दश्योः पूर्वार्धे, चतुर्थीएकमदश्योरूत्तरार्धे, कृष्णपक्षस्य सप्तमीचतुदस्योः पूर्वार्धे तृतीयादशम्योरूत्तरार्धे च नियतं विष्टिकरणं स्थास्यति तत्र सन्तानतिर्थवशात् तृतीयाचतुर्थीतिभ्योः विष्टकरणञ्चेत् उत्तमसर्पाणां कोपः, सप्तमीअष्टमीतिभ्योर्वशात् यद् विष्टिकरणमायाति तेन मध्यमसर्पाणां कोपः। पूर्णिमा अमावास्ययोः यत् करणं भवति तदृशेन अतिनीचसर्पाणां कोपवशात् सन्ततेः कृते दोषो जायते। उत्तमसर्पाणां प्रीत्यर्थं बलिहरणक्रिया कार्या।

तदितरनीचादिसर्पाणां कृते गानक्रियाबलिक्रियादिभिः सर्पशापस्य परिहारेण पृच्छकस्य कृते पुत्र लब्धिर्भवति।

इत्थं सन्तानतिथिभिः यत् लक्षणं खलु प्रोक्तं तत्रापि सम्प्रदायभेदो वर्तते। सोऽपि अत्र प्रतिपाद्यते। तद्यथा- प्रश्नकालिकसूर्यचन्द्रयोस्फुटं पञ्चभिः संगुण्य गुणनफलत्वेन आगतस्य चन्द्रस्फुटे रविस्फुटं प्रोज्झ्य शेषं सन्तानतिथिस्फुटं भवति। तिथिस्फुटानेयनवशात् या तिथिर्लभ्यते सा शुक्लपक्षस्य तिथिश्चेत् सन्ततेर्लाभः। सन्तानतिथिः शुक्लपक्षे प्रतिपदादिपञ्चतिथीषु यदि स्यात्तदा अल्पसन्ततिः भवति। सन्तानतिथिः षष्टीतः दशमीं यावत् स्यात् तर्हि मध्यमसन्ततिः, एकादशीतः पूर्णिमां यावत् एतासु तिथीषु सन्तान तिथिर्थदि भवति, तर्हि बहवः पुत्राः नाम बहुसन्ततेर्योगः।

परन्तु पूर्वानीतसन्तानतिथिस्फुटवशात् या तिथिः कृष्णपक्षस्य षष्टीं यावत् पञ्चतिथिषु स्यात् तत्सकाशात् सुतस्य प्राप्तये भार्यायाः संख्या वर्णयति। यदि सन्तानतिथिः कृष्णपक्षस्य प्रतिपत् द्वितीया च स्यावदा एकस्यां भार्यायामेव सन्ततिः। कृष्ण तृतीया यदिस्यात्तदा द्वितीयोद्वाहेन सुताप्तिः, चतुर्थिश्चेत् तृतीयविवाहेन, पञ्चमीतिथिश्चेत् चतुर्थविवाहेन कृष्णषष्टीतिथिश्चेत् पञ्चमविवाहेन सन्ततिः भवति।

यद्यपि प्रतिपत् तिथीतः प्रारभ्य पञ्चमीं यावत् सन्तानार्थं एतदृश एकाद्यपेक्षया बहुसंख्याकाः विवाहाः विहिताश्चेदपि प्रायश्चित्तादिविधिना सन्ततिर्भवति। षष्टीतः दशमीं यावत् महद्भिः कृतैः सुकृतिना सन्ततिर्भवति। एकादशीत अमां यावत् महद्भिः कृतैः सुकृतैरपि पुत्रावाप्तिं अन्ते भवेत् वा नवैति वक्तुमेव न शक्यम्।

अथ सन्तान तिथेर्वशात् दत्तकपुत्रस्वीकारयोगमाह। तद्यथा- पूर्वानीतसन्तानतिथिस्फुट-वशात् आगतातिथिः सप्तमिश्चेत् भ्रातुः पुत्रं दत्तकपुत्रत्वेन स्वीक्रियते। स्वगोत्रजं स्वीक्रियते दत्तकपुत्रत्वेन। नवमी चेत् अष्टमिश्चेत् दत्तकपुत्रद्वयस्य स्वीकारः क्रियते। तत्र विशिष्य द्वितीयः दत्तकपुत्रः साधुस्वभावयुतो भवति। दशमिश्चेत् भागिनेयः, एकादशिश्चेत् अन्यगोत्रोद्भवः भवति दत्तकपुत्रः। द्वादशिश्चेत् सर्वथा सन्ततेरभावो वाच्यः। किञ्च सर्वस्वं स्वजनैः हृतो भवति। सन्तानतिथिः त्रयोदशिश्चेत् उत्तराधिकारिणाम् अभावेन सर्वस्वं देवालयं विन्दति नाम देवस्वं भवति। चतुर्दशिश्चेत् सम्पत्तिं हरति नृपः यद्वा सर्वकारेण स्वीक्रियते। यदि

सन्तानतिथिः स्यात् अमावास्या तदा सन्ततेरभावेन यद्वा दत्तकपुत्रस्यापि अभावेन यथा कामम् अखिलैर्जनैः सर्वाणि ऐश्वर्याणि अपहृीयन्ते।

मुनिभिः सन्तानतिथिभेदन सन्ततेरवाप्तये परिहारोपायाः नृणां कृते अधुना उदीर्यन्ते। शुक्लपक्षे विष्टिकरणं रिक्तातिथियश्च अशुभाः। रिक्तातिथिषु यदि चतुर्थिश्चेत् पहिारत्वेन गणनाथहोमः कार्यः। नवमीतिथेः दुर्गार्चना कार्या। शुक्लचतुर्दश्याः कृते रूद्रस्य पूजनेन सन्ततेः सम्भवो वाच्यः।

पुनः प्रायश्चित्तविशेषमुच्यते-

अत्र सन्तानतिथिः पौर्णमासी यदि स्यात्तदा विष्णुक्षेत्रे पुरूषसूक्तजपः, वेदत्रयस्य पारायणं पूर्णिमायां ब्राह्मणभोजनं, नैमिषारण्यवासिनां शौनकादिऋषिभिः प्रोक्तपुराणप्रवचनं, अमृतमन्थन विभागे सुधांशोरत्पत्तेः कथाश्रवणपृभृत्यादिप्रायश्चितैः सन्तानोत्पत्तिः जायते।

सन्तानतिथिः कृष्णप्रतिपत्तिथिश्चेत् सन्तानगोपालमन्त्रेण गोपालकृष्णस्य सेवां कुर्यात्। सन्तानतिथिर्यदि कृष्णद्वितीया स्यात् खलु पञ्चगव्यघृतं गोपाल मन्त्रेण जाप्य तत्सेवनं कुर्यात्। इत्थं प्रायश्चित्तेन सन्ततेः प्राप्तिः भवितुमर्हति।

पुनः प्रकारान्तरेण शान्त्यादिना सन्ततिप्राप्तेरूपायाः कथ्यन्ते। तद्यथा- यदि सन्तानतिथिः कृष्णतृतीया आगतास्यात्तर्हि दुर्गार्चनं, चतुर्थीचेत् घृतगुढमधुयुक्तद्रव्यैः गणपतिहोमः, पञ्चमी चेत् इष्टदेवताराधनं, षष्टिश्चेत् सुब्रम्मण्य सेवा, सप्तमी चेत् शंकरनारायणसेवा, कृष्ण नवमी चेत् विप्रसहस्राणां भोजनादिना च सन्तानप्राप्तिः भवति।

पूर्वोक्तसन्तानतिथिः कृष्णदशमी यद्यागता स्यात्तदा गणहोमः, एकादशिश्चेत् वेदगिरौ, अमलक्षेत्रे पिण्डप्रदानं, द्वादशिश्चेत् द्वादशब्राह्मणश्रवणाराधनं, त्रयोदशिश्चेत् विजयबलिं देवालये विद्युक्तविधिना कारयेत्। उपर्युक्तक्षेत्रविशेषाः विशिष्य केरलप्रान्तीयानां कृते विहिताः सन्ति। तथापि तत्तद्देशानुगुण्येन क्षेत्रविशेषाः सर्वथा ग्राह्याः।

कृष्णचतुर्दशिर्यदि सन्तानतिथिश्चेत् सोमवासरे ब्राह्मणाराधनं, पित्रप्रीत्यर्थं पुण्यक्षेत्रेषु पिण्डप्रदानादि सत्कर्मणा अपत्याभावदोषस्य परिहारो भवितुमर्हति। सन्ततिश्च जायते।

सन्तानगुरोर्वशात् प्रश्ने जातके च फलचिन्तनक्रमे सम्प्रदायभेदाः सन्ति। पुनरपिऽत्र किञ्चित् लिख्यते।

लग्नस्फुटं पञ्चभिर्हतं यमकण्टकस्फुटेन सहितं चेत् सन्तानगुरोः स्फुटम् आयाति। इदं स्फुटं नवदोष युग्भवति चेत् कष्टेन पुत्रोद्भवः वाच्यः। सन्तानगुरोः नवांशराशिं शुक्रः पश्यति तच्च शुक्रस्य क्षेत्रं स्यात् यद्वा शुक्रस्य युतिः तत्रैव स्यात्, यद्वा भृगोः नक्षत्रस्य (भरणी-पूर्वा फग्लुनी-पूर्वाषाढा च) अंशे नवांशपतिस्यात्तदा पुनर्विवाहयोगस्य सूचकः। इदं दोषत्रयम्। तात्कालिकशुक्रस्फुटं पञ्चभिर्गुणितं चेत् सन्तानशुक्रस्फुटं भवति। अनयोः जीवशुक्रस्फुटयो अंशकादिसम्बन्धः यदि स्यात्, सन्तानशुक्रात् सप्तमभावे यावान् ग्रहाणां सम्बन्धः वर्तते तावान् संख्याविवाहाः भवन्ति। सन्तानशुक्रराशेरपेक्षया अंशराशे बलाधिक्ये सति प्रथमाभार्या या भवति तस्याम् अपत्याभावः, द्वितीयायां भवति सन्ततिः। शुक्रस्य राशेः बलाधिक्ये स्थिते सति द्वितीयविवाहानन्तरं प्रथमभार्यायामेव पुत्राप्तिर्वाच्यः।

सन्तानशुक्रस्य नवांशः नपुंसकग्रहयोर्नवांशश्चेत् अथवा तयोः युतिः विलोकनं वा स्यात् सन्तानशुक्रेण, तर्हि तृतीयोद्वाहेन पुत्रलाभं भवतीति। पुर्वं नवदोषानाम् उल्लेखः कृतः। ते च एते सन्ति गुलिक-विष्टि-गण्डान्त-विष-उष्ण-सार्पमस्तक-लाट-वैधृतिप्रभृतयो वर्तन्ते। तत्रापि त्रिदोष षड्दोष नवदोषश्चेति अनेके दोषाः प्रोक्ताः

सन्तानगुरूस्फुटस्य कृते यमकण्टकस्फुटं योज्यते चेत् सन्तानयोगस्फुटं भवति। एतेन सन्ततेः संख्यां ज्ञातुं क्रमः प्रोच्यते।

## १.१६ सन्तानसंख्याज्ञानक्रमः दत्तकस्फुटफलं सन्तानत्रिस्फुटञ्च

सन्तानयोगस्फुटे पञ्चलवाः भुक्ताः स्युः तर्हि भवति एकः पुत्रः। दशलवानां कृते अपत्यद्वयं, पञ्चदश लवानां कृते त्रयं विंशतिलवाः भुक्ताश्चेत् चत्वारि अपत्यानि पञ्चविंशतिलवानां कृते पञ्चसन्तानानि स्युः। त्रिंशद्भागानां कृते षट्पुत्राः। एतत् स्फुटे होराद्रेष्काणादिवर्गेषु कस्यापि वर्गत्रयं यदि वाक्पतेः स्यात् तर्हि षट्संख्याकसन्ततेरपेक्षया सन्ततिरधिकाः भवन्ति। सन्तानयोगस्फुटे तावत् वर्गत्रयापेक्षया यद्यधिकवर्गाः गुरोः स्युः तर्हि बहवः पुत्राः स्युः।

सन्तानयोगस्फुटस्य द्रेष्काणपतिः नीचे शत्रुक्षेत्रे वा स्थित्वा योगस्फुटस्य द्रेष्काणनाथः लवपञ्चके स्थितः सन् योगस्फुटोपि पञ्चमभागे स्थितश्चेत् प्रथमपुत्रस्य मरणं भवति।

एतादृशस्थितिः दशमभागे वर्तते चेत् द्वितीयपुत्रस्य मरणं भवति। एवं क्रमेण पञ्चदशभागे तृतीयपुत्रस्य, विंशतिभागेन चतुर्थस्य, पञ्चविंशतिभागेन पञ्चमस्य, त्रिशद्भागेन षष्टपुत्रस्यापि नूनं मरणं भवति। यद्योगस्फुटं वृषसिंहकन्यावृश्चिकराशेः स्फुटं स्यात्तर्हि सन्ततिर्नजायते।

योगस्फुटस्य वर्गत्रितपं नपुंसकग्रहस्य सम्बन्धेन युतश्चेत् यमलजननं वाच्यम्। नपुंसकग्रहयो वर्णत्रितयस्य बलाबलवशात् यमलस्य स्थितिं विनाशं च वदेत्।

साम्प्रतं दत्तस्फुटफलमाहुः। तद्यथा- बुधशनिपञ्चमेशानां स्फुटस्य योगं कृत्वा पञ्चभिस्सगुण्य लब्धं गुणनफलं दत्तस्फुटं भवति। एतत् स्फुटं दिनराशिगतं चन्द्रराश्यंशक अध्युषितो भवेत्। असद्ग्रहाणां तत्र यदि स्यात्तदा दत्तकपुत्रयोगः। (सिंहकन्यावृश्चिक तुलाधरकुम्भराशयो मीनश्च दिनराशय भवन्ति) (वृषभमेषचापकर्किमिथुनाः रात्रिराशयः) एतत् स्फुटस्य योगः रात्रिराशिगो (चन्द्रराशिशः) भवेत् सूर्यराश्यंशके व्यवस्थितः सन् पापानां योग दृष्टया च स्याद्यादि तदा दत्तकपुत्रयोगो न भवेत्।

यदि अस्मिन् पूर्वोक्त दत्तस्फुट दोषाणां नवकं सम्भवेत् तर्हि सन्ततिर्नभवेत् खलु। दत्तस्वीकरणादपि नूनं प्रयोजनं नास्ति।

सन्तानगुरोः राशेः त्रिकोणे मेषादिषट्केगुरूमान्दी स्यातां तौ सन्ततिप्रदौ भवतः। किञ्च तुलादिषट्के सन्तानगुरोः नवांशस्य त्रिकोणे मान्दिगुरू सुत प्रदौ स्यातम्। यमकण्टकगुलिकस्फुटयोगराशिवशात् पुंस्त्रीलक्षणं कथयेत्।

यमकण्टकस्फुटराशि ओजराशिर्वा भवतु युग्मराशिर्वा भवतु तत्र ओजांशः पुत्रप्रसूतिकृद् भवति। युग्मांशः कुरूते नारीम्। अत्र अंशस्यैव प्रधानता वर्तते।

**सन्तानत्रिस्फुटम्**

सन्तानजीव-यमकण्टक-सन्तानमान्दिस्फुटञ्च त्रीन् संयोज्य एकाशीत्या हन्यात्। पुनः गुणनफलं राशिभागकलात्मकं कृत्वा तदशात् गुणनफलस्य नक्षत्रं विलोक्य तन्नक्षत्रे, त्रिस्फुटात् त्रिकोणराशौ अथवा त्रिस्फुटनवांशराशौ वा चन्द्रो यदा आयाति तत्समये पुत्रसन्ततिर्भवति।

इत्थं पुत्रमृतिः सन्तत्यभावः सन्तान तिभ्यादिलक्षणं, तस्यदोषः, सन्तानदोषवशतः प्रायश्चित्तं, दत्तकपुत्रस्वीकारः, पुनर्विवाहः, एतत् सर्वम् अनेकधा संचिन्त्य पृष्टुः यथार्ह वदेत् मतिमान् दैवज्ञः।

दायादीनां सम्पदः तेषां लक्षणं, पुत्रदीनां सम्पदादयः, एते विषयाः तात्कालिकगुरू रविचन्द्रैरेव विलोकनीयाः न तु जन्मकालिकग्रहैः। गर्भप्रश्ने पुंस्त्रीविभागञ्च सम्यक् विचिन्त्यैव सुनिश्चयं कृत्वा वदेत्। इत्थम् शास्त्रान्तरानुसारेण सम्प्रदायभेदेन च विस्तारपूर्वकं ग्रन्थकृता सन्तान प्रश्ने अनेके भेदा उदीरताः सन्ति अस्मिन् अध्याये।

***

## प्रश्नावली

I. संक्षेपेण उत्तरं लिखित 7x5=35

1 अनपत्ययोगदत्तकपुत्रयोगयोः वर्णनं कुरूत?

2 सन्तनप्रश्नविधं वर्णयत?

3 क्षेत्रबीजगुणदोषचिन्तनक्रमं स्पष्टयत?

4 सन्तानत्रिस्फुटं नाम किम्? त्रिस्फुटं कुत्र उपयुज्यते?

5 गर्भस्य चतुर्दशलक्षणानि कानि?

II. विस्तरेण उत्तरं विलिखत 10x4=40

1 सन्तानप्रतिबन्धकयोगाः दत्तक पुत्रदानयोगाश्च के?

2 सन्ततेरभावयोग-पूर्णसन्ततिः सन्ततेः कालनिर्णयविधिं च विशदीकुरूत?

3 गर्भादानकालनिर्णयपुरस्सरं स्त्रीजातिचिन्तनक्रमं वर्णयत?

4 भूतोदयवशात् सन्ततेः चिन्तनविधिं स्पष्टयत?

III. द्वयोः प्रश्नयोः निबन्धात्मकम् उत्तरं प्रदेयम् 12½x2=25

1 सन्तानप्राप्तये अभिहितानि प्रायश्चित्तानि कानि?

2 पुत्रशोक-बहुकन्याजनन-सन्ताननाशयोगानां विषये निबन्धमेकं रचयत।

*******

<u>श्रीः</u>

## ।। एकोनविंशोऽध्यायः ।।

## १.० अवतरणिका

अये छात्राः !

विवाहानन्तरं स्त्रीणां सन्ततेः सौख्यं महत्वपूर्णं स्थानं भजते। यद्यपि विवाहस्य उद्देश्येषु प्रमुखमस्ति इयं सन्ततिः। सन्ततियोगो कदा वर्तते। अपत्यानां मध्ये पुत्राः कति स्युः। कन्यकानां संख्या तावत् कति स्यात्। जायमानपुत्राः भाग्यवन्त-रूपवन्त-गुणवन्त-आज्ञाधारक-निरोगिनश्च भवन्ति का न वेति ज्ञातुं विवाहिता स्त्री पुरुषश्च सर्वदा जिज्ञासां कुरूतः। यद्यपि पूर्वस्मिन् अध्याये प्रश्न वशात् सन्तानस्य विषये कथं चिन्तचेदिति प्रतिपादितम्। सम्प्रति सन्तानभावः पञ्चमेशः, सन्ततेः कारकस्य स्थितिः सन्ततिसम्प्राप्तियोगाः तत्संख्या, तत्समयादीन् जननकालिकखेटैः सकाशादपि निरूप्यन्ते। अतः जातकवशात् **सन्तानचिन्तनक्रमः** अत्र प्रस्तुतः प्रधानः विषयः।

**उद्देश्यानि**

* **जानकवशात् सन्तानचिन्तनक्रमः**
* **बीजक्षेत्रयोः बलाबलं जातके प्रश्ने च बीजक्षेत्रस्फुटं-प्रकारान्तरेण बीजक्षेत्रस्फुटक्रमभ्य।**
* **सन्तानकालनिर्देशः स्फुटपञ्चकः, सन्तानग्रहस्फुटक्रमः त्रिस्फुटविधिः वंशनाशयोगश्च।**
* **जातके रविचन्द्रवशात् सन्तानतिभ्यादिस्फुटक्रमः पुत्रमुखावलोकनयोगः, पुत्रनाशयोगश्च।**
* **दत्तकपुत्रादीनां लक्षणानि**
* **गुणवान् पुत्रः, गर्भाधानकालिकस्थिति अपत्यानां रूपादिचिन्तनक्रमश्च**
* **पितृपुत्रयोः मित्रत्वादिविचारः पित्रवाक्यपरिपालनचिन्तनक्रमः पित्रदूषण-योगश्च**
* **सन्तानसंख्यानिर्देशप्रकारः ग्रहाणां रश्मयश्च।**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

### १.१ जातकवशात् सन्तानचिन्तनक्रमः

पूर्वस्मिन् अध्याये प्रश्नवशात् सन्तानविषयकविचारान् सम्यक् प्रतिपाद्य अधुना जातकवशात् सन्तानचिन्तनक्रमः प्रतिपादयिष्यते। सम्प्रति सन्तानाभावः, सन्ततेः सम्प्राप्ति, तत्संख्या तत्समयादीन् जननकालिकखैटैः सकाशादपि निरूप्यन्ते।

वध्वाः जातके अनुपचयस्थानगतः चन्द्रः ग्रहैर्नीरीक्षितश्चेत् सन्ततेः प्राप्तिरस्ति। उपचयस्थाने गतः चन्द्रः बलीसद्ग्रहाणां युत्या ईक्षणेन च विद्यमानश्चेत् दुरितस्य शान्त्या सन्ततिः भवति। पुरूषजातके अयं क्रमद्वयमपि व्यत्ययेन कार्यः। अर्थाद् उपचयस्थानगतचन्द्रात् सन्तानलाभः। अनुपचयस्थानगतचन्द्रात् कृच्छ्रात्सन्ततिः। स्त्रीणां कृते उपचयस्थानगतः चन्द्रः पुरूषाणां कृते अनुपचयस्थानगतः चन्द्रः ग्रहाणां दृष्टिविरहितश्चेत् नूनं पुत्रोद्भवः न भवति।

### १.२ बीजक्षेत्रयोः बलाबलं, जातके प्रश्ने च बीजक्षेत्रस्फुटं, प्रकारान्तरेण बीज-क्षेत्रस्फुटक्रमश्च

पुंसा बीजबलाभावात् स्त्रीयाः क्षेत्र दौर्बल्यतः पुत्राभावो स्यात्। तद्द्वयं तयोर्लक्षणगुणेन च चिन्त्यते।

रवौ गर्भाधानसामर्थ्यं वर्तते। शुक्रः वीर्यस्य कारकः। रविशुक्रौ बलिनौ ओजराश्यंशकगतौ स्यातां तर्हि पुरूषस्य कृते सन्ततिः भवति। अत्र रविः पुरूषरूपः शुक्रः स्त्रीरूपः। गर्भाधानस्यैतयोरेव प्राधान्यतया आदावुपदिष्टौ।

स्त्रीणां कृते रक्तगुणो अस्रजात्, गर्भस्य सन्धारणाशक्तिश्चन्द्रात् ज्ञेयः। स्त्रीरूपश्चन्द्रः रजोरूपकुजश्च तौ शक्तियुतौ युग्मांशकगतौ स्यातां तर्हि स्त्रियाः सन्तानबलं वर्तते, पूर्वोक्तलक्षणस्य व्यत्ययेन सन्तानं न भवति।

जातकवशात् विचार्यमाणप्रश्ने बीजक्षेत्रस्फुटमाह-

जातके गुरोरधिष्ठितनक्षत्रस्य गतगट्यः पञ्चभिहतश्चेत् लब्धिर्याभवति सा राशिसंख्या स्यात्। शेषस्य कृते त्रिंशता संगुण्य पञ्चभिर्भक्तश्चेत् भागाः लभ्यन्ते। शेषं षष्ट्या संगुण्य पञ्चभिर्भक्तश्चेत् कलाः। एवम् आनीतं गुरोः स्फुटं स्थानद्वये स्थाप्यम्। सूर्यनक्षत्रयात

घट्यः शुक्रनक्षत्रयातघट्यश्च पृथक् पृथक् गुरोः गतघटीनां सकाशाद् यथा साधनं पूर्वं प्रतिपादितं तदृत् अनयोः रविशुक्रयोश्चापि स्फुटसाधनं करणीयम्। पूर्वं स्थानद्वये स्थापितस्य गुरोः स्फुटस्य कृते एकत्र रविशुक्रयोः योगस्फुटं योजयेत्। इत्थं त्रयाणां स्फुटैक्यं भवति बीजस्फुटम्। पुनः चन्द्रकुजयोः गतनक्षत्रघट्यः पञ्चभिर्विभज्य तयोरपि स्फुटं कार्यम्। पूर्वं स्थानद्वये स्थापितस्य अन्यतमस्य गुरोः स्फुटस्य कृते चन्द्रकुजयोर्द्वयोरपि स्फुटं योजयेत्तदा क्षेत्रस्फुटं भवति। संक्षिप्ततया अत्रैव गणितप्रक्रिया। ग्रहाधिष्टितनक्षत्रघटिकाः सावयवाः विन्यस्य पञ्चभिर्हत्वा राशयो लभ्यन्ते। रविशुक्रगुरुणाम् एव अनीतस्फुटानामैक्यं बीजस्फुटं भवति। चन्द्रकुजगुरूणां स्फुटैक्यं क्षेत्रस्फुटं भवतीत्यभिप्रायः। सन्तानप्रश्ने तु प्रश्नकालिकग्रहस्थित्या एव बीजक्षेत्रयोस्पुटं करणीयम्। यदि जातके चेत् पुरूषजातकेन बीजस्फुटं स्त्रीजातकवशाच्च क्षेत्रस्फुटं कार्यम्। पुरूषजातकस्य (जन्मकुण्ळयाः) रविगुरूशुक्रस्फुटयोगस्य सकाशाद् बीजस्फुटम्। स्त्री जातकस्य चन्द्रकुजगुरूस्फुटयोगवशात् क्षेत्रस्फुटम् कार्यम्। यातनाडिकाम् अन्वेष्टुं तत्तद्ग्रहस्फुटेन तत्तद्ग्रहस्य नक्षत्रं ज्ञेयम्। एकस्य नक्षत्रस्य कृते 13 अंशा 20 कलाश्च भवन्ति।

ओजराशौ ओजराशेर्नवांशके बीजस्फुटस्यास्य स्थितिः स्यात् तच्च शुभयोगदृष्ट्या सहितश्चेत् बीजस्य बलवत्वं वाच्यम्। अयं बीजस्फुटराशिः युग्मराशिः युग्मराशेर्नवांशके पापग्रहयोगदृष्ट्या च स्यात्तदा बीजस्य दौर्बल्यमिति भावः। सन्तनोत्पन्नशक्तेरभावः निर्देश्यः। क्षेत्रस्फुटराशिः युग्मराशिः युग्मांशे शुभग्रहयोगदृष्ट्या च सहितश्चेत् क्षेत्रस्य बलवत्वं वाच्यम्। अन्यथा ओजादिराशिसम्बन्धः क्षेत्रस्फुटस्य कृते विलोक्यते चेत् क्षेत्रस्य दौर्बल्यमिति भावः।

एतत् बीजक्षेत्रयोः स्फुटं शुभानां षड्वर्गे संस्थितश्चेत् इष्टफलदो भवति। पूर्वोक्त स्फुटं यदि पापानां षड्वर्गे स्थितश्चेत्तदा नेष्टम् (दोषप्रदो भवति) अत्र प्रतिपादितस्य बीजक्षेत्रस्फुटयोः कृते राहोः योगः दृष्टिः यदि स्यात् तर्हि अनपत्यदोषस्य कारणमस्ति सर्पबाधा। मान्देः योगदृष्टया प्रेतावेशस्य दोषः, शनेर्योगदृष्टा पूर्वजन्मनि कृत दुरितस्य कारणेन, कुजस्य सम्बन्धेन भैरवचामुण्डीशत्रुप्रभृति बाधाभिश्च सन्तत्यभावो वाच्यः।

जातके स्त्रियाः क्षेत्रस्फुटेन, पुंसां बीजस्फुटेन च फलं ग्राह्यं भवति। परन्तु प्रश्ने

तावत् केवलम् एकैव ग्रहचक्रं विद्यमानत्वात् रवीन्दुशुक्रावनिगुरूणां स्फुटैः बीजस्फुटं क्षेत्रस्फुटं च कृत्वा स्फुटपञ्चकैर्वशात् कालनिर्देशः कार्यः।

बीजक्षेत्रस्फुटैः फलचिन्तनं कर्तुं व्यपदिश्य अन्येषां यद् विचारभेदो वर्तते तत्प्रकारो अत्र लिख्यते।

पुरूषजातके रविगुरूशुक्राणां स्फुटैक्यं बीजस्फुटं भवति। स्त्रीजातके चन्द्रकुजगुरूणां स्फुटैक्यं क्षेत्रस्फुटं भवति। वंशवृद्धिचिन्तायाम् ओजांशकऽव्योजभावे च बीजस्फुटस्य बलं युग्मांशके युग्मभे च क्षेत्रस्फुटबलं भवति। क्षेत्रबीजस्फुटयोर्बलवत्वे सति द्वयोरपि सन्तानशक्तिर्वर्तते। क्षेत्रबीजस्फुटैक्यराशौ क्लीबग्रहयुक्ते पापग्रहयोगदृष्ट्या च स्थिते सति सन्तानशक्तेरभावः। बीजस्फुटस्य पञ्चमभावे क्षेत्रस्फुटस्य नवमभावे च पापग्रहाणां क्लीबग्रहयोश्च योगदृष्टिर्वा यदि स्यात् तदा अशुभम्। बीजस्फुटस्य पञ्चमे क्षेत्रस्फुटस्य नवमे च शुभानां योगदृष्टिर्वा यदि स्यात्तदा शुभं वाच्यम्।

## १.३ सन्तानकालनिर्देशः स्फुटपञ्चकः, सन्तानग्रहस्फुटक्रमः, त्रिस्फुटविधिः, वंशनाशयोगश्च

बीजक्षेत्रयोरबलत्वे सति सन्ततिः न भवति। बीजक्षेत्रयोर्बलवत्वे सति सुतरां भवति सन्ततिः। रवीन्दुशुक्रावनिजगुरुणाम् उक्तप्रकारानीतस्फुटैक्यराशिः लग्नात् केन्द्रत्रिकोणगते सति प्रथमवयसि सन्ततिप्राप्तिः। पणफरगते मध्यवयसि, आपोक्लिमगे अन्त्यवयसि च पुत्रलब्धिरिति एवं रीत्या सुतजननकालं नराणां कृते निर्दिशेत्।

एवं क्षेत्रबीजदौर्बल्यलक्षणे असंपूर्णे सति शुभदृष्टौ तु सन्ततिलाभप्रतिबन्धाकभूतपापानां प्रायश्चित्तेन सन्ततिर्भवति।

बीजक्षेत्रयो दुर्बलतायाः निदानार्थं निजं बाह्यमिति द्वेधा हेतुः प्रोक्तः। तत्र निजहेतुर्नाम वातादित्रिदोषजनितरोगैः सन्तानहीनता। तत्कृते चिकित्सादयः वाच्याः। तथापि जन्मान्तरेषु सञ्चितदुरितस्य कारणेन जायमानरोगाणां श्न्त्यर्थं जपदानद्विजभोजनादीन् विद्युक्तविधिना विधास्यैव औषधचिकित्सादयः करणीया इति मुनीन्द्रैः प्रोक्तम्।

बीजक्षेत्रयोः दुर्बलतायाः निदानार्थं प्रोक्तबाह्यहेतोर्वशात् सन्ततेर्दोषो दृष्टश्चेत्

राक्षस-यक्ष-पिशाच प्रभृते: पीडया द्विजदेवतादीनां च शापेन क्षेत्रबीजयो: शक्ते: ह्रासो जातेति भाव:। तत्परिहारर्थं बलिनर्तनसेवादयो विधेया: भवन्ति।

सन्तानकारकग्रहैर्वाशादपि सन्ततेश्चिन्तनसम्प्रदायो अस्ति। सोऽपि प्रकारो अत्र विलिख्यते अग्रे।

आदौ सन्तानग्रहस्फुटक्रम: त्रिस्फुटक्रमश्च उच्यते। तद्यथा- जातके विहगानां स्फुटानि निघ्नानिपञ्चभि: तदा लब्धाानि गुणनफलानि सन्तानग्रहस्फुटानि भवन्ति। एवं सर्वेषामपि ग्रहस्फुटं राशिभागकलात्मकं कृत्वा तेषु राशिभागकलात्मकेषु ग्रहस्फुटेषु रविचन्द्रगुरूणां स्फुटैक्यकरणेन सन्तानत्रिस्फुटं भवति। स्त्रिया: पुरुषस्य वा सन्तानत्रिस्फुटनक्षत्रं 3-5-7 तमम् आगतश्चेत्, (त्रिस्फुटनक्षत्रमवलोक्य) 88-108 तमे पादे त्रिस्फुटनक्षत्रमागतश्चेत्, यद्वा स्त्रीपुरूषयोर्लग्नात् 6.8.12 राशौ त्रिस्फुटमागतश्चेत् तदा सन्ततेरभाव:। स सन्तानगुरो: स्फुटराशित इदं त्रिस्फुटं 6.8.12 स्थाने आगतश्चेत् सन्ततेरसम्भवं वाच्यम्। एवं स्त्रीपुरुषद्वयोरपि जातके त्रिस्फुटस्यस्थिति: वर्तते चेत् निश्चयेन सन्ततेर्लाभो नास्ति। स्त्रीपुरुषयोर्जातके एकत्र अनुकूल अन्यत्र प्रतिकूल: यद्यायाति तर्हि प्रायश्चित्तादिना सन्ततिर्भवतीति मुनीनां वचनमस्ति।

पूर्वोक्तप्रतिकूलनक्षत्रादय: पुरुषजातके यद्यागता: स्यु: तर्हि पुत्रस्य मृति:। स्त्रीजातके यदि संदृष्टा: भवन्ति तर्हि पुत्र्या: मरणम्। त्रिस्फुटं स्त्रीसंज्ञकनक्षत्रे पुरूषसंज्ञकनक्षत्रे वा पुत्रीपुत्रादीनां च मृत्युं कथयेत्। त्रिस्फुटराशे: केन्द्रे सन्तानकुज: सन्तानशनिर्वा आगतश्चेत् सन्तानं न भवति। त्रिस्फुटात् केन्द्रभावेषु सन्तानरविर्विद्यमानश्चेत् सन्ततेर्लाभ:। त्रिस्फुटराशित: केन्द्रे सन्तानचन्द्र: वर्तमानश्चेत् द्वितीयोद्वाहेन द्वितीयभार्यायां सन्ततिर्भवति। त्रिस्फुटराशित: केन्द्रे रविचन्द्रयो: सन्तानस्फुटमागतश्चेत् द्वितीयविवाहानन्तरं प्रथमायां भार्यायां सन्ततिर्जायते। त्रिस्फुटात् केन्द्रे सन्तानगुरू: व्यवस्थितश्चेत् तृतीयोद्वाहेन सन्ततिर्भवति। त्रिस्फुटराशे: केन्द्रे सन्तानशुक्रस्यस्थितेर्वशात् चतुर्थविवाहेन सन्तानोत्पत्ति: भार्याद्वये भवति। त्रिफुटराशित: 5-7-9 स्थाने चन्द्र आगतश्चेत् पित्रशापो वाच्य:। 5-7-9 स्थानेषु सन्तानराहुरागतश्चेत् सर्पशाप:। स्फुटयोगनक्षत्रवशेन सन्तानप्राप्तये कानिचन प्रायश्चित्तानि अभिहितानि। तानि कथ्यन्ते। तद्यथा- सन्तानत्रिस्फुटं धनिष्टादि सप्तसु नक्षत्रेषु वर्तते चेत् दुर्गार्चनं विधेयम्। रोहिण्यादि चतुर्षुनक्षत्रेषु त्रिस्फुटं व्यवस्थितं चेत् गणहोम: कार्य:। पुष्यादिसप्तनक्षत्रेषु

पूर्वोक्तस्फुटं यद्यस्ति चेत् सर्पबलिं कारयेत्। अवशिष्ट स्वात्यादिनक्षत्राणां कृते श्रवणाराधनं प्रायश्चित्तत्वेन विहितोऽस्ति।

अत्र वंशनाशयोगमाहुः। तद्यथा-

(1) चतुर्थभावे पापग्रहाः सप्तमभावगतो शुक्रः, दशमभावगतश्चन्द्रमाश्चेत् वंशनाशयोगः।

(2) 1-5-8-12 एषु भावेषु सर्वे पापग्रहाः स्युः।

(3) पापाः चतुर्थभावे, बुधशुक्रौ सप्तमे, गुरूः पञ्चमभावगतश्चेत् वंशानाशयोगः।

(4) लग्ने यः कोऽपि पापः भवेत् चतुर्थे चन्द्रः, पञ्चमभावे लग्नेशः, पुत्रेशः बलैर्विहीनश्चेत् वंशनाशयोगः। पूर्वोक्तचतुर्षु योगेषु जातानां वंशस्य विच्छेदकत्वं वाच्यम्।

जातके लग्नात् रिःफसुताष्टमस्थाः पापाः स्युः स मनुज अर्थहीनः सन् वंशस्यैवहिच्छेदकरो भवति। जीवसहितः चन्द्रः लग्नगतः, सप्तमे कुजः शनिर्वा, चतुर्थे च पापग्रहाः स्थिताश्चेत् वंशनाशयोगः। पापाः 12-1-8 भावेषु विद्यमानाः चन्द्रः पञ्चमे स्थितश्चेत् वंशनाशयोगो भवतीति विज्ञेयम्।

पुनः वंशनाशकरः योगाः प्रोच्यन्ते। तद्यथा-

(1) पञ्चमभावस्य कृते पापानां दृष्टिः शुभानाम् ईक्षणाभावश्च

(2) समुदायाष्टकवर्गे पञ्चमभवे 25तः न्युनानि अक्षाणि

(3) पञ्चमभावे वृषकर्ककन्याराशयः यदि स्युः।

(4) युग्मराशौ गतश्चन्द्रः एते चत्वारो योगाः वंशनाशकराः सन्ति।

पूर्वोक्तसन्तानप्रतिबन्धकयोगचतुष्टयेषु यद्योको दोषः विद्यते चेत् भार्याया उदरव्याधेः कारणेन वंशनाशः, योगद्वयेन दुर्दैवतापीडनं यद्वा बाधादिना, योगत्रयस्य सकाशाद् पूर्वोक्तहेतुद्वयस्यापि सम्भवः तथा सत्यपि तत्कृते प्रायश्चित्तादिना सन्ततेः सिद्धिः सम्भवति। योगचतुष्टयस्य सकाशादपि यदि दोषाः स्युः प्रायश्चित्तादिविधिनापि सन्तानसंसद्धिर्नभवति।

गुरूः लग्नपञ्चमसप्तमभावाधिपाश्च बलहीनाः, लग्नगुरूचन्द्रतः पञ्चमभावः सौम्यैरदृष्टः, असद्ग्रहैर्युतः दृष्टो वा, लग्नात् पञ्चमभावः पापानां गृहं भवेत्, शुभदृष्टिविरहितः सन् प्रबलानां पापानां दृष्ट्या युतश्चेत् वंशवृद्धिः न भवति। अस्मिन् योगत्रये दम्पत्योर्मध्ये कस्यापि कृते अयं योगो वर्तते चेदपि सन्ततिर्नभवति।

पञ्चमभावे पापान्वितः स्वनीचोपगः सद्ग्रहैरवीक्षितः पञ्चमेशः, कुजः सप्तमभावे, शुक्रशशाङ्कयो सह योगं कृत्वा वर्तते चेत् अयं योगः सन्तत्यभावसूचकत्वेन व्यपदिष्टः।

सप्तमभाव-पञ्चमभाव-लग्न-जन्मराश्यधिपति गुरूश्च एते दुर्बलाः स्युः यमकण्टकस्य स्थितिः 6-8-12 भावे स्यात्, पञ्चमभावे पापानां योगः दृष्टिश्च स्याद्यदि एतादृशयोगः नपुंसकयोगः। सन्तानतिथिः कृष्णाष्टम्युपरिस्थिता स्यात्, गुर्वष्टक वर्गे पञ्चमभावे बिन्दवः न्यूनाः स्युः। एतौ दोषौ सन्तत्यभावसूचकौ। एतादृश योगे सति दत्तकपुत्रस्वीकारो कृतेऽपि न फलति, दोषत्वादित्यभिप्रायः। लग्नाधिपः, चन्द्रराश्यादिपः पञ्चमसप्तमेशौ, गुरूश्च एते प्रबालाः स्युः। पूर्वोक्त इमे पञ्च, यमकण्टकोऽपि इष्टभावे अभीष्टस्थाने च यदि स्यात् किञ्च पञ्चमभावस्य कृते शुभयोगदृष्टिः स्यात्तदा एते सन्तानयोगस्य सूचकाः गुर्वष्टकवर्णस्य पञ्चमभावे बिन्दूनाम् आधिक्यं सन्तानतिथिः शुक्लपक्षस्य तिथीषु यदि वर्तते चेत् अयमपि सन्तानयोगस्य सूचकः। उपर्युक्त लक्षणेषु गुणदोषविमिश्रतेषु सत्कर्मणां वशात् दोषादीनां शान्त्या सन्ततिः भवितुमर्हति।

जातकेऽपि सन्ततिं सन्तानतिथिभिश्चिन्त्य इत्याप्तवचनप्रामाण्येन अत्राऽपि तत्प्रकारः कथ्यते।

## १.४ जातके रविचन्द्रयोर्वशात् सन्तानतिभ्यादिस्फुटक्रमः, पुत्रमुखानवलोकनयोगः, पुत्रनाशयोगश्च

प्रतिदिनं सूर्यः सूर्योदयतः विचरति मेषान्त्यात् वामतः। चन्द्रःधनोरर्धतः क्रमात् समगत्या परिभ्रमति। रविचन्द्रौ क्रमशः पञ्चाशद् विघट्याकगत्या एकैकं राशिं क्रमतः। अभीष्ट कालस्य कृतेऽपि अयं न्यायेन द्वयोरपि स्फुटं कार्यम्। पूर्वोक्ततादृक् रविचन्द्रयोः द्वयोः स्फुटस्य कृते पञ्चभिः संगुण्य राशिभागकलात्मकं च क्रियते तदा सन्तानरविचन्द्रयोः स्फुटं भवति। तत्र चन्द्रस्फुटात् रविस्फुटम् अपनीयते चेत् तिथिस्फुटं लभ्यते। अयमेको क्रमः।

सूर्योदयकालात् जननकालं यावत् घटिकाः सावयवाः विन्यस्य पञ्चाशद्भिः भागमपहृत्य अवाप्तं राशिः। अवशेषं त्रिंशतासंगुण्य तेनैवच्छेदेन भागमपहृत्यावाप्तं भागाः। पुनः तदेव शेषं षष्ट्या संगुण्य पुनस्तेनैच्छेदेन भागमपहृत्यावाप्ताः कलाः। द्वादशभिरधिकं वर्तते चेत्

चक्राद् विशोध्य पुनः द्वादशराशिषु इदं स्फुटं संशोध्य पञ्चभिर्गुणितञ्चेत् राशिभागकलादयो भवन्ति। इदं सन्तानं रविस्फुटम्। सन्तानरविस्फुटस्य कृते अष्टौ राशयः 15 भागश्च संयोज्य पञ्चभिर्गुणितश्चेत् सन्तानचन्द्रस्फुटं भवति। चन्द्रस्फुटे तावत् यदि सूर्यस्फुटस्य वियोगः क्रियते चेत् सन्तानतिथिस्फुटं भवति।

एवं सन्तान रविचन्द्रयोः सकाशाद् या तिथिः आनीता वर्तते सा सन्तानतिथिः शुक्लतिथीषु स्यात्तर्हि पुत्रान्विता कीर्तिता। यदि सन्तानतिथयः कृष्णपक्षीयाः स्युः तर्हि अपत्याभावः। यदि सन्तानतिथयः कृष्णपक्षीयाः स्युः तर्हि पुत्राभावात् दत्तपुत्रस्वीकरः कर्तव्यमिति जननतः प्रश्न तोवा पृच्छकस्य कृते विनिर्दिशेत्। पूर्वोक्तस्य समन्वयः जातके प्रश्ने च उभयत्र कार्यमित्याशयः।

लग्नगतः क्षीणचन्द्रः, मौढ्यं गतो देवगुरूः मकरकुम्भयोर्मध्ये स्यात् त्रिकोणै पापाः स्युः, एतादृशयोगे सति इदमिदानीं प्रसवयिष्यमाणा गर्भिण्याः भर्तुः मरणं भवति अर्थात् आत्मजस्य अवलोकनात् प्रागेव पितुः मरणमिति। परन्तु शिशोः तावत् दीर्घायुर्भवति।

पञ्चमभावसंस्थः बुधः, तनुभावे चतुर्थे वा पापाः, पापानां समूहः नवमपञ्चमे यदि भवेत् तदा तनयस्य मुखावलोकनानुभूतिर्नास्ति।

अत्र वार्धक्ये सन्ततियोगमाहुः। तद्यथा–

(1) लग्ने कुज अष्टमे चन्द्रः, अल्पपुत्रर्क्षेषु वृषसिंहकन्यावृश्चिकेशु रविर्वर्तते चेत्,

(2) शनिः लग्ने, कुजः द्वादशे, अष्टमे गुरूः अल्पात्मजराशिः पञ्चमभावगश्चेत्,

(3) गुरूः व्यवस्थितराशितः पञ्चमभावः पापैर्युतं स्यात् एकादशे चन्द्रः लग्नभावे बहुखगाश्चेत्, अमी योगत्रयेषु यद्येकोऽपि योगोऽस्ति चेत् नृणाम् अन्तिमे वयसि अपत्यप्रदाः स्युः।

तनुभावयुक्तो क्षीणचन्द्रः शनिक्षेत्रे संस्थितः मौढ्यान्वितः बृहस्पतिः, त्रिकोणभावेस्थिताः सर्वे पापग्रहाः यदि स्युः पुत्रस्य मुखावलोकनं विना मरणं भवति।

बुधः पञ्चमभावे व्यवस्थितो भवेत्, लग्ने चतुर्थ भावे वा पापाः स्युः। तेन जनेन पुत्रस्य मुखं न दृश्यते। पञ्चमे भाग्ये च पापाः संस्थिताः स्युः तदानीमपि पूर्वोक्तफलमेव चिन्तयेत्।

अथ पुत्रनाशयोगमाहुः। तद्यथा -

पापग्रहाः स्वभवनं विना पञ्चमगाः वीर्यान्वितैः सद्ग्रहैः न दृष्टाः स्युः तदानीं सुतमृत्युदाः भवेयुः। पञ्चमगाः पापग्रहाः यदि रन्ध्राधिपाश्चेत् किं पुनः? निश्चयेन सन्ततेर्नशो भवति। पञ्चमभावे स्थितः कुजः जातं जातं तनयं विनाशयति। पञ्चमभावगतं कुजं जीवेक्षिश्चेत् आद्यप्रथमपुत्रस्य मरणं भवति। पञ्चमभावे मकरमीनराशिगतो वा बृहस्पतिः पुत्रनाशकरो भवति।

पुत्रभावेशः न च सौम्यसमन्वितः पापैः दृष्ट अथवा पापैर्युक्तः क्रूरग्रहाणां नवांशे स्थितश्चेत् पुत्रनाशं वदेत्।

व्ययेशस्य नवांशाधिपस्य द्रेष्काणाधिपः पञ्चमभावेशेन समन्वित अथवा तेन विलोकितश्चेत् पुत्रार्थं दुःखमनुभवति।

पुत्रेशः क्रूरषष्ट्यंशे स्थितः सन् दुःस्थानगतश्चेत् अथवा क्रूरग्रहेण दृष्टे पुत्रर्तिर्भवति।

## १.५ दत्तकपुत्रदीनां लक्षणानि

सन्तानगुरूः सन्तानलग्नं, जन्मकुण्डळयां गुरूः, लग्नं च एतैः सकाशात् पञ्चमभावः मिथुनकन्यामकरकुम्भराशिष्वेको भवेत्, तद्राशौ शनिबुधचन्द्राणां योगो दृष्टिर्वा स्याद्यदि दत्तपुत्रस्वीकारयोगो वक्तव्यः। पञ्चमेशः वीर्यान्वितश्चेत् दत्तपुत्र स्वीकारस्यानन्तरं पत्रोत्पत्तिः सञ्जायते। उपर्युक्तसन्तानलग्नो नाम जातके लग्नस्फुटस्य कृते पञ्चभिगुणितश्चेत् सन्तानलग्नस्फुटमित्यवगन्तव्यम्।

पञ्चमेशः शनेर्नवमांशे विद्यमानः सन् बुधशनिसहितश्चेत् दत्तपुत्रस्वीकारो क्रियते। पञ्चमेशः शनेर्नवमांशे स्यात्, गुरूशुक्रौ स्वक्षेत्रगतौ स्यातां तदा दत्तपुत्रस्वीकारानन्तरं स्वभार्यायां पुत्रो भवति।

गुर्वष्टकवर्गे गुरूस्थितराशितः पञ्चमराशौ बिन्दवः यदि अधिकाः स्युः तदा दत्तात्मजाप्तिर्भवति।

पूर्णवीर्यान्वितो सद्ग्रहः पुत्रस्थानगतः पुत्रनाथेन संदृष्टो न चेत्तदा दत्तसुतप्रदो भवति।

पञ्चमभावः कर्काटकः, तत्रगतो सौरश्चेत् नृणां बहुपुत्राः भवेयुः। कर्कः

पञ्चमभावगतराशिर्भवेत्, रविशुक्रकुजा: तत्र यदि स्यु:, तदा द्वितीयविवाहात् सुता: सम्भवन्ति। कर्कराशि: पञ्चमे, तत्रस्थौ गुरूचन्द्रौ बहुकन्याजननं कुरूत:। पञ्चमभावगतो कर्कटराशि:, तत्रैव विद्यमानो बुधश्चेत् अल्पपुत्रयोग:। एवं शशिगेहस्य विशेषा: प्रतिपादिता: सन्ति।

पञ्चमगा: पापा: स्वक्षेत्रगता: बहुसुतान् जानयन्ति। बुध: स्वर्क्षगत: सन् पञ्चमभावे वर्तते चेत् पुत्रहानिप्रदो भवति। पञ्चमभाव: वृषसिंहकन्यावृश्चिकराशिश्चेत् अल्पसन्ततिर्भवति। चन्द्र: वृषसिंहकन्यावृश्चिकेषु यस्मिन् कस्मिन् भावेऽपि स्थितश्चेत् अल्पसन्ततिर्भवति। उपर्युक्तचत्वारो राशय: पञ्चमभावत्वेन यद्यागता: तर्हि सन्ततेरल्पत्वं वाच्यम्। चन्द्र: चतुर्थे पञ्चमे वा कन्यायां विद्यमानश्चेत् बहुकन्यकां जनयति।

ओजर्क्षे ओजांशके चन्द्र: पञ्चमभावगत: सूर्योण दृष्टश्चेत् सन्ततेरभाव:। सप्तमभावेश: बलविरहित: पञ्चमभावे विद्यमानश्चेत् भार्याया: साकं पुत्रस्यापि नाशो भवति। बलवान् सप्तमेश: सुतस्थाने, सुतेश: सप्तमस्थे च स्थितौ भवत: तदा पुत्रसन्ततिर्भवति। एवमेव लग्नेश: पञ्चमे, पञ्चमेश: लग्ने च यदि स्यात् (सौम्यं विहाय) तदानीमपि पुत्रसम्पत्तिरस्तीति वाच्यम्।

1 तनयगृहं युग्मराशि:, तत्र चन्द्रशुक्रयो: युति: तयो: दृष्टिर्वा यदि स्यात्,

2 शुक्रचन्द्रयो: षड्वर्गसम्बन्ध: पञ्चमभावस्य कृते यदि स्यात्तदा, कन्यका एव स्यु:,

3 तनयभावम् ओजराशि: पुंग्रहा: यदि तत्र स्यु: तदानीं पुरूषसन्तनस्यैव लब्धि: भवति न तु कन्यकानाम्।

4 पञ्चमभाव ओजराशि: पञ्चमाधिपति: पुरूषराशेर्नवमांशे यदि स्यात् तदा सर्वा: सन्तति: पुरूषसन्ततिरेव भवति।

5 तनयभाव: युग्मराशि:, तद्भावेशश्च युग्मांशकगतश्चेत् स्त्रीसन्तति:।

6 पञ्चमभाव: तद्भावेशश्च उभयराशेर्नवमांशे स्थितौ चेत् नपुंसकजननं भवति।

7 पञ्चमभावे पापा: परन्तु तत् क्षेत्रं तेषां स्वक्षेत्रञ्चेत् पुत्रसन्ततिं विन्दति,

8 पञ्चमभावे द्वौ पापौ स्यातां तदा बहुपुत्रलाभ: वाच्य:।

9 शुभग्रहसमन्वितौ लग्नपञ्चमेशौ केन्द्रे स्यातां, कुटुम्भेश: बलाढ्ये तु पुत्रप्राप्तिं विनिर्दिशेत्।

10 पञ्चमेशस्य नवमांशपतिः शुभग्रहसंयुतः शुभेन वीक्षितो वा भवति तदा पुत्रसन्तानप्राप्ति कथयेत्।

11 लग्नात् चन्द्राच्च पञ्चमभावः बलयुतः विषादिदोषरहितः, पञ्चमाधिपते अथवा सद्ग्रहस्य वीक्षणेन च सन्ततिर्भवति।

12 पञ्चमेशः गुरूश्च वीर्यान्वितौ मौढ्यविषादिदोषरहितौ, दुरितांशसहितौ, षष्ठाष्टमद्वादशभावैर्विना इष्टभावे स्थितौ स्यातां तदा सन्ततिर्भवेदिति जातकेनापि कथयेत्। अत्र दुरितांशो नाम द्वादशभावांशः अथवा संहारनक्षत्राणां द्वितीयतृतीयपादयोरीशमपि दुरितांशमित्यभिधीयते।

13 कुजः मेषसिंहवृश्चिकमीनेषु पुत्रस्थानगतः पुत्रकारकगुरूणा अवलोकितश्चेत् सन्तानकारको भवति।

14 रविकुजगुरूपञ्चमेशा ओजराशौ ओजांशकेषु यत्र क्वापि स्थिताः ध्रुवं पुत्रसन्तानलाभकराः भवेयुः। तद्वत् चन्द्रशुक्रपञ्चमेशाः युग्मराशौ युग्मनवंशे यस्मिन् कस्मिन् भावेऽपि स्थिताः स्त्रीसन्ततेः कारकाः निश्चयेन भवेयुः।

## १.६ गुणवान् पुत्रः, गर्भाधानकालिकास्थिति अपत्यानां रूपादिचिन्तनक्रमश्च

प्रचुरबलयुतौ पञ्चमभाव-पञ्चमेशौ च स्याताम् आयुष्मन्तः पुत्राः भवन्ति। पञ्चमभावः पापानां क्षेत्रञ्चेत् क्रूराः स्युः पुत्राः। यदि क्रूरराशेर्नवमांशे पञ्चमभावश्चेत् तदानीमपि क्रूराः पुत्राः। पञ्चमभावः शुभानां क्षेत्रं भवेत्। गुरूः परमोच्चे द्रेष्काणादिस्ववर्गे शुभश्चेत् पुत्राः विद्याकान्तिऐश्वर्यदिसकलगुणैः सहिताः स्युः।

साम्प्रतं गर्भाधानकालस्य स्थितेर्वशात् सन्ततेः सुखदुःखादयो वर्ण्यन्ते। तद्यथा- गर्भाधानकाले मातृपितृोर्मनसि सुखरूपस्यानुभूतिः वर्तते चेत् सन्तानस्य कृतेऽपि जीवने सुखमस्ति। तयोः कृते आधानकाले मनोदुःखानुभूतेः स्थितिर्विद्यमानश्चेत् अपत्यानां कृते जीवने विविधदुःखानि सम्भवन्ति। आधानकाले पितृनासापुटात् श्वासवायोः दीर्घता विलोक्यते चेत् दीर्घायुष्मान् पुत्रस्य जननं भवति। यदि पूर्वोक्तकाले श्वसगतिर्मध्यमा चेत् मध्यमायुर्भवति सन्तानस्य। श्वासवायो अल्पत्वे सति सन्तते अल्पायुर्वाच्यः (यद्यपि श्वासवायोः परीक्षणं

कर्तुं सर्वेऽपि निष्णाताः न स्युश्चेदपि तज्ज्ञैः तत् चिन्तनीयम्)

अथ अपत्यानां रूपादिचिन्तनक्रममाहुः। तद्यथा- पञ्चमाधिपतिः गुरूश्च पापानां दृष्ट्या योगे वा स्यातां तर्हि अपत्यानि विरूपाः व्याधियुक्ताश्च सम्भवन्ति।

पुनः पुत्रप्रदयोगा उच्यन्ते।

1 लग्नेशः सुतभे विद्यामनः,

2 पञ्चामाधिपतिर्लग्ने,

3 तयोः यत्र क्वापि परस्परं योगः दृष्टिश्च स्याद्यदि योगत्रयमेतत् पुत्रप्रदम्। स्त्रीयाः प्रसवं पञ्चमभावेन सञ्चिन्तनीयम्। सन्तानभाग्यं नवमभावेन विचिन्तयेत्। चतुर्थभावे शुभानां स्थितेर्वशात् प्रसवहानिर्वाचच्यः। इत्थं योषिताम् इयान् भेदः भावचिन्तनक्रमे विज्ञेयः।

पञ्चमभावः गुरोः वर्गे कस्यापिवर्गस्य सम्बन्धे वर्तमानश्चेत् तत्र शुभानां दृष्टिः स्यात्तदा स्वभार्यायाम् औरसपुत्रोत्पत्तिं वदेत्। लग्नात् चन्द्राच्च बलयोगात् अस्य फलमादिशेत्।

### **१.७ पितृपुत्रयोः मित्रत्वादिविचारः, पित्रवाक्यपरिपालनचिन्तनक्रमः पित्रदूषण योगश्च**

लग्नेश पञ्चमेशौ परस्परं मित्रे भवतः तर्हि पितृपुत्रयोर्मध्ये मित्रत्वम्। परस्परं शत्रुत्वं लग्नेश पञ्चमेशयोर्मध्ये स्यात्तदा शत्रुत्वम् तयोर्मध्ये। पूर्वोक्तयोर्मध्ये समत्वमस्ति चेत् पितृपुत्रयोर्मध्ये समतां वदेत्।

परस्परं निरीक्ष्यमाणौ लग्नाधिप-पुत्रस्थानाधिपौ स्यातां, तौ च परस्परं गृहांशस्थौ भवतश्चेत् पितुः शुश्रूषां पुत्रः करोतीति ज्ञेयः।

पञ्चमाधिपतिः पश्यति लग्नं, लग्नाधिपञ्च पञ्चमं विलोकयति चेत् पुत्रः पितृाज्ञायाः परिपालनं करोति। लग्नेशः पञ्चमे पञ्चमेश्च लग्ने यदि स्यात्तदा पुत्रः पित्रवाक्यवशानुगो भवति।

अथ पितृदूषणयोगमाह। तद्यथा-

लग्नात् पञ्चमभावं पुत्रेशेन अभिवीक्षितश्चेत् किञ्च चन्द्रात् पञ्चमभावः कुजराहुभ्यां संदृष्टंश्चेत् पुत्रः नित्यं पित्रदूषको भवति।

पञ्चमाधिपतेरंशकाधिपः लग्ने विद्यमानः, लग्नेशस्य अंशकाधिपतिः पञ्चमे, गुरोः

नवांशकाधिपश्च केन्द्रे स्यात्तदा पुत्रलाभो भवतीति महान्तो मनयो आहुः।
लग्नचन्द्रगुरूाणां पञ्चमस्थाने शुभग्रहः वर्तते चेत् आत्मजैर्वशात् भूयः आत्मनः कृते गुणोत्कर्षः सम्भवति।

### १.८ सन्तानसंख्यानिर्देशप्रकारः ग्रहाणां रश्मयश्च

सन्तानसंख्यानिर्देशार्थं पञ्चमभावस्फुटं विन्यस्य राशीनपास्य भागान् षष्ट्या हत्वा लिप्ताभिः संयोज्य ग्रहदृष्टि-षष्ट्यंशगणितेन लब्धसंख्यया (श्रीपतिपद्धतौ प्रोक्तवत्) पूर्वं कृतलिप्तानां कृते गुणयेत्। गुणनफलं षष्ट्यारोप्य शतद्वयेन विभजेत्तदा यत् शेषं लभ्यते सा एव सन्ततेस्संख्येति मन्तव्यम्।

पूर्वानीतकलानां कृते पापदृष्टिषष्ट्यंशेन संगुण्य षष्ट्यारोप्य शतद्वयेन भाजयेत्तदा अवाप्तसंख्या भवति क्षीयमाणसन्ततेसंख्या।

पुनः सन्तानसंख्यानिदेशविधिः कथ्यते। तद्यथा-

पञ्चमभावेशस्य भुक्तनवांशाः यावन्तः सन्ति तावन्ति संख्याकानि अपत्यानि स्युः। तत्र ओजराश्यंकाः पुरूषसन्तानस्य सूचकाः। युग्मराशेर्नवमांशाः स्त्रीसन्ततेः सूचकाः। तत्र बुधं स्त्रीसंख्यायां शनिक्षेत्रांशं पुंसंख्यात्वेन परिगणयेदिति वदन्ति केचन। नवांशाधिपतयः पुरूषग्रहाः युग्मराशेर्नवांशे यदि वर्तमानाः स्युः तत्संख्याकसन्ततेः मृतिः वाच्यः। तत्रापि तत्संख्याकनवांशाधिपतिः अतिदुर्बलश्चेत् मृत्युः निश्चयेन भवति। नवांशकेशाः स्त्रीग्रहाः औजराशौ संस्थिताः तत्सूचकस्त्रीसंख्यायाः नाशं कुर्वन्ति। नवांशकपतिः सम्पूर्णबलयुतश्चेत् तदंशसूचकसन्तानस्य कृते दीर्घायुर्वाच्यः। दुर्बलश्चेद् दोषो चिन्त्यः।

उपर्युक्ता अंशाधीशाः स्वभवन-स्वोच्च-मित्र-क्षेत्रादिगताः वीर्याढ्याः मौढ्यादिदोषरहिताश्चेत् तस्यांशकसन्तानस्य कृते दीर्घायुं वदेत्।

गुर्वष्टकवर्गं निक्षिप्य गुरूः स्थितराशितः पञ्चमस्थाने यावन्ति अक्षाणि तावन्ति अपत्यानि। अक्षेषु नीचशत्रुमौढ्यादिदोषयुतस्य ग्रहस्य अक्षं विहाय बली ग्रहाणाम् अक्षं परिगणयेत्। उच्चे स्थितस्य वक्रीग्रहस्य च अक्षं पतितं चेत् अक्षस्यैकस्य कृते सन्तानत्रयम्। स्वक्षेत्रे-स्वनवांशे-वर्गोत्तमे-स्वद्रेष्काणे च स्थितस्य ग्रहस्य कृते सन्तानद्वयम्। तदितरस्थानगनां

ग्रहाणां कृते एकेकं सन्ततिं चिन्तयेत्। ओजांशकगतस्य पुरूषग्रहेण पुरूषसन्तानं युग्माशकगतस्य स्त्रीग्रहेण स्त्रीसन्तानसंख्यां च विचिन्तयेत्।

गुरूपञ्चमेशयोः रश्मिसंख्यायाः सकाशादपि सन्ततेः फलं कथयेत्। अतः रश्मिसंख्यायाः वशात् सन्ततेनिर्देशविधिः कथ्यते। तद्यथा-

सूर्यस्य रश्मिसंख्या दश, चन्द्रस्य नव, कुजस्य पञ्च, बुधस्य पञ्च, गुरोः सप्त, शुक्रस्य अष्टौ शनेः पञ्च एवं ग्रहाणाम् आदित्यादीनां रश्मयः प्रोक्ताः। यस्य ग्रहस्य रश्मिं ज्ञातव्यमस्ति तद्ग्रहस्य स्फुटं कृत्वा तस्य नीचात् अपास्य षड्राशिभ्य अधिकश्चेत् चक्राद् विशोध्य शेषं ग्रहस्य रश्मिसंख्यया संगुण्य राशेः स्थाने षड्भिः विभजेत्तदा रश्मिसंख्या लभ्यते। शेषं षष्ट्या संगुण्य षड्भिः भाजयेत्। तदा रश्मिषष्ट्यंशो भवति। कोऽपि ग्रहः स्वोच्चे अथवा वक्रं गते सति नियमेन वृद्धिः भवति रश्मीनाम्। नीचमौढ्यादिगतस्य ग्रहस्य हरणं कार्यं भवति रश्मेः ज्ञानाय।

वक्रोच्चांशयोर्गतस्य ग्रहस्य रश्मीनां कृते त्रिगुणितं कार्यम्। मित्रस्वांशादिगतस्य ग्रहस्य रश्मिसंख्यां द्विघ्नं कार्यम्। नीचशत्रुराशौ च गतस्य ग्रहस्य षोडशांशस्य हरणं कार्यम्। मौढ्यं गतस्य ग्रहस्य कृते रश्मेरभावः। शुक्रशनी मौढ्यंगतौ स्यातां तयोरर्धांशस्य हरणं कार्यम्। गुरूपञ्चमेशयोर्मध्ये यः बलाढ्यः तस्य यावत्यः रश्मयः तावतीं पुत्रसंख्यां कथयेत्। उपर्युक्तक्रमे रश्मिसंख्यावशात् आत्मजसंख्यासु भूयसी संख्या ग्राह्यया भवेत्, तस्य बलाबलं विलोक्य आत्मजाधीशः बलवति सति तत्संख्याकाः सन्ततिः मध्यबलिश्चेत् अर्धसख्यां बलहीनश्चेत् कनिष्ठसंख्यां सन्ततिं वदेत्।

पुत्रेशः पुत्रभावस्य समीपे अथवा लग्नेशस्य निकटे वर्तते चेत् प्रथमवयसि (योवनस्य आदिमे भागे) सन्ततिप्राप्तिः। मध्ये वर्तते चेत् मध्यवयसि, पुत्रेशः पुत्रभावतः दुरे वर्तमानश्चेत् यौवनान्त्ये सन्ततिप्राप्तिः भवति।

(1) लग्नेशः, (2) पञ्चमेशः, (3) गुरूः, (4) पञ्चमेशस्थितराश्यधिपः (5) पञ्चमेशस्य अंशकाधिपः, (6) गुरूस्थितराश्यधिपः (7) गुरोः नवांशाधिपः, (8) सप्तमभावेशः, (9) तनयभवनप्रेक्षकः, (10) पञ्चमभावगतो ग्रहः, एते दशग्रहाः सन्ततिहेतुभूताः सन्ति। एतेषां मध्ये बलीग्रहस्य दशाभुक्तेः समये मानवानां कृते तनयजननं निर्दिशेत्।

सन्तत्यर्थं पुनः कालनिर्देशः क्रियते। तद्यथा- पुत्रेशाश्रितराशिः, तस्यांशकराशिः, चन्द्रात् पञ्चमभावेशस्थितराशिः, चन्द्रांशकराशिः, गुरोः सकाशाद् पञ्चमभावाधीशो विद्यमानराशिः, गुर्वंशकराशिः, गुलिकस्थितराशिः, गुलिकांशकराशिः एतेषाम् अष्टौ राशीनां सकाशात् त्रिकोणराशौ गुरोः सञ्चरिष्यमाणकालः पुत्रप्रदोभवति। गुर्वष्टकवर्गे पूर्वोक्त-अष्टौ राशिषु यत्र गुरोः अक्षाणि पतितानि तद्राशौ गुरोः सञ्चारकाले सन्ततिप्राप्तिः भवति।

इत्थं भावचिन्तने ये दोषाः गुणाश्च कीर्तिता एते सर्वे अस्यां सन्तानचिन्तायामपि सन्तानप्रश्ने चिन्त्याः भवन्ति। पुत्रमुखोवलोकनात् मानवः पित्रऋणपाशबन्धनात् विमुच्यते। न तु श्राद्धादिभिः। अतो अन्यभावानाम् अपेक्षया अस्य भावस्य प्राधान्यमस्ति एव।

***

## प्रश्नावली

I. संक्षेपेण उत्तरं लिखित 5x7=35

1 बीजक्षेत्रयोः बलाबलप्रदर्शनं स्पष्टयत?

2 त्रिस्फुटविधि वंशनाशयोगानां च वर्णनं कुरुत?

3 अपत्यानां रूपादिचिन्तनक्रमं निरूपयत?

4 पित्रपुत्रयोः मित्रत्वविचारः कथं करणीयः।

5 पित्रदूषणयोगं निरूपयत।

II. विस्तरेण उत्तरं विलिखत 10x4=40

1 जातके रविचन्द्रयोर्वशात् सन्तानतिथ्यादिस्फुटक्रमं विशदीकुरुत।

2 दत्तकपुत्रादीनां लक्षणानि कानि।

3 सन्ततेःकालनिर्देशः स्फुटपञ्चकः सन्तानग्रहस्फुटक्रमश्च विलिखत।

4 जातके प्रश्ने च बीजक्षेत्रस्फुटप्रकारं वर्णयत?

III. द्वयोः प्रश्नयोः निबन्धात्मकम् उत्तरं प्रदेयम् 12½x2=25

1 सन्तानसंख्या निर्देशनप्रकारं, ग्रहाणां रश्मेश्च वर्णनं कुरुत?

2 पित्रपुत्रयोः मित्रत्वविचारं गुणवान् पुत्रयोगस्य लक्षणं च विलिखत?

*******

<u>श्री:</u>

।। विंशोऽध्याय:।।

## १.० अवतरणिका

अये छात्रा:!

त्रिवर्गसाधनाय विवाहाख्य: संस्कारविशेष: क्रियते। ''अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विज:। आश्रमादाश्रमं गच्छेदेष धर्म: सनातन:।।'' इत्युक्तत्वात् इतराश्रमो पजीव्यतया प्राध ान्यत्वात् समावर्तनानन्तरं पुरूषेण अवश्यं विवाहे यतयितव्यम्। स च विवाह: स्त्रीपुरूषद्वयायत्त:। तत्रापि बहुधा पुरूषायत्त:। तादृश विवाहस्य चिन्तनं तावत् सप्तमभावत: क्रियते ज्योति: शास्त्रे। सर्वत्र फलनिर्णयावसरे प्रश्नजातकयो: संयोजनं कृत्वैव फलमादेष्टव्यमस्ति। यद्यपि पूर्वस्मिन् अध्याये सन्तते: विचार: कथित:। दारहीनस्य पुरूषस्य पुत्रचिन्ताया: विचार: न घटते। अपि च श्रुति स्मृति पुराणादिषु विहितकर्मणां सम्पादनाय विवाहो अवश्यमस्ति। तत्र त्रिवर्गस्य धर्मार्थकामरूपस्य करणमस्ति तावत् भार्या। 'नापुत्रस्य लोकोऽस्ति' इतिश्रुत्या अत्मजाप्राप्त्यै उद्वाहो विहित:। अत: विशिष्य विवाहस्य विषये प्रस्तुत: सप्तमभावचिन्तनक्रम: अत्र प्रधान: विषय:।

**उद्देश्यानि**

- **सप्तमभावगुणदोषचिन्तनक्रमे साधनानि**
- **सप्तमे मेषादिराशीनां फलं भावचिन्तनविधिश्च**
- **भार्यामृत्युयोगा:**
- **शुक्रेण सह अन्यग्रहयुतेर्वशात् भार्यालक्षणम्**
- **शुक्राक्षवशेन भार्यानक्षत्रफलं भार्याजातिशरीरादिलक्षणञ्च।**
- **सप्तमभावे स्थितग्रहफलं भार्याया: शत्रुमित्रादि वर्णनम् उत्कृष्टवनिताचिन्तनवर्णनञ्च**
- **पुनर्विवाहलक्षणम्**
- **अन्ये पुनर्विववाहद्विकलत्रादियोगा:**
- **ऋणानुबन्ध:**

* **भार्यानक्षत्रचिन्तनविधिः भार्यादिग् ज्ञानक्रमश्च**
* **स्त्रीजातके भर्तृचिन्तनविधिः**
* **विवाहस्य कालनिर्देशक्रमः चारवशात् विवाहचिन्तनक्रमश्च**
* **प्रश्नावली:**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

## १.१ सप्तमभावगुणदोषचिन्तनक्रमे साधनानि

सप्तमभावस्य चिन्तक्रमे एतानि साधनानि अपेक्षितानि-

(1) सप्तमभावः (2) सप्तमभावाधिपतिः (3) सप्तमभावं निरीक्ष्यमाणो ग्रहः (4) सप्तमभावगतो ग्रहः (5) शुक्रः (6) भावेशस्य कृते प्रोक्तानि पृथिव्यादिपञ्चभूतानि, तत्तद् भूतानां गुणैर्वशात् पुरूषजातके भार्यायाः स्वभावचिन्तनञ्चेति।

उपर्युक्तस्थानग्रहयोगवशात् प्रश्ने जातके च सप्तमभावस्य गुणदोषचिन्तनं कार्यम्।

## १.२ सप्तमे मेषादीनां फलं भावचिन्तनविधिः

पुरूषजातके मेषादिराशयः सप्तमभावे स्थिताः स्युः तेषां फलानि एवं सूचयितुं शक्यन्ते।

मेषः- सम्भाव्यमाणा भार्या देवतासंदर्शनतत्परा भवति।

वृषः - मृष्टान्नदानासक्ता भवति।

मिथुनः - पात्राणां संशोधन-परिमार्जनादिकार्येषु असक्ता भवति।

कर्कः - स्नानादिकार्येषु अनुरक्ता स्यात्।

सिंहः - गणहोमादिशुभकार्यकरणे प्रवृत्ता स्यात्।

कन्या - परिमलवस्तूनि भाण्डार्जने च अत्यासक्ता स्यात्।

तुला - वाकप्रौढा भवति।

वृश्चिकः - पाक्करणे कुशला स्यात्।

धनुः - शास्त्रपुराणश्रवणतत्परा स्यात्।

मकरः - शयन-आसन-वस्त्रादिमृदुवस्तूनां स्पर्शनतत्परा भवति।

कुम्भः - धान्यादीनां सञ्चयकर्मणि प्रवृत्ता स्यात्।

मीनः - कांस्यपात्र संग्रहणतत्परा, कलासु असक्ता भवति।

सप्तमभावचिन्तनविधिः विशिष्य एवं वर्ण्यते। तद्यथा-

1. सप्तमभावः बलहीनः पापानां योगदृष्ट्या युता स्यात्।
2. सप्तमेशलग्नेशशुभानाञ्च दृष्टिः सप्तमभावे न स्यात्।
3. सप्तमाधिपतिः शुक्रश्च शत्रुनीचांशकगतौ स्याताम्।
4. तौ सप्तमेशशुक्रौ मोढ्यगतौ स्याताम्।
5. सप्तमेशशुक्रयोः कृते पापानां योगः दृष्टिर्वा यदि स्यात् (विशिष्य लग्नाधिपतेर्योगदृष्टेश्च अभावो विद्यमानश्चेत्।)
6. एतौ पूर्वोक्तौ पष्टाष्टमद्वादशभावगतौ स्याताम्।

उपर्युक्तलक्षणेषु एको वा लक्षणद्वयं वा यद्यागतश्चेत् उद्वाहो नैव सिध्यति। कथञ्चित् विवाहाघटितश्चेदपि म्रीयतैव भार्या।

## १.३ भार्यामृत्युयोगाः

1. लग्नतः सप्तमे कुजः वर्तते चेत् सदैव भार्याविरह अथवा मृत्युः भवति।
2. सप्तमभावगतो अंगारकः शनिना निरीक्षितः, शुभयोग दृष्ट्या विरहितश्चेत् निश्चयेन भार्यामृत्युः।
3. मकरः सप्तमभावे भवेत् तत्रैव विद्यमानो गुरूः।
4. वृश्चिकः सप्तमभावगतः तत्र विद्यमानो शुक्रः, पूर्वोक्त योगद्वयं भार्यामृतेः सूचको भवति।
5. सप्तमभावे वृषराशिः तद्भावगतो बुधश्चेत् प्रथमभार्यायाः मरणं भवति।
6. सप्तमभावगतो मीनराशिः तस्मिन्नेव भावे शनिः।
7. सप्तमभावगतो राशिः कन्या तद्भावगतो गुरूः।
8. चतुर्थभावे पापाः स्युः, पञ्चमाष्टमेशौ यदि सप्तमे भवतः।

एते भार्यामृत्युसूचकयोगाः। सूर्यशुक्रौ त्रिकोणे सप्तमे च स्यातां तदा भार्याया अङ्गवैकल्यं वाच्यम्।

1. पापान्तरस्थो शुक्रः शुभदृष्टियोगविहीनश्चेत् भार्यानिमित्तेन आपद् अवाप्तिः भवति यद्वा भार्यामरणं भवति।
2. शुक्रात् चतुर्थाष्टमे पापाः सौम्येक्षा युत्यभावे सति भार्याहेतुना विपत्तिः भवति। अथवा मृत्युर्भवति।
3. पुरूषजातके सप्तमे रविराहू भवतश्चेत् तस्य सर्वस्वहानिः भवति। किञ्च अग्निसर्पजलादिवशात् भार्यामत्युः गदितः तद्यथा–

मेषसिंहवृश्चिकेषु कुत्रापि विद्यमानो शुक्रः रविकुजाभ्यां युतः दृष्टो वा, विशिष्य शुक्रः अग्निभूतोदयराशौ वर्तते चेत् अग्नौ म्रियते भार्या।

शुक्रे मान्दिसमायुक्तः तस्मात् केन्द्रत्रिकोणणे राहुः वर्तमानश्चेत् सर्पदंशनात् भार्यामरणं ब्रूयात्।

शुक्रो मान्दिसमन्वितः यदि शुक्रादष्टमे पापाः स्युः विशिष्य शुक्रः जलराशिगश्चेत् जले मृतिः भवति।

## १.४. शुक्रेण सह अन्यग्रहयुतेर्वशात् भार्यालक्षणम्

1. पुरुषजातके शुक्रः रविणा संयुतश्चेत् भार्याभूतनिपीडिता, कुले प्रधाना च भवति।
2. चन्द्रशुक्रयुतेर्वशात् भार्या भर्तुरपेक्षया उत्कृष्टा स्यात्।
3. शुक्रकुजयुतेर्वशात् जारान्विता, राक्षसैश्च पीडिता भवति।
4. शुक्रबुधयोगात् सुन्दरी, विद्यासुशीलान्विता च।
5. शुक्रगुरुयोगतः विद्याधरपीडिता गुणैः पूर्णा पुत्रिणी च स्यात्।
6. शुक्रः शनियुतश्चेत् गन्धर्वपीडिता, दुःष्पुरुषासक्ता, दुःशीला, कपटान्विता दुर्भाषिणी च भवति।
7. राहुकेतोर्युतिवशतः नीचासक्ता अङ्गहीना च भवति।

8. शुक्रः मान्द्यादिस्त्रिभिरन्वितश्चेत् भार्यायाः आशुविनाशो वाच्यः। (मन्द्यादित्रयो नाम गुलिक-यमकण्टक-कालश्चेति।

9. शुक्रो अर्धप्रहरान्वितश्चेत् किञ्चित् कालानन्तरं भार्यायाः मृतिः सम्भवति।

शुक्रेण अन्यग्रहाणां योगवशात् यद्यत् फलं प्रोक्तं तत्तद् फलं तत्तद्ग्रहाणां क्षेत्रे स्थितस्य शुक्रेणापि प्रवदेत्।

## १.५ शुक्राक्षवशेन भार्यानक्षत्रफलं भार्याजातिशरीरादिलक्षणञ्च।

पुरुषजातके शुक्राष्टवर्गं विन्यस्य शुक्रात् सप्तराशौ सूर्यस्य बिन्दवः पतिताः स्युः तर्हि सम्भाव्यमाणा भार्या सूर्यनक्षत्राणि कत्तिका-उत्तराफग्लगुनी-उत्तराषाढा एषु नक्षत्रेषु जात। यद्यस्ति स्वप्राणवत् पत्युः प्राणप्रिया भवति। शुक्रात् सप्तमे चन्द्रस्य बिन्दवः पतिताः यदि स्युः  सा रोहिणी हस्त-श्रवणजा स्यात्तदा पत्युः मनोनुकूला इयं मनोवल्लभा भवति। कुजस्य बिन्दवः शुक्रात् सप्तमराशौ पतिताः स्युः सा कुजस्य नक्षत्रेषु मृगशिरा -चित्रा - ध निष्टेषु जाता यद्यस्ति सत्कर्मानुगुणी, शुक्रात् सप्तमराशौ बुधस्य बिन्दवः पतिताः स्युः भार्यानक्षत्वेन आश्लेषा-ज्येष्टा-रैवत्येषु जाता भर्तुराज्ञां परिपालयति। शुक्रात् सप्तमे राशौ गुरोः बिन्दवः पतिताः स्यु भार्यानक्षत्वेन गुरोः नक्षत्राणि पुनर्वसु-विशाखा पूर्वाभाद्रपदजा- उत्तमसन्ततेः सम्पादिनी भवति। शुक्रात् सप्तमे बिन्दव शुक्रस्यैव पतिताः वर्तन्ते पत्नीनक्षत्रत्वेन तस्यैव नक्षत्राणि उत्तरफल्गुनी-पूर्वाषाढा-भरणी च स्युः सा पत्युः कामसुखप्रधाना निपुणा च स्यात्। शुक्रात् सप्तमे शनेः बिन्दवः पतिताः स्युः सा पुष्य-अनुराधा उत्तराभाद्रा एषु जाता यद्यस्ति दासीवत् समस्त कार्याणि करोति। शुक्रस्य सप्तमभावे अक्षबिन्दूनाम् अपतनत्वात् शुक्राष्टकवर्गे लग्नाक्षबिन्दवः एव शुक्रात् सप्तमभावे पतिताः स्युरिति अवगन्तव्यम्।

इदानीं भार्या जातिशरीरादिलक्षणमुच्यते। तद्यथा- सप्तमभावे गुरूशुक्रौ स्यातां भार्या स्वजातौ समुत्पन्ना, तदितरतग्रहाः सप्तमभावे यदि स्युः तदा पूर्वोक्तजातेरपेक्षया न्यूनजातौ जातेति। सप्तमेशाश्रितराशिः तदंशकराश्योर्मध्ये बलीग्रहस्य समानं भार्यायाः शरीरलक्षणं वदेत्। उदाहरणार्थं सप्तमेशः सूर्यः प्रबलश्चेत् मधुपिङ्गलदृक्, पित्तप्रकृत्या युता, चतुरश्राकृत्या स्थितं शरीरम् एवं कल्पनीयम्। शुक्रः सप्तमाधिपतिः, सप्तमभावे स्थितो ग्रहः एतेषु यः

बली तस्य वर्ण-स्वभाव-गुण-जात्यादयो भार्यायाः कल्पनीयाः सन्ति।

शुक्रात् नवमस्थाने सद्ग्रहस्य योगः नवमस्थानेशः बलान्वितश्चेत् धर्मशीला, सत्पुत्रयुता भाग्यवती च भवेत् भार्या। एवं भार्यायाः गुणलक्षणादीनि चिन्तनीयानि।

पुरुषजातके सप्तमेशः बलसम्पूर्णे सति धनिनां कुलात् कन्या भार्यात्वेन लभ्यते। सा रूपवती गुणवती च स्यात्। द्यूनेशः बलहीनश्चेत् दरिद्राणां गृहस्य कन्या। सा रूपवती न स्यात्।

दारेशः शुभखेचरवीक्षितः शुभेन संयुतः शुभानां मध्यवर्ती च स्यात् पतिपुत्रैः सह सन्तोषेण स्थास्यमाणा कन्या भार्यात्वेन समुपलभ्यते।

## १.६ सप्तमभावे स्थितग्रहफलं भार्यायाः शत्रुमित्रादिवर्णनम् उत्कृष्टवनिता चिन्तनञ्च

पुरूषजातके लग्नात् कलत्रभावे शुक्रे सति कामुकः, सप्तमे शुभग्रहाः बुधगुरुचन्द्राः स्यु तर्हि स्वदारानुरक्तो भवति। सप्तमे कुजश्चेत् बहूषु नारीषु रमति। शनिश्चेत् कुस्त्रीषु आसक्तः, सूर्यश्चेत् परदाररतः, एवं कलत्रभावे स्थितग्रहाणां फलं ज्ञेयम्।

लग्नाधिपस्य कृते सप्तमेशः सुहृद् यदि स्यात्तदा भार्या तत्कुलभवापि मित्रभूता भवति जातकस्य। लग्नाधिपति-सप्तमेशयोश्च रिपुत्वे सति भार्या, तत्कुलभवापि जातकस्य शत्रुः स्यात्।

लग्नाधिपतेरपेक्षया कलत्रनाथः पूर्णबलयुतः शुभांशे शुभदृष्टियुक्ते वैशेशिकांशे परमोच्चभागगश्चेत् उत्कृष्टजातौ जाता सद्गुणैरूपेतां भार्यां प्राप्नोति जातकः।

लग्नाधिपतेरपेक्षया बलहीनः सप्तमेशः शत्रुराश्यंशके मौढ्यं गतः पापसमन्वितश्चेत् निकृष्टजातौ जातकस्य कलत्रलाभो भवति।

## १.७ पुनर्विवाहलक्षणम्

1. उभयराशिगतं स्यात् चन्द्रसप्तमेशौ द्वन्द्वराशौ संस्थितौ स्याताम् अथवा तौ द्विस्वभावराशेरंशे स्याताम्।

2. लाभभावे ग्रहद्वयं, सप्तमे नपुंसकग्रहौ बुधशनी स्याताम्। उपर्युक्तयोगौ द्वितीयविवाहस्य सूचकौ भवतः।

3. सूर्याङ्गारकौ सप्तमभावगतौ सप्तमभावस्य नवमांशे विद्यमानौ स्यातां तदानीमपि उद्वाहद्वौ भवेताम्। परन्तु एकैव बल्लभा नूनं जीवति।

सप्तमभावः बलसंयुतः सप्तमेशशुक्रौ स्वक्षेत्रे स्वद्रेष्काणे वर्गोत्तमे उच्चनमांशयुतौ स्यातां तर्हि तौ पुनरूद्वाहकारकौ भवतः।

## १.८ अन्ये पुनर्विवाहद्विकलत्रादियोगा

1. सप्तमभावे पापानां योगः दृष्टिर्वा स्यात् सप्तमेशः बलहीनश्चेत्।

2. द्वितीयभावे पापग्रहाणां योगः दृष्टिर्वा स्यात्, द्वितीयेशः बलहीनश्चेत्, पुनर्विवाहयोगः।

3. लग्नात् सप्तमभावे अथवा अष्टमभावे पापाः व्यये च कुजः, सप्तमेशः सप्तमं नावलोकयति चेत्, पुनरूद्वाहयोगः।

4. केन्द्रत्रिकोणे सप्तमेशः स्वोच्चमित्रस्ववर्गे कर्माधिपेन युक्तश्चेत् बहुस्त्रीसहितो भवति।

5. दारलाभेशौ परस्परं निरीक्षितौ बलाढ्यौ त्रिकोणस्थौ स्यातां तदा जातकः बहुदारसबमन्वितो भवति।

## १.९ ऋणानुबन्धः

पुरूष जातके- (1) द्वितीयभावेशाश्रितराशिः, (2) द्वितीयभावेशस्य नवांशकराशिः, (3) तस्योच्चराशिः, (4) सप्तमभावेशस्य नीचराशिः, (5) शुक्राश्रितराशिः, (6) भार्गवात् सप्तमराशिः, (7) चन्द्रस्य द्वादशांशराशिः, (8) चन्द्रस्य द्वादशांशराशेः त्रिकोणराशिः (9) चन्द्राष्टकवर्गे समुदायाष्टक वर्गे च पतिता अक्षबहुलराशिः, (10) शुक्राष्टक वर्णे शुक्रतः सप्मभावेशस्य अक्षाणि पतितराशिश्च एवं रीत्या एषु उपर्युक्तेषु एको वा राशिद्वयं भार्यायाः राशित्वेन यद्यागताः स्युः तदानीम् ऋणानुबन्धं स्त्रीपुरूषयोस्तीति वाच्यम्।

चन्द्राष्टकवर्गे चन्द्रकक्षापत्यक्षान्वितराशिः तदंशकराशिः, लग्नेशाश्रितराशिः तदेशकराशिश्च

एतेषु जाता वधुरशुभा स्यात्।

## १.१० भार्यानक्षत्रचिन्तनक्रमः भार्यादिग्ज्ञानक्रमश्च

1. लग्नेशशुक्रयोः स्फुटैक्यं कृत्वा तद्वशात् यन्नक्षमायाति तस्मिन् नक्षत्रे जाता सम्भाव्यमाणा भार्यायाः नक्षत्रं भवति।
2. लग्नेशसप्तमेशयोः स्फुटैक्यवशात् यच्च नक्षत्रं तत् कलत्रभं भवति।
3. सप्तमम् ईक्षमाणो ग्रहः सप्तमेशश्च तयोः स्फुटैक्यात् यच्च नक्षत्रं तत्कलत्रनक्षत्रमिति ज्ञेयम्।

भार्यादिग् ज्ञान क्रमः प्रोच्यते। तद्यथा- (1) सप्तमेशशस्य दिक् (2) सप्तमेशाश्रितराशेर्दिक् (3) सप्तमेशस्य अंशकराशेर्दिक् (4) शुक्राश्रितराशेर्दिक् (5) शुक्रस्यांशकराशेदिक् (6) सप्तमभावे स्थितस्यराशेर्दिक् (8) सप्तमभावं विलोक्यमाणग्रहस्य दिक् (9) चन्द्रात् सप्तमे स्थितस्य ग्रहस्य दिशम् (10) चन्द्रात् सप्तमभावम् ईक्ष्यमाणग्रहस्य दिक् (11) शुक्राष्टकवर्गे विद्यमानशुभग्रहस्य अधिकाक्षाणि स्थितराशेर्दिक (12) लग्नाधिपस्य अधि काक्षराशेर्दिक् (13) सप्तमभावेशस्य अधिकाक्षराशेर्दिक् चेति इत्थं पूर्वोक्त अनया स्त्रिया सह विवाहः शुभप्रदेति विदेत्। स्त्रीपुरुष जातकयोर्मेलनसमये स्त्रियाः दिक् पूर्वोक्तेषु वर्तते चेत् शुभम्।

## १.११ स्त्रीजातके भर्त्रचिन्तनविधिः

सप्तमभावः, सप्तमभावेशः, शुक्रैश्च सकाशाद् यथा पुरुष जातके दारानिरूपणं क्रियते तथैव स्त्रीजातके भतृचिन्तनं कर्तव्यम्।

स्त्री जातके पापा अष्टमगाः पत्युः मरणं कुर्वन्ति। अष्टमभवे पापः विद्यमानश्चेदपि स्त्रियाः द्वितीयभावे शुभग्रहो वर्तते चेत् भर्यायाः मरणात्पूर्वं पत्युः मृतिर्नभवति।

पापैर्विलोकितः शनिः सप्तमे विद्यमानश्चेत् स्त्रियाः उद्वाहो नैव भवति। षष्टाष्टमे पापाः स्युः सा विधवा भवति। परन्तु एतादृशयोगे सत्यपि तस्याः जातके नवमभावे शुभाः स्युः भर्तुः मरणं न भवति। किञ्च वैधव्यं न प्राप्नोति सा। अतः एतादृशभेदं स्त्रीजातके सम्यक् विलोकनीयम्।

**स्त्रीजातके बाल्ये विवाहप्रदयोगाः एते सन्ति।** तद्यथा- (1) बलीशुभग्रहः सप्तम भावगतः लग्नाधिपतिना विलोकितो भवेत्। (2) वीर्यान्वितः शुक्रः लग्नेशं पश्येत्। (3) सप्तमभवेशशुक्रौ च केन्द्रे स्याताम्। एभिः योगैः बल्यावस्थायाम् एव विवाहं चिन्तयेत्। सप्तमेशशुक्रौ उपचयस्थाने विद्यमानौ भवतश्चेत् तौ विवाहोर्ध्वं समृद्धिप्रदौ स्तः। लग्नाधि पात् राशित्र्याभ्यन्तरे सप्तमाधिपतिर्वर्तते चेत् यौवनानन्तरं भवति पाणिग्रहः।

## १.१२ विवाहस्य कालनिर्देशविधिः चारवशात् उद्वाहचिन्तनक्रमश्च

(1) सप्तमभावगतो ग्रहः (2) सप्तमं ईक्षमाणो ग्रहः (3) सप्तमभावेशः (4) सप्तमेशाश्रितराशेर्नाथः (5) तदंशकनाथः (6) शुक्रः (7) चन्द्रः (8) लग्नेशस्यांशकपतिश्च एतेषा दशाभुक्तेः काले विवाहस्य संसिद्धिर्भवति। केचन आचार्याः राहुदशाभुक्तिकालोऽपि विवाहप्रदेति जगुः।

सप्तमभावे, तद्भावेशाश्रितराशौ, ततः पञ्चम,-सप्तम,- नवमराशौ, सप्तमेशस्यांशकराशौ ततः पञ्चमनवमराशौ, चारवशात् शुक्रः, लग्नेशः, सप्तमेशः, चन्द्रलग्नाधिपो वा सञ्चरिष्यमाणकाले उद्वाहसिद्धिर्भवति। सप्तमभावेशाश्रितः तदंशराशितः त्रिकोणे चारवशात् गुरोः सञ्चारस्य काले प्रोद्वाहसम्भवः वाच्यः।

इत्थं गृहस्थाश्रमधर्मानुसरणाय, ऋणत्रय विमोचनाय, पुत्रसन्ततिप्राप्तये च भार्यायाः सहयोगो अपेक्षितः। अतः जन्मलग्नविहगवशात् भार्याविषयक विचिन्तनम् अत्र निरूपितमस्ति। विवाहप्रश्नः, जातकद्वारा भार्याचिन्तनं च द्वयमपि आवश्यकम् इत्यत्र नास्ति सन्देहः।

***

## प्रश्नावली

I. संक्षेपण उत्तरं लिखित 5x6=30

1 सप्तमभावगुणदोषचिन्तने साधानानि कानि?

2 पुनर्विवाहयोगस्य लक्षणानि कानि?

3 वधूवरयोः ऋणानुबन्धः कथम् अनुमेयः?

4 सप्तमभावेशस्य सकाशाद् उत्कृष्टवनिता चिन्तनं कथं कार्यम्?

5 भार्यामृत्युयोगद्वयस्य लक्षिणं लिखत?

II. विस्तरेण उत्तरं विलिखत 10x3=30

1 सप्तमे मेषादिराशीनां फलं किम्?

2 सप्तमभावे स्थितग्रहफलं भार्यायाः शत्रुमित्रादिवर्णनं च कुरूत।

3 शुक्रेण सह अन्यग्रहयुतेर्वशात् भार्यालक्षणं निरूपयत?

III. निबन्धात्मकप्रश्नयो उत्तरं लिखत - 20x2=40

1 भार्यानक्षत्रचिन्तनक्रमः भार्यादिग्ज्ञानक्रमश्च लेख्यः?

2 शुक्राक्षवशेन भार्यानक्षत्रफलं भार्याजातिशरीरादिलक्षणं च विशदयत?

*******

श्री:

।। एकविंशोऽध्याय:।।

## १.० अवतरणिका

अये छात्रा:।

अथैवं वधूवरयो: सामान्यतो गुणदोषविचारं सप्तमभावचिन्तनं च निरूप्य मेलकसम्बन्धी विचार: प्रस्तूयते। यतो हि विवाहदेव लोकस्य सृष्टियज्ञादिकर्म चतुवर्गफलप्राप्तिश्च भवति। विवाहसंसिद्धये मेलकसम्बन्धी सम्यक् विचारं विना परस्परं दम्पत्योरानुकूल्यं चिन्तयितुं न शक्यते। पुत्राद्युत्पत्तिस्तु दम्पत्योरानुकूल्यं विना न स्यात्। 'यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते' इति याज्ञवल्क्येन उच्यते। तस्मात् दम्पत्योरनुकूलस्य हेतुभूतमस्ति विवाहे मेलकसम्बन्धी कूटविचार:। तत्र मेलकसम्बन्धी कूटेषु केचिद्द्वादशकूटान्याहु:। यद्यपि सर्वदेशप्रसिद्धान्यष्टकूटानि सन्ति। अन्ये केचन अष्टादशकूटान्याहु:। यदाह गर्ग:-

**''माहेन्द्र गणकूटं च दिनकूटं च योनिजम्।**
**स्त्रीदीर्घं रज्जुकूटं च वश्यं वर्णाख्यकूटकम्।**
**राशि राश्याधिपाख्ये च वेधो नाड्याख्यकूटकम्।**
**भूतालिंगाख्यकूटं च जात्याख्यं पक्षिकूटकम्।।**
**योगिनीगोत्रकूटं च कूटान्यष्टादशैव तु।''** इति।

अत: विवाहे मेलकसम्बधी ''प्रसिद्धकूटानि दम्पत्योर्वद्धिकारीणि यत्नाश्चिन्त्यानि शास्त्रत:'' इत्यत्र प्रस्तुत: प्रधान: विषय:।

**उद्देश्यानि -**

* **विवाहघटने प्रोक्तानां कूटानां नामानि**
* **सापवादं षष्टाष्टकविचार:**
* **द्विद्वादशत्रिकोणचिन्तनक्रम:**
* **राशिषु योनिप्रविभाग: वश्यकूटश्च**
* **ग्रहमैत्रीकूटम्**

* **दिनानुकूल्यम्**
* **माहेन्द्रकूटम्**
* **स्त्रीदीर्घकूटम्**
* **योनिकूटम्**
* **गणकूटम्**
* **गोत्रकूटम्**
* **पक्षिकूटम्**
* **वेधानुकूल्यम्**
* **भूतानुकूल्यविचारः**
* **रज्जुकूटम्**
* **वयोकूटम्**
* **अष्टकवर्गानुकूल्यचिन्तनविधिः**
* **मनोकूटम्**
* **आयव्ययनिर्देशक्रमः**
* **चोलानुकूल्यम्**
* **ऋणधनानुकूलचिन्तनम्**
* **कूटैर्वशात् फलविशेषनिर्णयः**
* **ग्राह्यकूटानि**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

## १.१ विवाहघटने प्रोक्तानां कूटानां नामानि

मेलकवशात् दम्पत्योः जन्मातारार्द्यैः परस्परम् आनुकूल्यं विचिन्त्य उपयमः कार्यो भवति। अतः तत्प्रकारौ अत्र निगद्यते।

वधूवरयोः जन्मनक्षत्रवशात् एतानि कूटानि सम्यक् विचिन्त्य परिणयनविधिं

प्राश्निकस्य कृते कथयेत्। तानि कूटानि प्रोचुः। तद्यथा- वधूवरयोः राशिकूटम् (1) राश्यधिपः (2) नक्षत्रम् (3) नक्षत्रसम्बन्धेन जात्यादिकूटम् (4)योनिकूटम् (5) गणकूटम् (6) ऋषिकूटम् (7) पक्षिकूटम् (8) मृगकूटम् (9) वेधः (10) भूतकूटम् (11) रज्जुकूटम् (12 वयोकूटम् (13) अष्टकवर्गकूटम् (14) मनोकूटम्। एतत् समस्तं विचारयेत्।

### १.२ सापवादं षष्टाष्टकविचारः

कन्यायाः जन्मर्क्षतः 2-3-4-5-6 एषु राशिषु जातो पुरुषः वर्ज्यः। वधूवरयोः जन्मराशिरेकश्चेदपि नक्षत्रं भिन्नं चेत् ग्राह्यः। कन्यायाः जन्मर्क्षात् सप्तमराशितः द्वादशतमराशिं यावत् पुरुषस्य जन्मर्क्षं चेत् शुभदः।

तत्र ओजराशिभुवां स्त्रीणां षष्टाष्टमर्क्षजौ पुरुषौ ग्राह्यौ भवतः। युग्मराशिभुवा कन्यायाः कृते निन्द्यः षष्ठराशिजः पुरुषः। अष्टमराशिजः पुरुषः ग्राह्यः। वधोः राशितः वरस्य राश्यानुगुण्येन फलम् एवं निरूपयितुं शक्यते। तद्यथा-

स्त्रीजन्मराशेः पुमान् द्वितीयराशौ जातश्चेत् द्विद्वाशाख्यो राशियोगः। तत्र धनक्षयः दारिद्र्यं फलं भवति। स्त्रीजन्मराशेः पञ्चमराशौ पुमान् जातश्चेत् पञ्चमनवमाख्यः योगः। तत्र निरुपत्यता- प्रजानाशः। षष्ठराशौ जातश्चेत् षष्ठाष्टमो नामयोगः। तत्र व्यसनादीनि स्युः। तृतीयराशौ जातश्चेत् त्रिकैकादशो नाम योगः। तत्फलमस्ति दुःखम्। स्त्रीजन्मराशितः चतुर्थ राशौ जातश्चेत् चतुर्दशो नाम योगः। तद्योगवशात् विरोधः। स्त्रीजन्मराशितः षष्टाष्टमराशौ पुरुषजन्मराशिश्चेत् दम्पत्योर्नाशाः। यदि स्त्रीपुरुषराश्यो एकाधिपत्यता वर्तते चेत् अथवा स्त्रीपुंसक्षराश्यो अन्योन्यं मित्रभावश्चेत् षष्टाष्टमर्क्षदोषस्य नाशः स्यात्। षष्टाष्टमादिदुष्टराशियोगा अपि कृचित् ग्राह्या भवति इत्यत्र अपवादो उच्यते। तद्यथा- अग्रे वधूवरयोर्जन्मर्क्षवेधाख्ये वक्ष्यमाणे दोषे सति, तद्राशि स्वामिनोस्सुहृत्वेकाधिपत्यं वा तद्राश्योर्वश्यत्वं च यदि स्यात् एषः षष्टाष्टमत्वेन राशियोगो न दुष्यति। अपि च शुभ एव भवति।

## १.३ द्विद्वादशत्रिकोणचिन्तनक्रमश्च

मेलकसम्बन्धी विषये जन्मभात् स्त्रीपुरुषयोः परस्परं द्विदाशत्रिकोणञ्च सर्वदा बहुदोषाय कल्प्यते। समसप्तमभं श्रेष्टम्। स्त्रीपुरुषराश्याधिपयोः परस्परम् आरातिश्चेदपि स्त्रियाः जन्ममात् सप्तमराशिः पुरुषस्य श्रेष्टम्। पुनः पूर्वोक्तदोषाणां फलमुच्यते-

1. स्त्रीजन्मर्क्षतः पुरुषस्य जन्मराशिः षष्टाष्टमगश्चेत् मरणवैर वियोगश्य दोषाः सम्भवन्ति।

2. स्त्रीजन्मर्क्षतः पुरुषजन्मर्क्षं द्विद्वादशजश्चेत् निर्धनता, पूर्वोक्तराश्यौ नवमपञ्चमगौ स्यातां तर्हि सन्तानहानिः, परस्परं समसप्तमभं तयो स्यात्तर्हि सौख्य-सन्तानलाभ-धनवृद्धिश्च स्यात्। परस्परं राश्यधिपौ वैरिणौ वेधदोषयुतौ च भवतः तर्हि द्विद्वादश त्रिकोण-नवमपञ्चमप्रभृतीनां कृते विहितदोषाणां फलानि सद्यो अशुभानि। स्त्री पुरुषराश्यधि पौ ग्रहौ मित्रे अथवा एकाधिपत्यं तयोः, यद्वा वश्यकूटं च स्यात्तयोः एष दोषो नैव भवति। स्त्रीनक्षत्रे पुरुषाणां, पुरूषनक्षत्रे स्त्रीणां च जन्म यदि स्यात्, स्त्रीपुरुषयोः जन्मराशयः वृषसिहकन्यावृश्चिकेषु अल्पसन्तानराशौ वा स्यात् अथवा स्त्रीराशितः पञ्चमराशै जातस्य पुरुषस्य विवाहवशात् सन्तानहीनत्वं भवति।

## १.४ राशिषु योनिप्रविभागः

(1) मरकमीनयोः पक्षियोनिः (2) कर्कवृश्चिकयोः सरीसृपयोनिः (3) मकरसिंहवृषमानां पशुयोनयः (4) मिथुनकन्यातुलाधनुकुम्भानां नरयोनयः। (अत्र मकरस्य पूर्वार्धं पशुयोनिः उत्तरार्धं पक्षियोनिश्च भवति)

(1) स्त्रीपुरुषरूयोन्यैक्यम् उत्तमम्। (2) पशुमानुषयोर्मध्यम्। (3) सरीसृपविहगयोः अधमम्। (4) एका मानवयोनि अपरा च तिर्यङ्योनिश्चेत् सर्वदा वर्ज्या।

## १.५ वश्यकूटम्

मेषादितः द्वादशराशीनां कृते क्रमशः वश्यराशयः कोष्टकद्वारा प्रदर्श्यन्यते। तद्यथा–

| | | | | | |
|---|---|---|---|---|---|
| | मीनः | मेषः | वृषभः | मिथुनम् | |
| | मकरः | सिंहः, वृश्चिकः | कर्कः, तुला | कन्या | |
| कुम्भः<br>मकरः | मेषः<br>मेषः, कुम्भः | मेषादितः द्वादशराशीनां<br>वश्यराशयः | | वृश्चिकः, धनुः<br>तुला | कर्कः<br>सिंह |
| | मीनः | कर्कः | मकरः, कन्या | मिथुनम्, मीनः | |
| | धनुः | वृश्चिकः | तुला | कन्या | |

मेषस्य कृते सिंहवृश्चिकौ वश्यौ भवतः। वृषस्य कृते कर्कतुले वश्यौ स्तः।

मिथुनस्य कृते कन्यावश्यराशिः कर्कस्य कृते धनुर्धरवृश्चिकौ वश्यौ स्तः। सिंहस्य कृते तुला वश्यः। कन्यायाः कृते मिथुनमीनौ वश्यौ स्तः। तुलायाः कृते कन्यामकरौ वश्यौ स्तः। वृश्चिकस्य कृते मीनः वश्यराशिः। मकरस्य कृते मेषकुम्भौ वश्यौ भवतः। कुम्भस्य तावत् मेषः वश्यः। मीनस्य वश्यः मकरो वर्तते।

स्त्रीजन्मराशीनां कृते पुरुषजन्मराशयः वश्याः स्युः तर्हि शुभाः। स्त्रीराशौ एव पुरुषजन्मराशिश्चेत् शुभम्। तद्यथा–

**''स्त्रीजन्ममस्यराशौ वश्याख्ये शुभदः पुमान् जातः।**

**अन्येन्दोर्वश्यर्क्षे स्वजन्म शुभदं वदन्त्यन्ये।'' इति**

## १.६ ग्रहमैत्री कूटम्

ग्रहाणां मैत्री तावदियम् अनया सारिण्या स्पष्टा भवति।

| ग्रहाः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| मित्राणि | गुरुः | बुधः | शुक्रः | चन्द्रः | रविः | कुजः | बुधः |
| | | गुरुः | बुधः | कुजः | चन्द्रः | बुधः | गुरुः |

| | | | | |
|---|---|---|---|---|
| | शुक्रः | बुधः | गुरुः | शुक्रः |
| | शनिः | शुक्रः | शनिः | |
| | | शनिः | | |

स्त्रीजन्मपुंजन्मराशिपग्रहौ यद्येकौ स्थास्यातः चेत्, अथवा तयोः जन्मराशिपग्रहौ मित्रे भवतः तदानीं शुभम्।

यो नरो यस्य स्त्रियादेर्जन्माधिपतेर्मूलत्रिकोणराशेः सुखार्थधीधार्ममृतिव्ययेषु तत् स्त्रियादे ग्रहस्योच्चराशौ च जातश्चेत्स नरस्तस्य स्त्रियादेमित्रं भवति। परेषु तदन्यराशिषु त्रिसप्तदशायतनुस्थानेषु तन्नीचस्थानेषु जातः शत्रुर्भवति। एतन्मित्रत्वं शत्रुत्वं च तज्जन्माधिपग्रहवशेन दृष्टव्यम्। एवं मित्रत्वे सति राशिकूटो ग्राह्यः शत्रुत्वे सति न सम्भवतीति।

**''यो यस्य जन्मेशनिजत्रिकोणात् सुखार्थधीधर्ममृतिव्ययेषु।**

**जातस्तदुच्चचे स तस्य मित्रं परेषु तत्स्वामिवशेन शत्रुः॥'' इति ॥**

## १.६ दिनानुकूल्यविचारः

जन्मर्क्षं नाम जन्मनक्षत्रम्। कर्मर्क्षं नाम दशमनक्षत्रम्। एकोनविंशतितम् नक्षत्रमाधानम्। अश्विनीमघामूलाश्च त्रीणि नक्षत्राणि जन्मकर्मआधानख्यानि। एवं भरण्यादितः त्रीणि त्रीणि नक्षत्राणि अग्रेऽपि जन्मकर्मआधाननक्षत्राणि भवन्ति। तत्र तृतीयपञ्चमसप्तमनक्षत्राणि विपत् प्रत्यक् वधताराः स्युः। स्त्रीजन्मर्क्षात् तृतीय-पञ्चम-सप्तमनक्षत्राणि पुंजन्मर्क्षाणि स्युः, तदानीं विवाहो अशुभदः। दशमनक्षत्रतः नाम कर्मनक्षत्रतः तृतीयनक्षत्रं पुरुषजन्मर्क्षचेत् तन्नक्षत्रस्य प्रथमं चरणं, प्रत्यक्तारायां चतुथं चरणं वधतारायां च तृतीय चरणं निषिद्धचरणानि। तदितरचरणानि शुभानि। आधाननक्षत्रस्य तृतीय-पञ्चम-सप्तमनक्षत्राणां क्रमशः 1-4-3 चरणानि पापांशागाः स्युः तर्हि तत्पादे जातः पुरुषोऽपि वर्ज्यः।

## १.७ माहेन्द्रकूटम्

स्त्रीजन्मर्क्षात् अतिदूरस्थं पुंजनार्क्षं शुभावहं भवति। पुरुषजन्मर्क्षात् चतुर्थकं स्त्रीजन्मर्क्षं

माहेन्द्रकूटमित्युच्यते। माहेन्द्रकूटश्चेत् धनधान्याभिवृद्धिः फलम्। पुरुषजन्मर्क्षात् सप्तमं स्त्रीजन्मर्क्षश्चेत् तस्य उपेन्द्रकूटेति नाम। उपेन्द्रकूटे स्त्रीसन्तानलाभो फलम्। दिनकूटे सप्तमं नक्षत्रं वर्ज्यमित्यूचुः। परन्तु माहेन्द्र कूटे सप्तमं नक्षत्रं ग्राह्यमित्यवदन्। अत्र तत्तद् सन्दर्भवशात् फलं कल्पनीयम्।

स्त्रीजन्मर्क्षात् पुरुषजन्मर्क्षं यावत् गणयेत्। वरस्य संख्यात्र पञ्चदशाभ्याधिकाश्चेत् स्त्रीदीर्घाख्यं कूटो भवति। कूटमिदं शुभदम्। यथोक्तम्- **''स्त्रीदीर्घं विश्वभात् परम्''।** इति।

## १.८ योनिकूटम्

योनिकूटे तावत् पक्षद्वयमस्ति। तत्र प्रथमः पक्षो यथा पुंनक्षत्रेषु पुरुषस्य जन्म, वनितातारे वधूजन्मचेत् महती सम्पत्समृद्धिः भवति। द्वयोःस्त्री ताराचेन्मध्यमम्। द्वयोरपि पुंस्तारा चेत् दोषदं भवति। योनिविरूद्धञ्चेत् कष्टफलम्।

स्त्रीपुरुषनक्षत्राणि अधोनिर्दिष्टानि सन्ति। तद्यथा-

| पुंनक्षत्रणि | | स्त्री नक्षत्राणि | |
|---|---|---|---|
| अश्विनी | मूला | कृत्तिका | धनिष्टा |
| भरणी | पूर्वाषाढा | रोहिणी | शतभिषक् |
| पुष्य | उत्तराषाढा | मृगशिरः | उत्तराभाद्रा |
| आश्लेषा | श्रवणम् | आद्रा | रेवती |
| मघा | पूर्वाभाद्रा | पुनर्वसुः | |
| उत्तरफलगुनी | | पूर्वफलगुनी | |
| स्वाती | | हस्ता | |
| विशाखा | | चित्रा | |
| ज्येष्ठा | | अनूराधा | |

स्त्री पुंनक्षत्रौद्भवा स्यात्, पुरूषः स्त्रीनक्षत्रोद्भवश्चेत् योनिविरूद्धता भवति। इयं कष्टा स्यात्।

योनिकूटे द्वितीयपक्षानुसारेण पुंनक्षत्रे जातस्य पुरूषस्य पुंनक्षत्रै जाता स्त्री अधमा प्रदिष्टा। पुंनक्षत्रै जातस्य पुरुषस्य स्त्रीनक्षत्रे जाता स्त्री उत्तमा, नपुंसक नक्षत्रजाप्युत्तमा भवति। स्त्रीनक्षत्रे जनितपुरूषस्य पुंनक्षत्रजाता स्त्री निन्द्या भवति। स्त्री नक्षत्र जाता मध्यमा। नपुंसकनक्षत्रे जाता अधमा भवति।

योनिकूटे द्वितीयपक्षानुसारेण स्त्रीपुरुषनपुंसकसंज्ञकनक्षत्राणि एतानि सन्ति। तद्यथा-

| 1 पुरुष संज्ञकनक्षत्राणि | | 2 स्त्रीसंज्ञकनक्षत्राणि | | 3 नपुंसकनक्षत्राणि |
|---|---|---|---|---|
| अश्विनी | पूर्वाभाद्रा | भरणी | ज्येष्टा | मृगशिरः |
| रोहिणी | उत्तराभाद्रा | कृत्तिका | पूर्वाषाढा | मूला |
| पुनर्वसुः | | आद्रा | उत्तराषाढा | शतभिषक् |
| पुष्यः | | आश्लेषा | धनिष्टा | |
| हस्ता | | मघा | रेवती | |
| अनूराधा | | पूर्वफल्गुनी | | |
| श्रवणम् | | उत्तरफल्गुनी | | |
| | | चित्रा, स्वाती, विशाखा | | |

## १.९ गणकूटम्

गणकूटे तवत् आहत्य गणत्रयं भवति। देवमानुषराक्षसगणञ्चेति। नक्षत्राणां क्रमशः विभागः गणानुगुण्येन एवं कृतमस्ति। तद्यथा-

| देवगणनक्षत्राणि(नव) | मानुषगणनक्षत्राणि (नव) | राक्षसगणनक्षत्राणि (नव) |
|---|---|---|
| रेवती | भरणी | कृत्तिका |
| अश्विनी | पूर्वफल्गुनी | आश्लेषा |
| अनूराधा | पूर्वषाढा | मघा |
| श्रवणम् | पूर्वाभाद्रा | चित्रा |
| स्वाती | आर्द्रा | विशाखा |
| पुनर्वसुः | उत्तराफल्गुनी | ज्येष्ठा |
| मृगशिरः | उत्तराषाढा | मूला |
| हस्ता | उत्तराभाद्रा | धनिष्टा |
| पुष्यः | रोहिणी | शतभिषक् |

उपर्युक्ताविभागे स्त्रीपुरुषनक्षत्रे देवराक्षसौ चेत् कलहः, नाम रेवासुरवर्गजत्वं कष्टम्। राक्षसमानुषं मरणम्। मानुषदेववर्गजत्वं भयप्रदम्। 'दम्पत्योशुभमेकवर्गजननमित्युक्तत्वात् स्त्रीपुरुषद्वयोरपि एकैव गणश्चेत् सम्पत्समृद्धिर्भवति। अत्र पुमान् देवजः स्त्री मानुषी चेत् शुभदा। पुमान् राक्षसः स्त्री मानुषी चेत् मध्यमा। मानुषगणस्य पुरुषः देवजा स्त्री चेत् नोत्तमा। स्त्री राक्षसी पुमान् मानुषश्चेत् निकृष्टो योगः वर्ज्यमित्याशयः।

## १.१० गोत्रकूटम्

अश्विन्यादीनां साभिजितामष्टाविंशतिभानां मरीच्यादयः सप्तर्षयः क्रमेण गोत्रप्रवर्तकाः भवन्ति। अष्टाविंशतिनक्षत्राणि सप्तगोत्रेषु विभक्तानि। अत्र कोष्टकद्वारा स्पष्टार्थं सूच्यते। तद्यथा-

| मरीचिगोत्रस्य नक्षत्राणि | वशिष्टगोत्रस्य नक्षत्राणि | अंगीरसगोत्र नक्षत्राणि | अत्रिगोत्रस्य नक्षत्राणि | पुलस्त्यगोत्रस्य नक्षत्राणि | पुलहगोत्रस्य नक्षत्राणि | कृतुगोत्रस्य नक्षत्राणि |
|---|---|---|---|---|---|---|
| अश्विनी | भरणी | कृत्तिका | रोहिणी | मृगशिर: | आर्द्रा | पुनर्वसु |
| पुष्य: | आश्लेषा | मघा | पूर्वफल्गुनी | उत्तरफल्गुनी | हस्ता | चित्रा |
| स्वाती | विशाखा | अनूराधाा | ज्येष्टा | मूला | पूर्वाषाढा | उत्तराषाढा |
| अभिजित् | श्रवणम् | धनिष्टा | शतभिषक् | पूर्वाभाद्रा | उत्तराभाद्रा | रेवती |

एवं स्त्रीपुरुषनक्षत्रै: सकाशाद् सप्तर्षीणां गोत्राण्यभिहानि ज्ञेयानि। तेषु कन्यावरौ द्वौ यद्येकर्षिगोत्रजौ स्त: तदा विवाहो विपत्तिं करोति। विभिन्नगोत्रजातयो उद्वाहेने ऐश्वर्यवृद्धि:। स्त्रीपुरुषलग्नस्फुटवशात् प्राप्तनक्षत्रे गौत्रैक्यं मध्यमम्। विभिन्नं चेत् उत्तमम्।

## १.११ पक्षिकूटम्

अश्विन्यादिपञ्चकषट्षट्पञ्चभानां भारूण्डादय: पञ्चपक्षिण: क्रमात् भवन्ति। तेषु स्त्रीपुंसयोर्द्वयो: एकपक्षित्वं श्रेष्टम्। भिन्नपक्षित्वं मध्यमम्। पक्षिशत्रुत्वं वर्ज्यम्। पक्षिकूटस्य विभागो यथा -

| भारूण्डक: | पिङ्गल: (उलूक:) | काक: | ताम्रचूड: (कुक्कुट:) | मयूरक: |
|---|---|---|---|---|
| अश्विनी | आर्द्रा | उत्तरफल्गुनी | ज्येष्टा | धनिष्टा |
| भरणी | पुनर्वसु: | हस्ता | मूला | शतभिषक् |
| कृत्तिका | पुष्य: | चित्रा | पूर्वाषाढा | पूर्वाभाद्रा |
| रोहिणी | आश्लेषा | स्वाति | उत्तराषाढा | उत्तराभाद्रा |
| मृगशिर: | मघा | विशाखा | श्रवणम् | रेवती |
| | पूर्वफल्गुनी | अनुराधा | | |

## १.१२ वेधानुकूल्यम्

वेधज्ञानाय ताराग्रहणानां पञ्चवर्गा: क्रियन्ते। एषां मध्ये यद्वर्गतारायां ग्रहस्तिष्टति स तद्वर्गं विध्यति। गृहविधौ वास्तुकर्मणि तन्नक्षत्रगणं त्यजेत्। स्त्रीपुरुषमेलकसम्बन्धी विचारेऽपि

तारावेधदोषो वर्ज्य एव। अस्मिन् कोष्टके ''पञ्चवर्गतारागणा'' उल्लिखिता एते सन्ति। तद्यथा–

| 1 | 2 | 3 | 4 | 5 |
|---|---|---|---|---|
| रोहिणी | भरणी | अश्विनी | मृगशिरः | कृत्तिकाः |
| आर्द्रा | पुष्यः | आश्लेषा | चित्रा | पुनर्वसुः |
| स्वाती | पूर्वफल्गुनी | मघा | धनिष्टा | उत्तरफल्गुनी |
| श्रवणम् | अनुराधा | मूला | | विशाखा |
| शतभिषक् | पूर्वाषाढा | रेवती | | उत्तराषाढा |
| | उत्तराभाद्रा | | | पूर्वाभाद्रा |

उर्युक्तकोष्टके प्रथम पङ्क्तौ वर्गतारागणे स्त्रीपुरुषयोः नक्षत्रमागतश्चेत् कण्ठवेधः, तत्फलं वैधव्यं प्रोक्तम्। द्वितीयपङक्तौ स्त्रीपुंसर्क्षश्चेत् कटिवेधः। तत्र दारिद्रयं फलं भवति। तृतीयवर्गे दम्पत्योर्नक्षत्रञ्चेत् पापवेधः। पापवेधदोषवशात् नानादेशपरिभ्रमणं भवति। चतुर्थवर्गे शिरोवेधः, तस्य मरणं फलम्। पञ्चमवर्गे कुक्षिवेधः। तस्य सन्ताननाशः फलम्। स्त्रीपुरुषयोः नक्षत्रम् एकस्मिन् वेधवर्गे अनागतश्चेत् तर्हि शुभम्।

मुहूर्ताभरणकाराणां मतेन वेधदोषस्य फलानि एते सन्ति। तद्यथा–

| कण्टवेधः | ऊरूर्वेधः | पादवेधः | कुक्षिवेधः | शिरोवेधः |
|---|---|---|---|---|
| वैधव्यम् | धननाशः | स्थानभ्रंशः | पुत्रनाशः | मरणम् |

प्रश्नमार्गकारणां मतेन वेधदोषस्य फलानि। एतदुक्तम् –

| शिरोवेधः | कण्टवेधः | नाभिवेधः | कुक्षिवेधः | पादवेधः | |
|---|---|---|---|---|---|
| पतिं हन्ति | स्त्रीनाशः | प्रजानाशः | कुलक्षयम् | स्थानभ्रंश | दारिद्रयञ्च |

पुनः अत्र दम्पत्योः एकैकस्य नक्षत्रवशात् वेधदोषो उच्यते। तद्यथा-

| नक्षत्रम् | वेधनक्षत्रम् |
|---|---|
| अश्विनी | ज्येष्टा |
| भरणी | अनूराधा |
| आर्द्रा | श्रवणम् |
| कृत्तिका | विशाखा |
| रोहिणी | स्वाती |
| आश्लेषा | मूला |
| मघा | रेवती |
| पुष्यः | पूर्वाषाढा |
| पुनर्वसुः | उत्तराषाढा |
| पूर्वफल्गुनी | उत्तराभाद्रा |
| हस्ता | शतभिषक् |
| उत्तरफल्गुनी | पूर्वाभाद्रा |

मृगशिराचित्राधनिष्टानक्षत्राणि परस्परं वेधनक्षत्राणि। एतानि ज्येष्टाश्विन्यादीनि द्वादशतारायुग्मानि त्रीण्यर्धतारायुग्मानि च अन्योन्यवेधात् न योगार्हाणि। एषु तारायुग्मेषु स्त्रीपुंसयोर्योगो न शुभ इत्यर्थः। अत्रार्धर्क्षेष्वपरार्धं वध्वाः पूर्वार्धं पुंसश्चेत् न दोषकृत्।

उक्ते अस्मिन् जन्मर्क्षवेधे सति स्त्रीपुंसयोः जन्मर्क्षराश्योः षष्टाष्टमराशियोगः वश्यग्रहैक्य मैत्र्यादिभिः बलवद्भिर्गुणयुक्तोपि तारावेधस्य प्राबल्यात् ग्रहाणां वश्यादिगुणान् बाधित्वा वधूवरौ समूलविनाशं निहन्ति। वश्यादिगुणेभ्योऽपि सवेधस्य षष्टाष्टमयोगस्यैव प्रावल्यामित्यर्थः।

## १.१३ भूतानुकूल्यविचारः

अश्विन्यादिकाः पञ्च षट् पञ्चसंख्यास्ताराः क्रमात् पृथिव्यादिपञ्चभूतात्मकाः भवन्ति।

स्पष्टार्थं अश्विन्यादिनक्षत्रेषु पृथिव्यादिपञ्चभूतानां प्रविभागबोधकचक्रम्।

| पृथिवीभूतम् | जलभूतम् | तेजोभूतम् | वायुभूतम् | आकाशभूतम् |
|---|---|---|---|---|
| अश्विनी | आर्द्रा | उत्तरफल्गुनी | अनुराधा | धनिष्टा |
| भरणी | पुनर्वसुः | हस्ता | मूला, ज्येष्ठा | शतभिषक् |
| कृत्तिका | पुष्यः | चित्रा | पूर्वाषाढा | पूर्वाभाद्रा |
| रोहिणी | आश्लेषा | स्वाती | उत्तराषाढा | उत्तराभाद्रा |
| मृगशिरः | मघा | विशाखा | श्रवणम् | रेवती |
| | पूर्वफल्गुनी | | | |

उपर्युक्तेषु पञ्चभूतेषु दम्पत्योर्जन्मताराया: भूतैक्यं शुभम्। भिन्नभूतत्वे वह्नम्बुयोगाः वर्ज्याः। वह्निवायुयोगो शुभः। पृथिवीभूतं सर्वैर्युतं शुभम्। आकाशभूतस्य योगः सर्वेषु मध्यमः।

## १.१४ रज्जुकूटम्

अश्विन्यादि भत्रयमादिमध्यशिरोज्वाख्यम्। रोहिण्यादिषु व्यस्तं शिरोमध्यादिरज्वाख्यम्। शिष्टं पुनर्वस्वादि भत्रयं रोहिण्यादिवत् शिरोमध्यादिरज्वाख्यमेव परतोऽपि ज्ञेयः। स्त्रीपुंसजन्मभे द्वे यद्येकरज्जुमाश्रितै स्तः तयोर्योगो न शुभः।

## १.१५ वयोकूटम्

वध्वाः वयसापेक्षया वरस्य वयः त्रिगुणं श्रेष्टमित्याहुः। कन्याया अपेक्षया वरस्य द्विगुणं वयस्तु मध्यमम्। स्त्रीयाः वयसापेक्षया वरस्य किञ्चदधिकं वयश्चेत् कष्टम्। वधोरपेक्षया वरस्य वयः किञ्चिदपि न्यूनं वर्तते चेत् कुलनाशो वाच्यः।

## १.१६ मनोकूटम्

दम्पत्योः निर्व्याजेन अन्योन्यम् आसक्तिः विशेषतः शुभदा प्रोक्ता। अन्यकूटानां न्यूनतायामपि मनोकूटं विद्यते चेत् वैवाहिकजीवनं सुखप्रदं भवति।

"**यस्यां मनः समासक्तं तामेव वुधः विवहेत्।**" मनोगुणकूटं सर्वेषां कूटानाम् अपेक्षया अधिकं शुभदो वर्तते।

### १.१७ आयव्ययनिर्देशक्रमः

स्त्रीजन्मभात् पुंजन्मभं यावत् संगुण्य तत्सख्यायाः कृते विशिखैः (पञ्चभिः) संगुण्य सप्तभिः भाजयेत्तदा शेषः शिष्यते व्ययः। तद्वत् पुंजन्मभात् स्त्रीजन्मभं यावत् संगणय्य तत्ससंख्यायाः कृते पञ्चभिस्संगुण्य सप्तभिः हरेत्। शेषो भवति आयः। शेषो नावशिष्यते चेत् सप्तसंख्या एव शेषेमिति परिगणनीया। अत्र सर्वसम्पदवाप्तये आयाधिक्यं ग्राह्यम्। व्ययाधिक्ये तु हस्तस्थधनस्य नाशः दरिद्रता वा स्यात्।

### १.१८ चोलानुकूल्यम्

अश्विनीतः कन्याजन्मनक्षत्रं यावत् गणयेत् तथा वरनक्षत्रं यावत् गणयेत्। संगणितसंख्यायुग्मस्य ऐक्यं कृत्वा तद्योगस्य कृते त्रयोदशसंख्यां संयोज्य संकलनफले द्वात्रिशद्भि अपनीय शेषं पञ्चभिः भाजयेत्।

एकशेषश्चेत् पुत्र सन्तानवृद्धिः, द्वयमवशिष्टचेत् द्वयोरपि मरणं, शेषत्रयश्चेत् धनवृद्धिः, चतुःशेषञ्चेत् महारोगः, पञ्चशेषश्चेत् सम्पत्समृद्धिः। अत्र द्वात्रिंशद्भिः विशोधनं कर्तुमशक्यते चेत् स्त्रीपुरुषयोः जन्माभात् अश्विनी यावत् संगण्य तत्संख्यया पूर्वोक्तसर्वाः क्रियाः कार्याः।

### १.१९ ऋणधनानुकूलज्ञानविधिः

ऋणधनानुकूल्यज्ञानाय नक्षत्राणां वर्गत्रये विभागो क्रियते। तत्र दम्पत्योः नक्षत्रवर्गैक्यत्वं विशिष्य तत्तन्नाम फलप्रदं भवति। परन्तु तयोः भिन्नवर्गश्चेत् विशिष्य व्ययः ऋणप्राप्तिश्च भवति।

**वर्गत्रयं यथा**

| **प्रथमवर्गः** | **द्वितीयवर्गः** | **तृतीयवर्गः** |
|---|---|---|
| आर्द्रा, हस्ता, पूर्वाषाढा, उत्तराभाद्रा, | कृत्तिका, रोहिणी, मृगशिरः, मघा, पूर्वफल्गुनी, उत्तरफल्गुनि अनूराधा, ज्येष्टा, मूला, धनिष्टा शतभिषक्, पूर्वाभाद्रा, | अश्विनी, भरणी, पुष्यः, आश्लेषा, चित्रा, स्वाती, विशाखा, उत्तराषाढा, श्रवणम् रेवती |
| फलम् अभिवृद्धि | ऐश्वर्यवृद्धिः | व्ययः ऋणप्राप्तिश्च |

### १.२० कूटानां फलनिर्देशक्रमः

दिनानुकूल्यात् दीर्घायुष्यप्राप्तिः, माहेन्द्रकूटेन पुत्रपौत्रादिसिद्धिः, स्त्रीदीर्घकूटात् माङ्गल्यप्राप्तिः, योनिकूटतः स्थिरसम्पत्तिः, गणकूटात् अन्योन्यं रमणीयतां च चिन्तयेत्। अत्र दम्पत्योर्वयसानुकूल्येन मनोहारित्वं फलं प्रोक्तं केचन आचार्यैः।

**ग्राह्याग्राह्य-कूटानि**

दम्पत्योः श्रेयोभिवृद्धये विंशतिधा प्रोक्तेषु आनुकूल्येषु प्रधानानि (1) राशिः (2) राश्यधिपः (3) वश्यः (4) माहेन्द्रः (5) योनिश्च।

पूर्वप्रतिपादितानि कूटानि यानि सन्ति तेषु राशिकूटं, ग्रहमित्रत्वं माहेन्द्रकूटं, गणकूट, योनिकूटं, दिनकूटं, स्त्रीदीर्घकूटञ्चेति अष्टौ विवाहयोगाः प्रधानतः कथिताः।

इत्थम् अध्यायेऽस्मिन् प्रोक्तेषु आनुकूल्येषु वश्य, माहेन्द्र, योनि-राशि-राश्यधि पञ्चेति पञ्चकूटानि बहुनां सम्मतत्वात् ग्राह्यानि। दम्पत्योः श्रेयोभिवृद्धये पञ्चकूटानि सम्यक् विलोकनीयानि। अवशिष्टेषु कूटेषु यथा सम्भवं ब्राह्मणां कृते गोत्रकूटं क्षत्रिय वैश्यशूद्राणां कृते विशिष्य जातिकूटं नियमतः चिन्तनीयम्।

***

## प्रश्नावली

I. संक्षेपेण उत्तर लिखित। 5x6=30

1 विवाहघटने प्रोक्तानां कूटानां नामानि कानि?

2 द्विद्वादशत्रिकोणचिन्तनक्रमं वर्णयत?

3 मनोकूटस्य वैशिष्ट्यं किम्?

4 आयव्ययनिर्देशक्रमं वर्णयत?

5 कूटानां फलनिर्देशविधिं निरूपयत?

II. विस्तरेण उत्तरं विलिखत- 10x3=30

1 राशिषु योनिविभागपुरस्सरं ग्रहमेत्रीकूटं विशदयत?

2 योनिकूटबेधानुकूल्यकूटयोः वर्णनं कुरुत।

3 वश्यकूटमधिकृत्य लघुनिबन्धं रचयत।

III. निबन्धात्मकप्रश्नयो उत्तरं लिखत- 20x2=40

1 गणगोत्रपक्षिकूटनां विषये विस्तरेण निबन्धमेकं रचयत?

2 सापवादं षष्टाष्टकविचारस्य वर्णनपुरस्सरं ग्राह्याग्राह्यकूटानां वर्णनं विशदीकुरुत?

*******

श्री:

।। द्वाविंशोऽध्याय:।।

## १.० अवतरणिका

अये छात्रा:!

पूर्वस्मिन् अध्याये भवन्त: विवाहे मेलकविषयमधिकृत्य पठितवन्त:। इदानीं गोचरमाश्रित्य विचरो विधीयते। तत्र जन्मराशित इदानीतनग्रहवशेन शुभाशुभनिरूपणं गोचरमित्युच्यते। आकास्था: सर्वे ग्रहा: स्व स्व कक्षायां स्वगत्या परिभ्रमन् एकराशित अन्यराशौ प्रविशन्ति। जन्मसमये एते ग्रहा: यद्यद् राशौ व्यवस्थिता: सन्ति: तत्तद्राशि: तेषां जन्मकालिकावस्थाम् अभिव्यञ्जयति। ते एव ग्रहा: जातके जन्मकालिकग्रहा इति व्यपदिश्यन्ते। परन्तु जन्मसमयानन्तरं कस्यापि समये ते स्वीयगत्या तस्मिन्नेव राशौ पुन: सञ्चरिष्यमाणा: विलोक्यन्ते, तद्राशौ तेषां स्थिति: गोचरमिति नाम्ना व्यवहरिष्यते। 'गो' शब्द: गम् धातुना व्युत्पन्न:, तस्यर्थमस्ति सञ्चरणम्। सन्ति आकाशे तारा: कोटिश:। प्राय: ता: सर्वा: स्थिरा:। ताराणाम् अपेक्षया ग्रहाणां पृथक्कत्वं दर्शयितुं तेषां नाम 'गो' अर्थात् सञ्चरन्ति खे खेचरेति नाम प्रदत्तमस्ति। चरशब्दस्यार्थ अस्थिर:। अस्थिरावस्थायां ग्रहस्य परिवर्तनवशात् यत् प्रभावमुत्पद्यते स एव गोचर:। गोचरग्रहाणां प्रभाव: तेषां राशिपरिवर्तनवशात् व्यत्यस्थो भवति। वर्तमानसमये जातकस्य शुभाशुभज्ञानाय सरलतया उपयुज्यमानसाधनमस्ति ग्रहगोचरविधि:। वर्षस्य शुभाशुभं गुरुमन्दयोर्वशात्, मासस्य शुभाशुभं सूर्यत:, दिनस्य शुभाशुभं चन्द्रात् गोचरेण ज्ञातुं शक्यते। वस्तुत: गोचरफलं यस्य कस्यापि ग्रहस्य वा भवतु तत्तद्ग्रहफलं तदितरप्रत्येकग्रहस्य स्थिते आनुकूल्येन एव वदेत्, न तु तदग्रहस्थितिं केवलं चन्द्राधिष्टितराशेर्वशात्। विशिष्य अष्टकवर्गेऽपि चन्द्रस्य स्थितिवशादेव अन्यग्रहाणां फलं विलिख्यते। अत: कदाचित् अष्टकवर्गस्यैव एकस्य भागस्य विस्तृतं वर्णनं गोचरमिति उच्यते चेत् नास्ति अतिशयोक्ति:। गोचरफलचिन्तनप्रसङ्गे चन्द्रात् ग्रहाणां स्थिति: कुत्र वर्तते इति विचार्य तदृशात् फलनिर्णय: क्रियते। जातकेऽपि फलचिन्तनं लग्नवत् चन्द्रादपि क्रियते। अत: चन्द्रस्य स्थानं लग्नापेक्षया न न्यूनम्। तस्मात् फलदीपिकाकार: मन्त्रेश्वरोपि ब्रूते-

**''सर्वेषु लग्नेषु सत्सु**

**चन्द्रलग्नप्रधानं खलु गोचरेषु।'' इति॥**

यद्यपि शास्त्रे एकस्मिन् चिन्त्यविषये षड्लग्नानि चिन्तनीयानि इति ऊचुः। तानि च लग्नचन्दलग्नेशचन्द्रादिष्टितराशीशलग्ननवांशकश्च चिन्त्याः। तथापि तेषु सर्वत्र गोचरविचारावसरे चन्द्रलग्नस्यैव प्राधान्यम्। ऋषिभिः गोचरफलानिर्णयाय एकस्य तादृशग्रहविशेषस्य चयनं कृतमस्ति। सः ग्रहश्चेदपि लग्नरूपेणापि परिगणितो भवति। अतः गोचर फलकथनप्रसङ्गे जन्मकालिकचन्द्रमेव अवलम्ब्य फलादेशः कार्यः न तु लग्नामाश्रित्य।

शास्त्रेऽस्मिन् सत् असत् सदसदिति त्रिविधानि कर्माणि प्रोक्तानि। तत्र असत्कर्माणां नाम अदृढकर्मणां फलपाकद्योतकम् अष्टकवर्गगौचरो स्तः। यतः ''दशाप्रभेदेन विचिन्तयेद्दृढं दृढेतरं चाष्टकवर्णगौचरैः'' इत्युक्तिः। किञ्च अदृढकर्मणां फलं शान्त्यादिना उपशमनं कर्तुं शक्यम्। तस्मात् असत् कर्म फलाभिव्यञ्जने प्रवृत्तो गोचफलविचारः अत्र प्रस्तुतो प्रधानः विषयः।

**उद्देश्यानि**

* **रविगोचरफलम्**
* **चन्द्रगोचरफलम्**
* **भौमगोचरफलम्**
* **बुधगोचरफलम्**
* **गुरूगोचरफलम्**
* **शुक्रगोचरफलम्**
* **शनिगोचरफलम्**
* **गोचरफलकालविशेषः**
* **ग्रहपुष्पाणां वर्णाः**
* **ग्रहाणां रत्नानि दानवस्तुनि च**
* **गोचरस्थान-वेध-प्रतीपवेधश्च**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

वाराहीसंहितायां वराहमिहिराचार्याः ग्रहगोचरफलं सविस्तरेण प्रतिपादयामासुः। प्रश्नमार्गकाराः तद् ग्रहचारफलं संक्षेप्य अस्मिन् अध्याये वर्णयन्ति। तत्रादौ रविगोचरफलमाहुः। तद्यथा–

## १.१ रविगोचरफलम्

जन्मसमये चन्द्रादिष्टितराशितः (जन्मराशितः) तन्वादिद्वादशराशिषु सूर्यस्य चारवशात् फलानि कोष्टकद्वारा एवं सूच्यन्ते।

| **भावः** | **फलम्** |
|---|---|
| सूर्यः जन्मनि (जन्मराशौ)स्थिते | देहायासः विभवक्षयः, मार्गसञ्चारः, रोगश्च |
| सूर्यः जन्मराशितः द्वितीये स्थिते | धननाशः, अन्यै सकाशाद् वञ्चना,, नेत्ररोगश्च |
| सूर्यः जन्मराशितः तृतीये स्थिते | स्थानप्राप्तिः, शत्रुक्षयः धन संग्रहः, अरोगता च |
| सूर्यः जन्मराशितः चतुर्थे स्थिते | स्त्रीसुखस्य कृते विघ्नं, रोगः दुःखञ्च |
| सूर्यः जन्मराशितः पञ्चमे स्थिते | शत्रुपीडा, रोगः दुःखादयश्च |
| सूर्यः जन्मराशितः षष्टे स्थिते | रोगशमनं, शत्रुनाशः, दुःखनाशः |
| सूर्यः जन्मराशितः सप्तमे स्थिते | दूरसञ्चारः, दैन्यत्वम्, उदररोगश्च |
| सूर्यः जन्मराशितः अष्टमे स्थिते | स्त्री वैमुख्यं, राज्ञः भीतिः, रोगश्च |
| सूर्यः जन्मराशितः नवमे स्थिते | आपत्तिः, दैन्यता, महारोगः सद्वृत्तैर्भङ्गश्च |
| सूर्यः जन्मराशितः दशमे स्थिते | सकलकार्यसिद्धिः जयश्च |
| सूर्यः जन्मराशितः एकादशे स्थिते | स्थानलाभः, ऐश्वर्याभिवृद्धिः रोगान्मुक्तिः |
| सूर्यः जन्मराशितः द्वादशे स्थिते | सद्वृत्तौ भङ्गः असफलता च |

द्वादशराशिषु आदित्यगोचरफलं संक्षेपेण एवं भाव्यम्। अत्र जन्मराशेः षष्ठ तृतीयदशमेकादशस्थो सूर्यः शुभः। परिशेषस्थानेष्वशुभः।

## १.२ चन्द्रगोचरफलम्

जन्मराशितः तन्वादिद्वादशराशिषु चन्द्रस्य चारवशात् फलानि कोष्टकद्वारा एवं प्रदर्श्यन्ते। तद्यथा-

| **भावः** | **फलम्** |
|---|---|
| चन्द्रः गोचरवशात् जन्मराशौ स्थिते सति | मृष्टान्नभोजनं, शयनसुखं, विशिष्य वस्त्रदीनां लाभश्च। |
| चन्द्रः जन्मराशितः द्वितीये | सकलक्रियासु विघ्नानि, मानहानिः, द्रव्यनाशश्च |
| चन्द्रः जन्मराशितः तृतीये | भार्यासुखम्, वस्त्रलाभः, धनलाभश्च। |
| चन्द्रः जन्मराशितः चतुर्थे | भयम्। |
| चन्द्रः जन्मराशितः पञ्चमे | बहुविधदुःखम्, रोगः, मार्गे विघ्नम् |
| चन्द्रः जन्मराशितः षष्टे | धनलाभः, सौख्यं, शत्रुरोगादिनाशश्च |
| चन्द्रः जन्मराशितः सप्तमे | सम्यक्भोजनं, सन्मानं, धनलाभः, शयनसुखञ्च |
| चन्द्रः जन्मराशितः अष्टमे | अग्निभयम् |
| चन्द्रः जन्मराशितः नवमे | बन्धनं, भयम्, उदररोगश्च |
| चन्द्रः जन्मराशितः दशमे | राजप्रवृत्तिः |
| चन्द्रः जन्मराशितः एकादशे | बन्धुसमागमः, धनवृद्धिश्च |
| चन्द्रः जन्मराशितः द्वादशे | सत्प्रवृत्तौ दोषः, धनव्ययञ्च |

अत्र चन्द्रमा तावत् तृतीयस्थाने, दशमे, षष्टे सप्तमे जन्मनि च स्थितः शुभः। शेषेष्वशोभनः

## १.३ भौमगोचरफलम्

जन्मराशेः सकाशाद् तन्वादिद्वादशराशिषु भौमस्य गौचरफलानि कोष्टके प्रदर्शितानि। तद्यथा-

| भावः | फलम् |
|---|---|
| भौमः जन्मराशिगते सति | शरीरभङ्गः कार्येषु भङ्गश्च |
| भौमः जन्मराशितः द्वितीये | नृपचोरवह्निरिपुभिः पीडा, अग्निरोगभयम्, दुःखम् शरीरकृशता च |
| भौमः जन्मराशितः तृतीये | सुवर्णादि धात्वादिना द्रव्यलाभः, सुब्रम्मण्यप्रसादः शत्रुनाशश्च |
| भौमः जन्मराशितः चतुर्थे | दुर्जनसङ्गः, उदररोगः, ज्वररक्तस्रावश्च |
| भौमः जन्मराशितः पञ्चमे | शत्रुभयम्, व्याधिभयम्, पुत्रोद्भवशोकश्च |
| भौमः जन्मराशितः षष्टे | शत्रुवियोगः, कलहभयम् ताम्रसुवर्णादिवस्तूनां लाभश्च |
| भौमः जन्मराशितः सप्तमे | कलत्रकलहः, उदररोगश्च |
| भौमः जन्मराशितः अष्टमे | अङ्गभङ्गः, रक्तदोषः, मानभङ्गः, मनोभङ्गश्च, |
| भौमः जन्मराशितः नवमे | धननाशः, रोगः, कार्ये अपयशश्च |
| भौमः जन्मराशितः दशमे | नानाप्रकारेण अर्थागमः। |
| भौमः जन्मराशितः एकादशे | स्थानलाभः, सुखं, जनपदस्वामित्वञ्च |
| भौमः जन्मराशितः द्वादशे | नानाप्रकारकदुःर्व्ययः, पित्तरोगः, नेत्ररोगः, रक्तदोषश्च |

द्वादशराशिषु संक्षेपेण गोचरवशात् भौमः षष्ठ तृतीय-दशमैकादशगतः शुभः। शेषेष्वशुभो भवति।

## १.४ वुधगोचरफलम्

जन्मराशितः तन्वादिद्वादशराशिषु बुधस्य गोचरफलानि। तद्यथा-

| भावः | फलम् |
|---|---|
| जन्मराशिस्थे बुधे सति | स्वबन्धुकलहः, दुःर्वचोभिः दूरदेशसञ्चारः, धननाशश्च |
| बुधः जन्मराशितः द्वितीये | धनप्राप्तिः, मित्राणां वृद्धिः, कुटुम्भ वृद्धिश्च |
| बुधः जन्मराशितः तृतीये | शत्रुभयं, राजभयञ्च |
| बुधः जन्मराशितः चतुर्थे | धनप्राप्तिः, बान्धवानां वृद्धिः, कुटुम्भवृद्धिश्च |
| बुधः जन्मराशितः पञ्चमे | भार्यापुत्रादिभिस्सह सर्वदा कलहः |

| | |
|---|---|
| बुधः जन्मराशितः षष्टे | कार्ये विजयोन्नतिः, स्थानप्राप्तिः |
| बुधः जन्मराशितः सप्तमे | कलहः |
| बुधः जन्मराशितः अष्टमे | कार्येषु जयः, पुत्रसुखम्, धनलाभः, वस्त्रलाभः |
| | मनोसुखसामार्थ्यवृद्धिश्च |
| बुधः जन्मराशितः नवमे | अनेकप्रकारकगेगः |
| बुधः जन्मराशितः दशमे | शत्रुनाशः, सुमधुरवागविलासः स्त्रीसुखम्, धनलाभश्च |
| बुधः जन्मराशितः एकादशे | सुखं, कार्ये विजयः, सर्वदा भार्या-पुत्रसुहृद्भिश्च तुष्टिः |
| बुधः जन्मराशितः द्वादशे | शत्रोः सकाशाद् अपजयः, रोगपीडा च |

## १.५ गुरुगोचरफलम्

जन्मराशितः तन्वादिद्वादशराशिषु गुरोः गोचर फलानि स्पष्टार्थं कोष्टके प्रदर्श्यन्ते। तद्यथा-

| भावः | फलम् |
|---|---|
| गुरौ जन्मगे सति | स्थानभ्रंशः, धनहानिः, कलहः, बुद्धिमान्द्यश्च |
| गुरूः जन्मराशितः द्वितीये | द्रव्यलाभः, शत्रुक्षयः, स्त्रीसुखानिच |
| गुरूः जन्मराशितः तृतीये | स्थानभ्रंशः, कार्यविघातः |
| गुरूः जन्मराशितः चतुर्थे | बान्धुवनिमित्ताद् क्लेशः, सर्वत्र सुखाभावः |
| गुरूः जन्मराशितः पञ्चमे | अश्ववृषभप्रभृत्यादि वाहनोपभोगः पशूनां लाभः वाहनलाभः सन्तानसुखं, सुवर्णाभरणरत्नानां प्राप्तिः स्त्रीसुखं गृहलाभश्च |
| गुरूः जन्मराशितः षष्टे | सुखसाधने सत्यपि सुखाभावः |
| गुरूः जन्मराशितः सप्तमे | धीवाङ्निपुणता, कार्यसिद्धिः, धनलाभः, स्त्रीविषयसुखं च |
| गुरूः जन्मराशितः अष्टमे | महद्दुःखं, रोगः, बन्धनं, स्वातन्त्र्यहानिः, सर्वदा मार्गे सञ्चारश्च, |

| | |
|---|---|
| गुरू: जन्मराशित: नवमे | धनलाभ:, भार्यासुखं, पुत्रसुखं, कार्यसिद्धि:, निपुणता, शक्त्यादीनां वृद्धिश्च |
| गुरू: जन्मराशित: दशमे | स्थाननाश:, द्रव्यनाशश्च |
| गुरू: जन्मराशित एकादशे | इष्टार्थसिद्धि अन्यस्थानप्राप्ति: |
| गुरू: जन्मराशित: द्वादशे | उग्रं दु:खम् दीर्घमार्गाटनञ्च |

## १.६ शुक्रगोचरफलम्

जन्मराशित: तन्वादिराशिषु शुक्रस्य गोचरफलानि।

| भाव: | फलम् |
|---|---|
| जन्मराशिगते शुक्रे सति | मृष्टान्निभोजनं, प्रेयसी संगम:, कस्तूर्यादिसुगन्धवस्तूनां प्राप्ति: शयनसुखं, पीताम्बरादिवस्त्राणां लाभ: भोगजीवनञ्च |
| शुक्र: जन्मराशित: द्वितीये | धनधान्यलाभ:, पुष्परत्नादीन्यलङ्कारणां प्राप्ति:, कुटुम्भसुखं, यथेच्छम् एश्वर्यानां भोगश्च |
| शुक्र: जन्मराशित: तृतीये | स्वाभिप्रायस्य आदर:, धनलाभ: सन्मानं, वस्त्रलाभ: शत्रुनाशश्च |
| शुक्र: जन्मराशित: चतुर्थे | बान्धवानां युति:, इन्द्रसदृशमैश्यर्यवृद्धि:। |
| शुक्र: जन्मराशित: पञ्चमे | धनलाभ:, पुत्रलाभ: मित्रसुखं, गुरो: सन्तोषश्च, |
| शुक्र: जन्मराशित: षष्टे | पराजय:, शत्रुपीडा च |
| शुक्र: जन्मराशित: सप्तमे | स्त्रीहेतुकोपद्रवा: |
| शुक्र: जन्मराशित: अष्टमे | गृहालङ्कारोपकरणां प्राप्ति:, स्त्री प्राप्ति:, रत्नलाभ:, भोगसिद्धि: |
| शुक्र: जन्मराशित: नवमे | धर्मकार्ये प्रवृत्ति:, धनलाभ:, वनितासंयोग:, सैख्यप्राप्तिश्च |
| शुक्र: जन्मराशित: दशमे | कलह:, अपमानञ्च |
| शुक्र: जन्मराशित: एकादशे | आहारसुखं, सुगन्धद्रव्यलाभ:, बन्धुसुखञ्च |
| शुक्र: जन्मराशित: द्वादशे | बहुविधद्रव्यलाभ: वस्त्राभरणवृद्धिश्च, |

## १.८ शनिगोचरफलम्

जन्मराशितः तन्वादिद्वादशराशिषु शनेः गोचर फलानि।

| भावः | फलम् |
|---|---|
| जन्मराशिगते शनैश्चरे सति | विषभयं, अग्निभयं, बन्धुनाशः, अन्यदेशगमनं, स्वजनविरहः, धननाशः, दूराटनंच |
| शनिः जन्मराशितः द्वितीये | धनसौख्यनाशः, देहकान्तेर्नाशः, कामस्य मन्दता च |
| शनिः जन्मराशितः तृतीये | महिषगजादितः धनलाभः, आरोग्यं,सर्वकार्येषु सिद्धिश्च |
| शनिः जन्मराशितः चतुर्थे | कुटिलात्मता, भार्याविरहः, धननाशः, स्वातन्त्र्यहानिः, सर्वत्र कलहश्च |
| शनिः जन्मराशितः पञ्चमे | पुत्रविरहः |
| शनिः जन्मराशितः षष्टे | शत्रुरोगादीनां शमनम् |
| शनिः जन्मराशितः सप्तमे | भृत्यस्त्री संगमः, दूरदेशाटनं च |
| शनिः जन्मराशितः अष्टमे | स्वजन विरहः दीनस्वभावश्च |
| शनिः जन्मराशितः नवमे | वैरत्व, बन्धनप्राप्तिः आत्मधर्महानिश्च |
| शनिः जन्मराशितः दशमे | हृदयरोगः, विद्याकीर्तिः, धनक्षयः, कर्मफलप्राप्तिश्च, |
| शनिः जन्मराशितः एकादशे | अन्यस्त्रीसंगमः, धनलाभः, प्रतापोन्नतिः। |
| शनिः जन्मराशितः द्वादशे | अनवरत दुःखं, जले मुहुः मुहुः मज्जनं च |

इत्थं ग्रहाणां चार एव नृणां शुभाशुभं कुरूते, परन्तु ग्रहपूजाद्यैः मुदितः ग्रहः शुभमेव करोति कदाचित् अनिष्टगोऽपि।

## १.८ गोचरफलस्य कालविशेषः

गोचरस्थौ रविकुजौ आद्यद्रेष्काणे सञ्चरिष्यमाणकाले शुभाशुभफलं प्रयच्छतः। गोचरगतौ गुरूशुक्रौ मध्यद्रेष्काणे विचरणसमये शुभाशुभफलं प्रयच्छतः। शनिचन्द्रौ विशिष्य अन्त्यद्रेष्काणे

चारवशात् परिभ्रमणकाले फलदातारौ भवतः। परन्तु गोचस्थः बुधः सर्वदा राशिसञ्चारकाले फलं ददाति। गोचरवशात् अनिष्टस्थाने स्थिताः ग्रहाः अनिष्टफलं प्रदास्यन्ति। इष्टस्थाने स्थिता इष्ट फलप्रादायकाः भवन्ति। अनिष्टस्थाने स्थितो ग्रहः सौम्यरनीक्षितश्चेत् अशुभफलमेव प्रदास्यति। स्वस्थाने व्यवस्थितः ग्रहः पापेक्षितः पूर्णफलं न प्रयच्छति। पूर्वोक्तग्रहाणाम् एतत् फलम् आदिमध्यान्त्ये विशिष्य चिन्तयेत्। शुभाशुभफलम् अवशिष्टेषु कालेषु सामान्यफलमिति ज्ञेयम्।

## १.९ ग्रहपुष्पाणां वर्णाः

सूर्यकुजयोः रक्तवर्णस्य पुष्पेन, चन्द्रशुक्रयोः श्वेतवर्णपुष्पेन, शनिराह्वोः कृष्णवर्णस्य पुष्पेण बृहस्पतिं पीतवर्णस्य पुष्पेण, बुधं हरिद्वर्णस्य पुष्पेन, केतोर्विचित्रवर्णस्य पुष्पेण च पूजयेत् ग्रहपूजायाम्। पूर्वोक्तग्रहाणां रत्नान्यपि सूचितानि। अतः तेषां ग्रहाणां कृते विहितरत्नानां धारणेन, पुनग्रहाणां कृते कथित तत्तद्वर्णस्य वस्त्राणा धारणेन, तेषां ग्रहाणां स्तुत्या, नमस्कारेण तत्तद्ग्रहाणां मन्त्रैर्जपहोमतर्पणमार्जनाद्यैश्च अमीग्रहाः तुष्यन्ति।

## १.१० ग्रहाणां रत्नानि दानवस्तूनि च

दुःस्थानस्थित ग्रहाणां संत्रप्तये सूर्यादिग्रहाणां कृते धार्यमाणरत्नानि देय-द्रव्याणि च कथ्यन्ते।

**ग्रहाणां रत्नानि दानवस्तूनि च**

| सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
|---|---|---|---|---|---|---|---|---|
| माणिक्यम् | मौक्तिकम् | विद्रुमम् | गारुत्मकम् | पुष्यरागम् | वज्रम् | नीलम् | गोमेधम् | वैडूर्यकम् |
| कपिलाधेनुः | शङ्खम् | लोहितव-र्णस्य वृषः | सुवर्णम् | पीताम्बरम् | रजतम् श्वेताश्वम् | कृष्णागोः | लोहः | अजः गजश्च |

गोचरे यद्ग्रहकृतं दौष्ट्यं तस्य ग्रहस्य तुष्ट्यै तद्रत्नं धार्यमित्यभिप्रायः। विशिष्य ग्रहगोचरे ग्रहाणाम् अनिष्टफलानि संसूचितानि स्युः, तेषां निवृत्यर्थं उपर्युक्त तत्तद्ग्रहस्य वस्तूनां दानेन ग्रहाः संत्रप्ताः सन् इष्टफलदातारो भवेयुः।

## १.१२ गोचरस्थान-वेध-प्रतीपवेधश्च

ग्रहगोचरफलप्रदं स्थानं, वेध: विपरीतवेधश्च गोचरफलनिर्णये हेतुभूतानि सन्ति। अत: ते च हेतव: वक्ष्यन्ते।

स्व-स्व-अष्टकवर्गे चन्द्रात् यस्मिन् स्थाने अक्षाधिक्यं वर्तते (यत्र बाहुल्येन बिन्दव: दृष्टा: स राशि:) चन्द्रत: तदिष्टस्थानत्वात् तत् स्थानं गोचरस्थानेति वदन्ति। इदं स्थानानि सञ्चारवशेन तत्तद्ग्रहस्य आगमनसमये इष्टस्थानम् चन्द्रास्थितस्थानत: तृतीय-षष्ट- दशमैकादशस्थानेषु गोचरवशात् सूर्यस्य सञ्चारकाल इष्टफलदायक:। पूर्वोक्तानि स्थानि वेद्यस्थानानि। अस्मिन् गोचरराशौ एकग्रह: विद्यमानसमये तद्वेध स्थाने अन्य: ग्रह: यद्यायाति तदा गोचरग्रहवेद्यको भवति। तदा गोचरफलं न लभ्यते। फलम् अवरोधितो भवति। वेधराशौ ग्रह: विद्यमानसमये गोचरराशौ यद्येको ग्रहो आगतश्चेत् वेधराशिस्थग्रह: विपरीतवेधेन वेधितो भवति। तदा अशुभफलं न सम्भवति। सूर्य: तृतीये विद्यमानसमये नवमे वेधराशौ यद्यन्यो ग्रहा आगताश्चेत् वेधितग्रह: स्पष्टेफलं न ददाति। इत्थं नवमराशौ स्थितस्य ग्रहस्य वेधराशि: तृतीय:। तत्र अन्योग्रहो आगतश्चेत् विपरीतवेधेन विद्ध: सन् नवमस्थाने स्थितस्य अनिष्टफलं न सम्भवति।

जन्मराशित: लाभगृहस्थिता: सर्वेग्रहा: शुभदा: भवन्ति। तत्र विशिष्य तृतीय षष्ठदशमस्थानानि शुभानि। वक्रार्कजौ षष्ट तृतीयस्थानप्राप्तौ शुभौ। त्रिदशषट्सप्ताद्यगश्चन्द्रमा शुभ:। शुक्र: सप्तमषष्ठदशमस्थानानि विहाय अन्यस्थानेषु शुभद:। गुरु: सप्तनवद्विपञ्चमग: शुभ:। सौम्य: षष्टद्वितीयचतुर्थदशमाष्टमस्थानगत: शुभ:। एतेषां गोचरस्थाने गोचरवेधं कुर्वाणो वेधस्थाने स्थितो ग्रह: गोचरफलं स्थगयति।

जन्मराशित: सूर्य: तृतीयषष्टदशमैकादशस्थानेषु शुभद:। शनिं विहाय तदितरग्रहा: सूर्यस्य वेधं न कुर्वन्ति चेत् सूर्यस्य शुभफलं लप्स्यते। शनैश्चरस्य सूर्यपुत्रत्वात् वेधो नास्ति।

**सूर्यस्य शुभविद्धस्थनानि** तद्यथा-

| | | | | |
|---|---|---|---|---|
| शुभस्थानानि | 3 | 6 | 10 | 11 |
| विद्धस्थानानि | 9 | 12 | 4 | 5 |

अत्र जन्मराशितः तृतीयनवमयोः षष्टद्वादशयोः दशमचतुर्थयोः, एकादशपञ्चमयोः क्रमात् वेधं वदन्ति। वेधस्थाने ग्रहो आगतश्चेत् सूर्यः विद्धो भवति। यदि सूर्यः विद्धश्चेतू शुभस्थाने स्थितश्चेदपि अशुभफलमेव प्रदास्यति।

**चन्द्रस्य शुभविद्धस्थानानि**

| | | | | | | |
|---|---|---|---|---|---|---|
| शुभस्थानानि | 1 | 3 | 6 | 7 | 10 | 11 |
| विद्धस्थानानि | 5 | 9 | 12 | 1 | 4 | 8 |

चन्द्रस्य कृते बुधवेधो नास्ति। अतः विद्धस्थानेषु बुधं विना यः कोऽपि ग्रहो न भवेत्। कदाचित् विद्धस्थाने यः कोऽपि ग्रह वर्तते चेत् विद्धचन्द्रः शुभ स्थानगतोऽपि अशुभफलमेव दास्यति।

**भौमस्य शुभविद्धस्थानानि**

| | | | |
|---|---|---|---|
| शुभस्थानानि | 3 | 6 | 11 |
| विद्धस्थानानि | 12 | 9 | 5 |

अत्र विद्धस्थाने यः कोऽपि ग्रहः स्थितश्चेत् शुभमंगलोऽपि अशुभमंगलो भवति। यद्यपि अत्र शनेः स्थितिरपि कुजसदृशं एव। शनेः सूर्यस्य वेधो न विद्यते।

**बुधस्य शुभविद्धस्थानानि**

| | | | | | | |
|---|---|---|---|---|---|---|
| शुभस्थानानि | 2 | 4 | 6 | 8 | 10 | 11 |
| विद्धस्थानानि | 5 | 3 | 9 | 1 | 8 | 12 |

अत्र विद्धराशिस्थाने चन्द्रं विना तदितरग्रहाणां वेधवशात् बुधो अशुभमदो भवति।

**गुरोः शुभविद्धस्थानानि**

| | | | | | |
|---|---|---|---|---|---|
| शुभस्थानानि | 2 | 5 | 7 | 9 | 11 |
| विद्धराशिस्थानानि | 12 | 4 | 3 | 10 | 8 |

गोचरे शुभस्थाने स्थितो गुरुः पूर्णफलं तदानीमेव दातुं समर्थः यदा सः विद्धरहितो भवेत्।

**शुक्रस्य शुभविद्धस्थानानि**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शुभस्थानानि | 1 | 2 | 3 | 4 | 5 | 8 | 9 | 11 | 12 |
| विद्धराशिस्थानानि | 8 | 7 | 1 | 10 | 9 | 5 | 11 | 3 | 6 |

अत्र गोचरे शुभस्थाने स्थितो शुक्रः विद्धदोषरहितश्चेत् शुभफलं प्रयच्छति।

इत्थं गोचरे वेधान्विताः ग्रहाः सत्फलं न हि दिशन्ति। एते ग्रहाः वामवेधविधिना अशोभनाऽपि शुभफलमेव दिशन्ति। गोचरस्थोऽपि ग्रहः वैरिनिरिक्षितः शुभं न करोति तथैव शत्रुनीचादिस्थानगतस्य ग्रहस्य गोचरः न शुभप्रदः।

अन्ते सूयादीनां वेद्यवेधकराशिद्वन्द्वानि कोष्टके एवम् उल्लिखितानि सन्ति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| जन्मराशितः सूर्यस्य वेद्यवेधकद्वन्द्वानि | वेद्यः | 3 | 6 | 10 | 11 | | | | | |
| | वेधकः | 9 | 12 | 4 | 5 | | | | | |
| चन्द्रस्य प्रोक्तानि वेद्यवेधकद्वन्द्वानि | वेद्यः | 1 | 3 | 6 | 7 | 10 | 11 | | | |
| | वेधकः | 5 | 9 | 12 | 2 | 4 | 8 | | | |
| कुजमन्दयोः वेद्यवेधकद्वन्द्वानि | वेद्यः | 3 | 6 | 11 | | | | | | |
| | वेधकः | 12 | 9 | 5 | | | | | | |
| बुधस्य वेद्यवेधकद्वन्द्वानि | वेद्यः | 2 | 4 | 6 | 8 | 10 | 11 | | | |

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| | वेधकः | 5 | 3 | 9 | 1 | 8 | 12 | | | |
| गुरोः वेद्यवेधकद्वन्द्वानि | वेद्यः | 3 | 5 | 7 | 9 | 11 | | | | |
| | वेधकः | 12 | 4 | 3 | 10 | 8 | | | | |
| शुक्रस्य वेद्यवेधकद्वन्द्वानि | वेद्यः | 1 | 2 | 3 | 4 | 5 | 8 | 9 | 11 | 12 |
| | वेधकः | 8 | 7 | 1 | 10 | 9 | 5 | 11 | 3 | 6 |
| शनैश्चरस्य वेद्यवेधक द्वन्द्वानि | वेद्यः | 3 | 6 | 11 | | | | | | |
| | वेधकः | 12 | 9 | 5 | | | | | | |

शनिवत् राहुकेतोरपि वेद्यवेधाकद्वन्द्वानि ज्ञेयानि।

गोचरे एभिः वेधविद्धाः सर्वे ग्रहाः विफला स्युः। विपरीतवेधविद्धः पापग्रहोऽपि सौम्यतां याति। इत्थं ग्रहणां वेधाविद्धयोः बलाबलं तेषां पाकस्य गुणदोषम् अज्ञात्वा निर्दिशन्ति ते मूढाः। तेषाम् आदेशः विफलाः स्युः। किञ्च अन्ते निर्दिश्यते यत् जन्मर्क्षादेव ग्रहगोचरफलसम्भवं ज्ञेयम्। एतत् परं रहस्यं वसिष्टोक्तं गोचरगदितमिति।

***

## प्रश्नावली

I. संक्षेपण उत्तर लिखित 5X6=30

1 गोचरफलचिन्तनस्य औचित्यं लिखत।

2 जन्मराशित: तत्वादिद्वादशराशिषु सूर्यस्य गोचरफलं विलिखत।

3 ग्रहाणां गोचरफलप्रदाने कालविशेष्ज्ञं निरूपयत।

4 ग्रहाणां रत्नानि दानवस्तूनि च कानि?

5 ग्रहपुष्पाणां वर्णा के?

II. विस्तरेण उत्तरं विलिखत 10X4=40

1 जन्मराशित: तन्वादिद्वादशराशिषु चन्द्रस्य चारवशात/ फलानि कानि?

2 भौमगोचरफलं सुस्पष्टयत।

3 शनै: गोचरफलं निरूपयत।

4 गुरो: गोचरफलं निरूपयत।

III. निबन्धात्मकप्रश्नयो उत्तरं लिखत 12½X2=25

1 ग्रहगोचरफलप्रदं स्थानं वेध: विपरीतवेधस्य च विषये विस्तरेण लिखत।

2 बुधाशुक्रयो: गोचरफलं सम्यक् निरूपयत।

*******

<u>श्रीः</u>

।। त्रयोविंशोऽध्यायः।।

## १.० अवतरणिका

अये छात्राः!

पूर्वं द्वाविंशाध्याये भवन्तः गोचरफलमधिकृत्य पठितवन्तः। इदानीं रोगचिन्तनावसरे प्रोक्तकर्मविपाकस्य विषये कथ्यते। पूर्वजन्मनि सदादियत्कर्म अर्जितं तस्य परिपाकं होराशास्त्रं समभिव्यनक्ति। कर्मफलानि द्विविधानि दृढ कर्मोपार्जितानि अदृढकर्मोपार्जितानि च। **''दशाप्रभेदेन विचिन्तयेद्दृढम्''** इत्युक्तत्वात् दृढकर्मोपार्जितानि तानि दशभिर्व्यज्यन्ते। तानि च प्राग्जन्मार्जितकर्मफलानि अवश्यम् अनुभोक्तव्यतया प्रयत्नानां सहस्रेणाप्यपरिहार्याणि। तथापि प्रायश्चित्ताद्यनुष्टानेन तन्यल्पवीर्याणि भवन्ति। तेन च बहुकालफलदानि स्वल्पकालफलदानेन, अतिक्रूरफलदानि अल्पाल्प क्रूरफलदानेन चरितार्थानि भवन्ति। **''दृढेतरं चाष्टकवर्गगोचरै''** इत्युक्तत्वात् अदृढकर्मोपार्जितानि अष्टकवर्गगोचरादिना व्यज्यन्ते। तानि च प्रायश्चित्तादिना परिहर्तुं शक्यन्ते। अतः जातकशास्त्रेण प्रश्नशास्त्रेण च ज्ञातानां दृढकर्मार्जितानां निर्वीर्यतासम्पादनम् अदृढकर्मार्जितानां सर्वात्मना विनाशाय कर्मविपाकाध्यये प्रायश्चित्तानि उदीरितानि। प्राग्जन्मार्जितानि अशुभानि कर्माणि यानि सन्ति तेषां कृते विहितकर्मानुष्टानेन सर्वात्मना अनिष्टफलानि विनष्टानि भवन्ति। अतः प्राग्जन्मार्जित-अशुभकर्मणां वशात् जायमानरोगाणां हेतुः तत्प्रतिक्रियायाश्च प्रतिपादने प्रवृत्तं कर्मविपाक अत्र प्रस्तुतः प्रधानः विषयः।

**उद्देश्यानि** -

- **राजयक्ष्म (क्षयः) कार्श्यरोगयोः कारणं तद्रोगद्वयोः प्रायश्चितं च।**
- **कुष्टरोगस्य हेतुः तत्परिहारोपायश्च**
- **विसर्प-पाण्डुरोग-ग्रहणीरोगस्य च कारणानि तेषां रोगाणां परिहारोपायश्च**
- **मुख-अर्श-नेत्र-नक्तान्ध-कर्ण-जिह्वा-वातश्चेति सप्तरोगाणां हेतवः तेषां प्रायश्चित्तानि च**
- **शूल-प्रमेह-महोदर शर्करा-अश्वरी-मूत्रकृच्छ्र-अग्निमान्द्य-भगन्धर-कर्ण-शिर-**

**अस्रग्दर- अपस्मार-उन्माद-ज्वरप्रभृतिरोगाणां हेतवः तेषां परिहारोपायश्च**

- **ज्वर-दाह-व्रण-अरुचि-छर्दि-मूकत्व-स्वरनाश-कामिलगुन्मप्रभृतिरोगाणां हेतवः परिहारोपायश्च सर्वरोगशान्तिः**
- **प्रश्नावली**

प्रश्नमार्गकाराः पूर्वं त्रयोदशाध्याये रोगचिन्तनक्रमे कर्मविपाकम् अग्रे प्रोच्यते इत्यवोचन्। इदानीं शास्त्रकाराः रोगस्य हेतुः तत्प्रायश्चित्तान्वेषणक्रमं सायणमाधवाचर्यैः कर्मविपाकसंहितायां प्रतिपादितानुसारेण अत्र संवर्णयन्ति। तत्रादौ क्षयरोगस्य कारणानि तत्प्रायश्चित्तानि च प्रतिपादयामासुः।

## १.१ राजयक्ष्मकार्श्यरोगयोः कारणं तद्रोगद्वयोः प्रयाश्चित्तं च

राजयक्ष्म (क्षयरोगः) रूजः कारणमस्ति यत् पूर्वजन्मनि कृतदेवब्राह्मणहिंसा, गुरूजनद्वेषः, परदोषवर्णनं, ग्रहणादि पुण्यकाले स्त्रीसंगश्च एतादृश महादोषकारकपातकै अयं रोगोत्पत्तिर्भवति।

तत्परिहाराय विष्णुसहस्रनामजपः, रूद्रसक्तपठनं, इन्द्राग्निसूक्तजपप्रभृत्यनुष्टान विधाय ततः परं चिकित्सादिकं क्रियते चेत् रोगस्य अपनोदनं भवति। **''पूर्वजन्मकृतं पापं व्याधिरूपेण पिडिता। तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः''।** इति इत्यावोचन्। अतः सर्वेषां रोगाणां कृते चिकित्सा प्रायश्चित्तानन्तरमेव करणीयम्।

कार्श्यरोगस्य हेतुरस्ति अन्नस्य चौर्यम् अन्य ग्रासमध्ये प्रवेशश्च स्मृतौ प्रोक्तौ। अतः तस्य शान्त्यै सुवर्णस्य शंकरप्रतिमां विधाल्य जपानुष्टानानन्तरं दानं देयम्। तेन रोगशान्तिर्भवति।

## १.२ कुष्ठरोगस्य हेतुः तत्परिहारोपापश्च

ब्रह्महत्या, गुरूभार्यागमनं, विश्वासेन आगतानां रोगिणां कृते दुःश्चिकित्साप्रयोगश्च कुष्ठरोगस्य कृते कारणानि।

तद्रोगपरिहाराय रूद्रसूक्तजपः, आयुः सूक्तजपः, सुवर्णेन निर्मितसूर्यवृषभयोः प्रतिमायाः दानं विहितम्। कुष्माण्डमाहामन्त्रजपः तन्मन्त्रेणैव होमश्च विधेयः।

कांस्यपात्र-कार्पास-लवण-वासोहरणप्रभृतिदोषेण श्वेतकुष्ठरोगो सम्भवति। अतः पूर्वं कुष्टरोगस्य कृते यानि प्रोक्तानि प्रायश्चित्तानि सन्ति तान्येव श्वेतकुष्ठरोगस्यापि कार्याणि।

## १.३ विसर्प-पाण्डुरोग-ग्रहणीरोगस्य च कारणानि तेषां रोगाणां परिहारोपायश्च

| रोगाणां नामानि | रोगस्य हेतु | विहितं प्रायश्चित्तविधिः |
| --- | --- | --- |
| विसर्पः | सर्पाणां हननं सर्पद्वारा अन्येषां-हिंसा प्रदानेन च | स्मृतौ प्रोक्तरीत्या विधिना सुवर्ण सर्पदानं कार्यम्। |
| पाण्डुरोगः | देवस्वापहरणं, ब्राह्मणानां धनहरणं अभक्ष्य भक्षणञ्च (मद्यमांसादीनि) | कुष्माण्डहोमः सुवर्णदानं च कार्यः। |
| अतिसारः | वापीकूपादीनां नाशः, | रूद्रसूक्तजपः आयुः सूक्तजपश्च |
| ग्रहणीरोगः | अपत्यापहरणं देवस्वापहरणञ्च | कृष्णवर्णस्य गोदानं अग्निदेवता-प्रतिमादानं रूद्रसूक्तजपः, आयुसूक्तजपश्च |

## १.४ मुख-अर्श-नेत्र-नक्तान्ध-कर्ण-जिह्वा-वातश्चेति सप्तरोगाणां हेतवः तेषां प्रायश्चित्तानि च

| रोगस्यनाम | रोगस्य हेतुः | विहितं प्रायश्चित्तम् |
| --- | --- | --- |
| मुखरोगः | ओष्टच्छेदनं, दन्तभङ्गः, रसनाभेदः गुरूनिन्दा, अनृतभाषणं, कूटसाक्षी कथनवशाच उपर्युक्तपापकृत्यैः मुखभागे दन्ते च रोगाः सम्भवन्ति। | कुष्माण्डमन्त्रहोमः, गायत्रीजपः, सुवर्णगजप्रतिमादानं, साक्षात् स्वहस्तेन औषधधान्यादीनां दानानि। |
| अर्शरोगः चिकित्सादिकं | देवब्राह्मणधनानाम् अपहारः, अन्नापहरणं, उपरागादिकाले स्त्रीगमनं पशुहिंसा च | सुवर्णधेनु प्रतिमादानं विधाय कारयेत्। |
| नेत्ररोगः | कृतोपकारं विस्मृत्य कृतघ्नता प्रदर्शनं, छद्मना अन्यवनितां सन्दर्शेन गुप्तव्यवहारकरणं अन्यसाक्षीविनाशनञ्च | सुवर्णदानं मृद्गान्नपायसदानं घृतदानं गरुडप्रतिमादानञ्चेति नेत्ररक्षामन्त्रस्य जपं विधााय होमादिना परिहारो भवति |

| | | |
|---|---|---|
| नक्ताधरोग: | गवां नयननाशनम् | सुवर्णगोपालप्रतिमादानेन शान्तिर्भवति |
| कर्णरोग: | पिशुनतावशात् श्रवणच्छेदनं परकार्ये विघ्नोत्पादनस्य कारणेन च अन्यजन्मनि सञ्चितानि कर्णरोगस्य हेतुभूतानि दुरितानि एतानि सन्ति। | सुवर्ण-धान्य-कम्बलादीनि दानानि प्रोक्तानि भूदानोऽपि विहित: सूर्यमन्त्रजपेन परिहारो वाच्य:। |
| जिह्वारोग: | गुरुनिन्दा, परपीडनं परिजिह्वाच्छेदनञ्च | धान्यौषधे दानत्वेन विहितौ। यजुर्वेदे प्रोक्तकुष्माण्डमन्त्रहोम:, राहुमन्त्रजप:, ऋषिभि: प्रोक्तानि अन्यानि सूक्तानि। |
| वातरोग: | सभ्यानां निन्दा तातजनन्योर्द्वेष: गुरुद्वेषणं अन्नस्य अपहृतिश्च | ताम्रस्य मृगप्रतिमां विधास्य वस्त्रे निक्षिप्य देयं दानम्। अन्नदानं सुवर्णदानं वा कार्यम् वातप्रशमनकरवायुसम्बन्धी वायुसूक्तजप: कार्य: ऋच वा जषेत्। |

## १.६ शूल-प्रमेह-महोदर-शर्करा-अश्वरी-मूत्रकृच्छ्र अग्निमान्द्य-भगन्धर- कर्ण-शिर-अस्रग्धार-अपस्मार-उन्माद-ज्वरप्रभृतिरोगाणां हेतव: तेषां परिहारोपायश्च

| रोगस्य नाम | रोगस्य हेतु: | विहितं प्रायश्चितम/ |
|---|---|---|
| शूलरोग: | कन्या-पशु-विधवा-दाशस्यादिषु गमनं, अभक्ष भक्षणं आचारहीनता पिशुनता अपश्यवस्तूनां दानं विश्वस्तस्य विषार्पणं, शूलेन हननं च | तिलदानं, सुवर्णपद्मदानं सुवर्णेन-रजतादिना वा निर्मितं त्रिशूलदानं च |
| प्रमेहरोग: | तापसीस्त्रीगमनं, पशुकन्यकागुरपत्नी-विधावादिषु च गमनं गुरुद्वेष:, ब्राह्मणस्य धनकनकादीनां हरणं परपीडनं च, मात्रगमनं- इक्षुमेधयस्य सहोदरी गमनं, भ्रातस्त्री गमनं मधुमेहस्य | सर्वरोगकारक मन्त्रेण होम:, सुवर्णगोदानं जलदानं, पक्वान्नदानं वारुणीमन्त्रजपश्च |

| | | |
|---|---|---|
| महोदररोगः | गुरुपत्नीगमनं गर्भपातश्च | रूद्रसूक्तजपः वारुणि सूक्तानां जपः जलदानं सुवर्णेन निर्मितमकरदानञ्च |
| शकरारोगः अश्मरी मूत्रकृच्छ्ररोगः | कन्यायपशुविधावादीनां च संगमः विशिष्य बाह्मणपीडा अपमानं निन्दा-दुःखञ्च | सुवर्णकमलदानं तिलदानं च |
| अग्निमान्द्यः | अनवद्धाग्नौ होमकरणेन | अग्निदेवताकमन्त्रजपः कथित |
| भगन्धरः | रक्षकानाम् आज्ञोल्लघनं गुरुणामाज्ञोल्लघनं गुरुस्त्रीगमनञ्च | रत्न-रजत-सुवर्णादि दानानि, सुवर्णेन रंचितं गजप्रतिमां प्रदाप्ययेत गायत्री जपः आदित्य सूक्तं रूद्रसूक्तजपश्च कार्यः |
| कर्णरोगः | फलापहरणम् | नवग्रहशान्तिः रत्नदानञ्च |
| शिरोरोगः | ब्रह्मद्वेषः | उपवीतदानम् |
| अस्रग्दरारोगः | अश्वत्थपूर्वोत्तमवृक्षाणां छेदनं, गवां हननं च | रक्तधेनुं सम्पूज्य दानं देयम् |
| अपस्मारः | गुरोर्वधः स्वामिवधश्च | सर्वरोगपरिहारक आरोग्यसूक्तानं जपः होमश्च |
| उन्मादः | गुरुनिन्दा अगम्यागमनं परद्रव्यापहारः न विधितमिति वाग्वेत्तिः | स्वर्णेन निर्मितं गजप्रतिमानदानम् |
| ज्वररोगः | सर्पहननं गुरुनिन्दा गुरुभार्या गमनञ्च | महादुर्गामन्त्रेण आम्रफलहोमः कथितः |

## १.७ ज्वर-दाह-व्रण-अरूचि-छर्दि-मूकत्व-स्वरनाश-कामिल-गुन्मप्रभृतिरोगाणां हेतवः तेषां परिहारोपापश्च

| रोगस्य नाम | रोगस्य हेतुः | विहितानि प्रायश्चितानि |
|---|---|---|
| ज्वरः<br>शीतज्वरः<br>उष्णज्वरः | श्वानादिपशुवर्गाणां कृते भयोत्पादनम् | पञ्चदुर्गामन्त्रजपः, रूद्रसूक्तजपः, आदित्यहृदयपारायणश्च शीतज्वरस्य कृते, विष्णोः कृते क्षीराभिषेकः पञ्चामृताभिषेकश्च |
| चातुर्थिकज्वरः | | उष्णज्वरश्चेत् शिवस्य कृते उष्णोदकाभिषेकः विहतः शिवस्य कृते। |
| दाहरोगः | गुरुस्त्रीगमनादिपापानि | जलदानेन दाहरोगस्य शान्तिर्भवति |
| व्रणरोगः | शाकादीनां चौर्यं, परवाग्विघातः, परवधः अनुचितस्त्रीसंगमश्च पादोत्थानां व्रणानां गुरुपत्नीगमनं हेतुः विशिष्य हस्तोत्थानां व्रणानां भ्रूणहत्या तावत् कारणम्। | द्विजेभ्यः रत्नदानं यथाशक्त्या देयम् |
| अरूचिः | अश्रद्धया दानम् | अन्नदानम् |
| छर्दिः | विश्वासहननम् | जलदानम् |
| मूकत्वम्<br>स्वश्नाशश्च | वाक्चौर्यम् मूकत्वात् स्वरनाशः | रत्नमयी वाग्देव्याः प्रतिमादानम् |
| कामिलः | पादप्रक्षालनं विना भोजनं, अप्रक्षालितपात्रे तण्डुलपाचनं च | सुवर्णेन गरूडप्रतिमा निर्माय दानं दातव्यम् |
| गुन्मरोगः | गुरौ वैराधिाक्यं गुरोः निर्बन्धनं परेषु असूया, आहारापहारश्च | इन्द्राग्नि सूक्तेन होमः रूद्रसूक्तं, वायुसूक्तं, अष्टक्षरीमन्त्रीजपः पञ्चाक्षरीमन्त्रजपः श्रीराममन्त्रः गायत्री जपः गणपतेः सुवर्णमयी प्रतिमादानं च कथितानि |

## १.९ सर्वरोगशान्तिः

गुन्मरोगस्य कृते लोहदानं, कुष्टस्य कृते रजतं, वात रोगस्य कृते क्षीरदानं, नेत्ररोगस्य कृते सुवर्णं घृते निक्षिप्य प्रदद्यात्। सर्वाङ्गवदेना रोगस्य कृते शय्या-खट्वादिकानां च दानं प्रोक्तम्। उदररोगस्य कृते भूदानं देयम्। रोगिणां कृते एतादृश प्रायश्चित्तेन जन्मान्तरीयपापस्य परिहारो भवति।

अर्शरोग-भगन्धरादिरोगानां च शमनार्थं सुवर्णदानं रत्नदानं च कर्तव्यम्। सर्वरोगप्रशमनाय शिवसहस्रनाम-शतरूद्र-रूद्रसूक्तादीनां जपः सर्वोत्तमः। आरोग्यसम्पत्तये विशिष्य पूर्वं विहितानि अनुष्टानानि जपादयश्च कार्याणि। तेन तत्तद्रोगस्य परिहारो अवश्यं भवति।

धनिकः नृपादयश्च आरोग्यचिकित्सायाः कृते धर्मार्थं शालां स्थापयेत्। रोगिणां कृते चिकित्सादिकं विधीयताम्। एवं च रोगार्तानां सेवयाऽपि महत्फलं लभ्यते।

इत्थम् आरोग्यदानं सर्वेषां दानानामपेक्षया उत्तमं स्मृतम्। आत्मनः सुखमिच्छताजनेन प्रयत्नतोऽपि तत् कार्यमित्याशयः। यद्यपि कर्मविपाकः बृहद्ग्रन्थश्चेदपि तस्य सारं अस्मिन् अध्याये संक्षेपेण प्रतिपादितमस्ति।

***

# प्रश्नावली

I. संक्षेपण उत्तरं लिखित 5x7=35

1 राजयक्ष्मकार्श्य रोगयो: कारणं किम? तद्रोगनिवृत्तये विहितं प्रायश्चितं च किम?

2 कुष्टरोगस्य हेतु तत्परिहारोपापश्च क:?

3 सर्वरोगशान्ते: प्रकारं निरूपयत?

4 मुख-अर्श-नेत्र-रोगाणां हेतव: के?

5 रोगचिन्तनावसरे कर्मविपाकस्य औचित्यं स्पष्टयत्।

II. विस्तरेण उत्तरं विलिखत- 10x4=40

1 शूल-प्रमेह-महोदर-शर्करा-अश्मरी-मूत्रकृश्च्छ्रादि रोगाणां हेतव: तेषां च कृते विहितपरिहारोपाया: के?

2 आग्निमान्ध-भगन्धर-कर्ण-शिर-अस्रग्धाररोगाणां हेतव: तेषां च प्रशमनोपाया: के?

3 कर्ण-जिह्वा-वातश्चेति रोगत्रयाणां हेतव: तेषां च कृते विहितप्रायश्चित्तानि कानि?

4 विसर्प-पाण्डुरोग-ग्रहणीरोगाणां च कारणानि तद्रोगाणां प्रशमनोपायश्च के?

III. प्रश्नद्वयस्य कृते निबन्धं रचयत्- 12½x2=25

1 ज्वर-दाह-व्रण-अरूचि-छर्दि-मूकत्वादि रोगाणां हेतव: के:? तेषां कृते विहित-परिहारोपायाश्च के?

2 स्वरनाश कामिल-गुन्मप्रभृतिरोगाणां कारणानि तेषां रोगाणां कृते विहितानि प्राश्चित्ता च कानि?

*******

<u>श्रीः</u>

## ।। चतुर्विंशोऽध्यायः।।

### 1.0 अवतरणिका

अये छात्राः!

पूर्वं त्रयोविंशाध्याये भवन्तः कर्मविपाकस्य विषये अधीतवन्तः। साम्प्रतं देवप्रश्न- राजप्रश्न- युद्धप्रश्न-मृगयाप्रश्नश्चेति चत्वारः प्रश्नविचाराः विधीयन्ते। तत्र देवप्रश्ने तावत् देवालये आदौ अस्ति देवानां सान्निध्यं विचार्यमाणो विषयः। यतो हि देवस्थाने देवानां सान्नध्यमेव तत्र आगन्तुकान् भक्तान् आकर्षकयति अनुगृह्णाति च। अनुगृह्णातुम् अर्चनोपाधि भूतमुर्तौ नियतं भगवतः सन्निधानं वर्तते चेत् तदानीमेव श्रेयः प्राप्तिर्भविष्यति। भगवद् सन्निधाने प्रच्युतिः सञ्जायमाणे सति तद् विज्ञाय दोषस्य अपाकरणं कुर्यात्। किञ्च दोषाणां कृते विहितप्रायश्चित्तादिना भगवतः सान्निध्यवृद्धिं कारयेत्।

इदानीं मम जातके समयः समीचीनं वर्तते, तथाप्यऽहं कष्टेऽस्मि कारणं किम्? जन्मान्तरीयकर्म फलबोधके जातके सूच्यमाणं फलं सम्यक् विद्यते चेदपि मम कष्टम् इहजन्मनः कस्य लोपदोषवशात् आगतमस्ति? अस्माकं ग्रामे विद्यमानदेवालयः जीर्णावस्थायां स्थितोऽस्ति। अतः तत्र स्थितो विग्रहः न विलोक्यते। तस्मात् देवालयस्य जीर्णोद्धारानन्तरं केषां देवानां प्रतिष्टां तत्र कारयेत्। पूर्वम् आसन् कानि देवतासान्निध्यानि तस्मिन् देवालये। अस्माकं भूभृत् युद्धे विजयं प्राप्नोति वा न वा? अस्माकं दुःखवस्थायाः हेतुभूतबाधाः काः? सञ्जनित विपत्तीनां कृते को हेतुः? कैः सकाशाद् एताः विपत्तयः समागताः। स्वविपत् परम्परायाः अपाकरणमार्गोपायाः के सन्ति? मृगयाप्रश्नो यदि विधीयते तस्य समाधानं कथं कार्यमिति, पूर्वोक्त चतुर्णां प्रश्नानां कृतेऽपि समाधानम् अत्र प्रधान्येन क्रियन्ते।

उद्देश्यानि -

- **तन्त्रसमुच्चयानुसारेण देवप्रश्नविधिः**
- **देवतासान्निध्यहानेः कारणानि**
- **देवालये बिम्बानाम् आधाराधेयभावः, देवप्रश्नस्य औचित्यं च**

- ग्रहैः राशिभिश्च देवताभेदचिन्तरक्रमः
- देवभावाः प्रकारान्तरेण देवभावचिन्तनक्रमश्च
- सर्वसम्मतदेवभावाः
- देवभावानां गुणदोषपचिन्तनविधिः, बिम्बादिभावैः दोषचिन्तनक्रमश्च
- नैवेद्यादिषु दोषचिन्तनक्रमः
- अष्टबन्धचिन्तनविधिः
- दैवमानुषप्रश्नस्य भेदचिन्तनविधिः
- राज्ञः प्रश्ने भूपतेर्विषये भावचिन्तनक्रमः
- राज्ञः भाग्यं, युवराजादीनां चिन्तन, राज्ञः स्थानप्राप्तिश्च
- राजोचित उपायनप्राप्तिः नैकाप्राप्तिश्च
- युद्धप्रश्नः
- युद्धे विजयसूचकलक्षणानि
- शत्रोरागमनकालनिर्णयः
- युद्धे सन्धेर्लक्षणानि
- युद्धलक्षणं स्थायीयायीभावयोर्विचारश्च
- पराशरमतेन योद्धु अङ्गविभागः
- माधवीयमतानुसारेण ध्वजधनुखड्गधारणविधिः
- वाराहीसंहितोक्तयुद्धाद्यनिष्टलक्षणानि
- युद्धसूचकानि अवलक्षणानि
- रणरङ्गे प्रवेशाय कालविशेषः
- परिघदण्डदिक्शूलविचारश्च
- प्रयाणाय विहिताः वासराः तेषां फलानि च
- यात्रालग्नतः द्वादशभावस्थग्रहफलानि
- यात्राया आरम्भविधिः

- **प्रयाणार्थं शुभशकुनानि**
- **सूर्यकालाग्निचक्रं, राशिचक्रं भूबलं च**
- **मृगयाप्रश्नः**
- **सूर्यादिग्रहैश्चिन्तनीयाः मृगाः**
- प्रश्नावली

## १.१ तन्त्रसमुच्चयानुसारेण देवप्रश्नविधिः

देवप्रतिष्टाकर्त्रको ब्राह्मण आसने उपविश्य सकलीकृत आत्मपूजां विधाय, गुरूगणाधि नाथं च सम्पूज्यं, ब्राह्मणान् सुवर्ण-गो-वस्त्रदिदानेन सन्तोष्य, दैवज्ञेन सूचिते निर्दोषे लग्ने देवं प्रतिष्टापयेत्। प्रतिष्ठाया अनन्तरं प्रत्येकस्मिन् वर्षे इदं प्रतिष्टादिनं पर्वदिनवत् आचरिष्यमाणव्यवस्थां कारयेत्। अनने देवाः सन्तुष्टाः सन् सकलसम्पत्प्रदारो भवन्ति। तस्मात् स्व-भक्तजनान् अनुगृहीतुम् अर्चनोपाधि भूतमूर्तो नियतं दैवसान्निध्यम् अपेक्षितमस्ति। तदानीमेव श्रेयः प्राप्तिश्च भवति। दैवसान्निध्ये प्रच्युतिं विज्ञाय दोषाणाम् अपाकरणं कृत्वा प्रायश्चित्तादिना सान्नध्यवृद्धिं कुर्यात्।

## १.२ देवतासान्निध्यहानेः कारणानि

1 देवालये जननवशात्,

2 कस्यपि मृतेः कारणात्,

3 देवालयस्य प्राङ्गणे मण्डपादौ मलमूत्ररक्तादीनां पतनस्य कारणेन,

4 पतित-अन्त्यजजनानां देवालये प्रवेशस्य कारणेन,

5 अशौचादौ देवालयप्रवेशेन जायमानअशुद्धेर्वशात्,

6 उलूकः-गृधृ-करट-शुनक-गर्दभ-उष्ट्र-वराह-श्रृगालादीनां च गर्भगृहे प्रवेशवशात्,

7 गर्भगृहे छत्राव-नाकु-मधुकादीना समुद्भववशात्,

8 देवताविग्रहे स्वेदोत्पत्तेः कारणेन,

9 अकस्माद् अग्निप्रदाहस्य कारणात्

10 देवबिम्बस्य चलनादिरथाङ्गभङ्गस्य कारणेन,

11 पूजायां लोपः, दैवात् प्राप्तदोषः, क्षुद्रकृत्यप्रयोगेन प्राप्यमाणदोषः, अन्यमन्त्रैः पूजनदोषः, निषिद्धपुष्पार्चनदोषः, मरीचिकादीनां लेपश्चेति तन्त्रशास्त्रे दैवसान्निध्य-हानि-कारककारणानि गौरवलाघवभेदेन प्रतिपादितानि सन्ति।

### १.३ देवालये बिम्बानाम् आधाराधेयभावः, देवप्रश्नस्य औचित्यं च

देवालयः देवस्य स्थूलशरीरम्। बिम्बस्तावत् सूक्ष्मशरीरम्। गर्भगृहम् आधारम्। बिम्बम् आधेयम्। एतेषु यद्येकस्य कृते दोषो सम्भवति तर्हि अन्यस्य कृतेऽपि तस्य प्रभावः पतति। तस्मात् यद्येकस्य कृते दोषो वा अशुचिर्वा भवति तर्हि द्वयोः कृतेऽपि शुध्यादिपरिहारोपायाः कर्तव्या एव भवन्ति। गर्भगृहबिम्बयोः स्थानं विहाय देवालयस्याङ्गेषु प्राङ्गणादिषु च कुत्रापि मृतिर्जननादिमहादोषाः सम्भवन्ति तदर्थं खनन-हरण-दहन-पूरण-गोनिवास-विप्रोच्छिष्ट-ब्रह्मकलशाभिषेकान्तादि पञ्चगव्यादिसप्तशुद्धि-वास्तुरक्षा ब्रह्मकलशाभिषेकादिकर्मभिश्च स्थलबिम्बयोः सान्निध्याभिवृद्धिं कारयेत। बिब्म्बे अशुद्धिरागतश्चेत् प्रसाद शुध्यादीन् कारयित्वा ब्रह्मकुम्भाभिषेकान्तं यावात्-कृत्वा, सान्निध्यस्य मुखाभिवृद्धिं कलावृद्धिं च कारयेत्। स्थलाशुच्यादिमहादोषाणाम् अभावे सति बिम्बाभिषेकस्य अवस्रावप्रोक्षणान्तं यावत् कर्म क्रियते चेदपि अलमित्यभिप्रायः। इदं बिम्बस्य कृते जायमान अशुच्यादेः कृते प्रोक्तः परिहारः। इत्थम् आधाराधेययोः शुचेः विधानम् अभिहितमस्ति।

मन्त्रविध्युक्तप्रकारेण स्थापितस्य बिम्बः देवालयादयश्च जीर्णावस्थां प्राप्य विनश्यमाणो अवलोक्यते चेत् शीघ्रमेव कलासंकोचं कृत्वा जीणोद्धारं विधाय, पुनः प्रतिष्ठां च कारयेत्।

देवः दूषितश्चेद् विपत्प्रदो स्यात्। सुस्थो देवः सम्पत्प्रदो भवति। अतः निर्दुष्टे समुहूर्ते सुगुणे पूर्वप्रतिष्ठापितस्य देवस्य कृते अनुदिनं पूजां यथाविधिं कुर्वन् प्रत्यब्धेऽपि उत्सवं समाचरेत्। देवता बिम्बं तावत् दोषरहितः सन् सान्निध्यस्य कृते च्युतविरहितश्चेत् तदानीम् अयं क्रमः।

यदि बिम्बः दोषयुतश्चेत् तदानीं तन्त्रशास्त्रोक्तप्रायश्चित्तादीन् कृत्वा प्रासादबिम्बादीनां जीर्णोद्धारविधिपूरयित्वा स्थानशुद्धिं बिम्बशुद्धिं ब्रह्मकुम्भाभिषेकान्तं च यावत् क्रियते चेत् सान्निध्यस्य वृद्धिर्भवति। तेन च देवः भक्तानां कृते सम्पत्प्रदो भवति।

इत्थं पूर्वोक्तवत् क्षेत्रदोषाः मृत्युप्रभृतयो अन्यदोषाः प्रत्यक्षेण नावभासन्ते चेत् तद् विषये, बिम्बप्रासादादिवैकल्यस्य विषये, उत्सवादिनित्यपूजायाः गुणदोषविषये च देवप्रश्नस्य आवश्यकता नितरां वर्तते। अपिच देवस्य अहितकराः चूर्णादिशत्रुकृतक्षुद्रसान्निध्यापहारकघटनानि लाभव्ययादीनां च तत्तद्भावचिन्तनमपि कर्तुं देवप्रश्नो उदीरितः।

## १.४ ग्रहैः राशिभिश्च देवताभेदचिन्तनक्रमः

सिंहराशिः आरूढलग्नलग्नगो भवेत्, तत्कृते सूर्यस्य योगः, दृष्टिः केन्द्रास्थितिर्वा यद्यागतश्चेत् तद्देवाष्टमङ्गलप्रश्नस्य मुख्यदेवः शङ्करेति वाच्यः। आरूढलग्नगो राशिः कर्काटकः, आरूढस्य कृते चन्द्रस्य योगः दृष्टिः केन्द्रभावस्थितिर्वा आगतश्चेत् विहितस्य प्रश्नस्य देवालयस्य देवता दुर्गेति विभावयेत्। मेषवृश्चिकयोर्मध्ये यद्येको आरुढलग्नगो राशिः तद्राशिगतो कुजः अथवा कुजस्य दृष्टिः तद्राशेरूपरि, केन्द्रभावे तस्य स्थितिर्वा अस्ति चेत् क्रमशः क्षेत्रदेवते स्कन्धकालिके भवतः। मकरकुम्भौ आरुढलग्ने यदि भवतः तयोर्लग्ने शनेर्योगः, तयोरूपरि शनेः दृष्टिः तस्य केन्द्रस्थितिर्वा यदि स्यात्तदा क्षेत्रदेवता तावत् शास्तारः। मिथुन कन्यके आरुढलग्ने स्यातां तत्र बुधस्य पूर्वोक्तवत् सम्बन्धो आरुढस्य कृते यद्यायाति तदा विष्णुः क्षेत्रदेवेति वाच्यः। धनुमीनौ आरुढलग्नतत्वेनागतौ स्यातां तयोर्मध्ये कश्चिदेकस्योपरि-गुरोः दृष्टिः, गुरोः योगो वा स्यात् यद्वा केन्द्रस्थितिः स्यात्तदा गुरुः सर्वेशां देवानां कारकत्वात् सर्वे देवाः चिन्तनीयाः। राशिभेदेन स्त्रीपुरुषादिदेवताचिन्तनं गुरोः सकाशाद् कर्तव्यम्। देवताचिन्तनं, करिष्यमाणभावे यद्येकस्यापेक्षया अधिकाः ग्रहाः स्युः तेषु यः प्रबलतमो ग्रहः तस्य कारकदेवः तत् क्षेत्रस्य प्रधान देवेति निश्चयं कुर्यात्। भावचिन्तनावसरे यदि सर्वेऽपि ग्रहाः परिलक्षिताः स्यु तर्हि तत्क्षेत्रे बलीग्रहाणां कारकसर्वदेवानां सान्निध्यं गर्भगृहे ब्रूयात्। उच्च-वर्गोत्तम-वक्रप्रभृतयोऽपि ग्रहाणाम्

अवस्था: तत्र चिन्तनीया: सन्ति। सर्वेषां देवानां विचार अत्र नोक्तश्चेदपि शैव-वैष्णव-शाक्तश्चेति विभागत्रयं प्रदर्शितम्। अवशिष्टदेवानां सान्निध्यं राशिशील-ग्रहशील-भावादिस्थितिभि: स्वयुक्त्या विचिन्त्य देवा: परिकल्पनीया:। यद्यपि शुक्रस्य कृते देवताविभाग अत्र नोक्त: तथापि '15' अध्याये ''अन्नपूर्णेश्वरी लक्ष्मी यक्षी वा भृगुनन्दनेति' निरूपयामासु:। तद् अत्रापि चिन्त्य:। वृषतुले आरुढलग्ने सति शुक्रस्य केन्द्रादिस्थितेर्वशात् योगदृष्ट्यादिभिश्च अन्नपूर्णेश्वरीं लक्ष्मीं वा सात्विकदेवताचिन्तनं शुक्रेण कर्तव्यम् ओजराशौ ओजांशकगतशुक्रेण केन्द्रस्थिति योग-दृष्टया च गणपते: चिन्तनमपि कार्यमित्यवोचन्।

## १.५ देवभावा:, प्रकारान्तरेण देवभावचिन्तनक्रमश्च

देवाष्टमङ्गलप्रश्ने प्रश्नारुढलग्नत: क्रमश: द्वादशभावेषु विचारणीया: विषया: एते सन्ति।

| भावा: | चिन्तनीया: विषया: |
|---|---|
| आरुढलग्नत: | देवालयस्य देवसान्निध्यं चिन्तयेत्। |
| द्वितीयभावत: | धनम् |
| तृतीयभावत: | देवालयस्य परिचारका: |
| चतुर्थभावत: | रथवाहनादय: |
| पञ्चमभावत: | बिम्बविचार: |
| षष्ठभावत: | शत्रव: |
| सप्तमभावत: | भूषणाऽऽभरणादय: |
| अष्टमभावत: | निवेद्यमानपदार्थविशेषा: भेदाश्च |
| नवमभावत: | क्षेत्राधिपा: |
| दशमभावत: | पूजा-उत्सवादय: |
| एकादशभावत: | धनागम: |
| द्वादशभावत: | अर्थव्ययादय: |

प्रकारान्तरेण देवभावचिन्तक्रमोऽपि वर्तते। तद्यथा-

| | |
|---|---|
| देवप्रश्नारुढलग्नात् | देवबिम्बस्य सर्वे विचारा: चिन्तनीया:। |
| द्वितीयभावत: | क्षेत्ररक्षका: प्रशासकाश्च विचार्या:। |
| तृतीयभावत: | नैवेद्यम् |
| चतुर्थभावत: | क्षेत्रम् |
| पञ्चमभावत: | देवतासान्निध्यम् |
| षष्ठभावत: | अशुचि: |
| सप्तमभावत: | ग्रामवासिनो भक्तजना: जनपदाश्च |
| अष्टमभावत: | देवस्य परिचारका: |
| नवमभावत: | ग्रामे स्थितमहाजना:, देवालयस्य अधिकारिणश्च |
| दशमभावत: | देवालयवासिन: सेवकवर्गाश्च |
| एकादशभावत: | सुकृतम् |
| द्वादशभावत: | तान्त्रिका आचार्याश्च |

प्रसङ्गेऽत्र ग्रन्थान्तरेषु प्रतिपादिता: देवभावा अपि वर्ण्यन्ते। तद्यथा-

देवप्रश्ने लग्नात्- देवबिम्बस्य शुभाशुभचिन्तनं कार्यम्। अष्टमभावेन परिजना: देवस्य महासान्निध्यं पूजोपकरणानि च चिन्तनीयानि।

चतुर्थेन गर्भगृहं मण्डपम् उपालयं च चिन्तयेत्। नवमभावेन पुण्यानि तृतीयाभावेन च धनधान्यागमनमार्गाश्च विचिन्त्या:। षष्ठभावेन दुष्कर्मणि निरता: जना: चोरादयश्च विचार्या:। यस्य भावस्य कृते शुभयोग: दृष्टिश्च वर्तते देवस्य तद्भावचिन्तनपदार्थ: शुभद:। पापानां योगदृष्ट्यादिना तद्भावस्य अशुभफलं युक्त्या विमशर्य वदेत्।

देवप्रश्ने देवालयस्य अन्तर्भागं बहिर्भाश्च सर्वं विलग्नात् चिन्तयेत्। देवप्रतिमाया: सर्वे विषया: अष्टमभावेन विचारणीया:। तत्तद्भावं तत्तद्भावे स्थितग्रहै: सकाशाद् भावाधि

पैश्च तेषां, बन्धु शत्रुत्वाद्यवस्थाविशेषेण शुभाशुभं विचिन्तयेत्। इत्थं देवभावनिरूपणावसरे पृथक् पृथक् ग्रन्थकाराणां मतं सम्यक् निरूप्य सर्वपक्षानुसारेण देवभावनिरूपणं अत्र वर्ण्यते।

## १.६ सर्वसम्मतदेवभावाः

प्रश्नमार्गकाराः स्वमतेन सर्वपक्षसम्मत देवभावचिन्तनाक्रमं यद्यपि सक्षिप्तेन निरूपयामासुः। तथाऽपि साम्प्रतं वर्तमानकाले दैवज्ञै एते भावैः चिन्तनीयपदार्थनां विषये विस्तरेण कथ्यते। तद्यथा- प्रथमभावतः देवस्य मूलबिम्बे गुणाः, दोषाः, कः देवः, कथं च दैवसान्निध्यमस्ति, गर्भगृहं कीदृशमस्ति, देवालयस्य अवयवेषु गुणदोषाः, मूलबिम्बस्याङ्गानि, क्षेत्रस्य प्रभावः, चैतन्यं, प्रतिमालक्षणं, लिङ्गादिलक्षणं तत्सौन्दर्यं, जीवत्वम् अङ्गवैकल्यत्वं च चिन्तनीयानि।

द्वितीयभावेन देवस्य निधयः, कोशागारे वस्तूनि, क्षेत्रस्य जनाः, अधिकारीवर्गाः, पूजासामग्रयः दानपात्राणि देवैः सकाशाद् जायमानो रक्षा, देवस्य सम्पत्तिः, देवस्य दृष्टिश्च चिन्तनीयानि। तृतीयभावेन देवस्य नैवेद्यं तत्परिचारकाः, अन्ये परिचारकाः नेवेद्याय उपयुज्यमानं पात्रं, पच्यमाननैवेद्यस्य स्थानं, नैवेद्यार्थं उपलभ्यमाण तण्डुलादिवाञ्छितवस्तूनां स्थितिः, मालायाः निर्मातारः, वाद्यवादकाः, पौराणिकाः, परिचारकादीनां जातिलिङ्गवर्णवयोज्ञानानि च चिन्तनीयानि। चतुर्थभावतः देवालयस्य गुणदोषाः देवालयान्तः स्थित-गर्भगृहं मण्डपः, पाकशाला, भोजनशालाप्राकारः कोशागारः, यागशालाः, उपदेवालयः, बलिः, पीठाङ्गण, गजः, रथः शिबिका, ध्वजः स्तम्भः, तत्तद्देववाहनं, वाद्यमण्डपः, महाद्वारं, रथागारः, पशुसम्पत्तिः, गोशाला, वापीकूपतडागः देवलस्याऽलङ्कारः, भूमिः स्थलस्य स्थितिश्च चिन्तनीयानि।

पञ्चमभावतः दैवसान्निध्यं, चैतन्यं, बिम्ब संख्याम्, उपबिम्बसंख्या, मन्त्रेच्चारं, परिवारबिम्बं, बलिमूर्तिं, बलिशिलां, ध्वजदेवता, ध्वजस्तम्भोपदेवता, पुण्यं, शुद्धिं, कलां शक्तिं, तत्वं मूलमन्त्रं, विग्रहलोहशिलादिचिन्तनं, पूर्वप्रतिष्ठाविचारं, चरस्थिरादिगुणदोषविचारं,

इतिहासश्च चिन्तनीयः। षष्ठभावत अशुद्धिः शत्रुबाधा, चोरकृत्यं, क्षुद्रादिप्रयोगः, कश्मलम् अन्यदेवालयानां स्पर्धा, अन्तः कलहः सान्निध्यहानिप्रभृतयो दृष्टव्याः। सप्तमभावतः भक्तजन- यात्रिक- क्षेत्रमहिमा- नागरिकभक्ति -ग्रामस्थजनास्थिति-देवताभरण-सम्पत्ति- भूषणवस्तु- अलङ्कारविधान -दीप -पूजापात्र- घण्टा-आरति -पुष्पार्जन- उद्यान- गान- नर्तन- स्तुतिपाठ -दर्शन-पट्टवस्त्र -रत्न- देवालयमुखद्वार- भित्तिचित्रकलाप्रभृतयः चिन्तनीयाः भवन्ति।

अष्टमभावतः मूलदेवतामहासान्निध्य-नैवद्यस्य पूर्णाऽपूर्णता-तृप्ति -अन्यपरिचारक- अपघात -अग्निदाह-मृत्यु -अष्टबन्ध- सम्मिलितान्यमूर्ति-पाणिपीठस्थिति- सर्वगुण-सर्वदोष- शाप- कोष-बिम्बस्थितिप्रभृतयो विचारणीयाः सन्ति।

नवमभावतः पुण्यकर्म-अभिवृद्धि-भाग्य- धर्मकार्य- याग- वेदघोष-अधिकारीवर्ग- भक्तसमूह- सिद्धि- पूर्ववैभव- क्षेत्रधिपति- प्रधानाध्यक्ष-दान-समाराधन- अनुग्रहादयश्च चिन्तनीयाः भवन्ति।

दशमभावतः नित्यपूजा-पूजासंख्या-उत्सव-रंगपूजा-अर्चक-गर्भगृह-परिचारकवर्ग-ग्राम- देवालयवैभव- ग्रामजन- स्तुतिपाठक- नित्यपूजाविधि- मासपूजाविधि- वर्षपूजाविधि- पूर्वसङ्कल्प- सेवा- जनसम्मर्द-मार्ग- देवसन्तृप्ति- अतृप्ति- कीर्ति - पूजाविनियोग- क्रम - वाद्य - क्षेत्रपूजाविधि- अर्चक- देववाहक- देवस्य मालाकर्तृ- स्थलशुद्धिकर्ता- वाद्यक-इतिहास- जीर्णोद्धारकर्म-विविधरचनाप्रभृतयः विचिन्तनीयाः।

एकादशभावेन दैवीसम्पत्तिः, ऐश्वर्यवृद्धिः, अभिवृद्धिः, पूर्वसङ्कल्पः, आदायः, ध नलाभः, उपायनं, सुकृतं मृष्टान्नं तुष्टिः, प्रगतिप्रभृतयो अवलोकनीयाः सन्ति।

द्वादशभावतः धनव्यय-सन्मार्गव्यय-दुर्व्यय-आगमज्ञ-दुरित-शाप- भङ्ग- विनस्यमाणबाह्य सूत्रप्रभृतयो चिन्तनीयाः। इत्थम् अष्टमङ्गलवत् देवाष्टमङ्गलप्रश्नं देवालये एव स्थाप्य सर्वं विचिन्तयेत्।

## १.७ देवभावानां गुणदोषचिन्तनविधिः, बिम्बादिभावैः दोषचिन्तनक्रमश्च

पूर्वोक्तदेवभावेषु लग्नादितत्तद्भावाः सौम्यग्रहाणां योगादिसम्बन्धेन युतश्चेत् चैतन्यवृद्धिः तत्तद्भावानां परिपूर्णत्वं शुभत्वं च वाच्यम्। पापानां योगादिसम्बन्धवशात् चैतन्यहानिः तत्तद्भावसूचकपदार्थानां दूषणं हानिं च वदेत्। द्वादशभावे शुभग्रहाः यदि विद्यमानाः सन्ति चेत् दुर्व्ययाभावो विलोकनीयः। पापाः व्ययभावे वर्तमानाः दुर्व्ययकारकाः खलु।

प्रथमपञ्चमाष्टमभावाः बिम्बभावाः कथिताः। तत्र केचन वदन्ति प्रथमपञ्चमभावौ बिम्बभावेति। यद्यपि देवता विग्रहे महासान्निध्यम् अष्टम् भावस्य कृते विहितत्वात् 1.5.8 एते त्रयोऽपि भावाः बिम्बभावाः एव। एषु बिम्बभावेषु अङ्गारकः विद्यमानश्चेत् बिम्बस्य छेद अङ्गभङ्गो वा अभवदिति भाव्यम् यद्वा अग्निसंयोगेन ज्वलितोऽस्तीति चिन्तनीयम्। कुजस्य विषये अन्ये विचाराः ये सन्ति ते च तस्य स्थानराश्यादिभि ऊह्य बिम्बस्य शुभाशुभत्वम् आदिशेत्। बिम्बभावे शनिरागतश्चेत् बिम्बस्य जीर्णत्वं वदेत्। अनयोः कुजशन्योः सकाशाद् देवालयस्य बिम्बे दुःस्थिति जीर्णत्व-सौष्टव-शापप्रभृतयो चिन्तनीयाः।

यद्यद्भावस्य कृते कुजस्य सम्बन्धो स्थास्यपि तत्तद्भावस्य छेदभेदादीन्, यस्मिन् बिम्बभावे शनेः सम्बन्धो स्थास्यति तद्बिम्बभावस्य जीर्णत्वं दूषितत्वं कर्मणि विघ्नतां वा वदेत्। अनने विधिना देवालयस्य जीर्णत्वादिविषयाः चिन्तनीयाः। बिम्बभावे राहुमान्द्यादे संयुतेर्वशात् डुण्डुभादिक्षुद्रजन्तो स्पर्शनप्रवेशादिभिः तत्स्थानं बिम्बादीनां च अशुद्धिं वाच्यम्। केतुः बिम्बभावे वर्तते चेत् क्षुद्रकृत्यभस्मादि प्रयोगेन दैवसान्निध्यं विनष्टमभूदिति विज्ञेयम्। सूर्यः बिम्बभावे अस्ति चेत् मरीचिकालेपनादीन् वदेत्। द्वादशभावे यः कोऽपि पापग्रहः विद्यमानश्चेत् बिम्बस्य अङ्गवैकल्यमागत मस्तीति ब्रुयात्। उच्चादिबलीगहैः दोषालपत्वं बलहीनैश्च ग्रहैः दोषबाहुल्यं च चिन्तनीयम्।

शुभाः बलिनश्चेत् गुणबाहुल्यं दुर्बलाश्चेत् गुणालपत्वं पापाः प्रबलाश्चेत् दोषालपत्वं, दुर्बलाश्चेत् दोषबाहुल्यं च विशिष्य चिन्तनीयम्। बिम्बोदोषचिन्तनक्रमे शनिः चतुर्थभावे स्थितश्चेत् देवालयस्य मण्डपे, अन्यभागेषु च जीर्णता वाच्या। गर्भगृहस्यापि जीर्णावस्था वाच्या। पूर्वोक्त योगे सूर्यो वा कुजो वा चतुर्थभावे विद्यमानश्चेत् देवालयस्य अन्यभागेषु

अग्निदग्धं, धत्वादिदग्धैकदेशं मूलं वा वाच्यम्। मान्दिः चतुर्थभावस्थे वीर्याढ्ये अशौचादिषु देवालयस्यान्तः प्रवेशेन दैव सन्निध्यस्य कृते अशुचिरागत्य च्युतिरागतमिति वाच्यम्। राहुकेतोः चतुर्थभावे स्थितेर्वशात् पतितानाम् अन्त्यजानां च प्रवेशेन दैवसान्निध्ये च्युतिरागतमिति।

## १.८ नैवेद्यादिषु दोषचिन्तनक्रमः

आरूढलग्नाद् तृतीयाष्टमौ नैवेद्यस्थाने स्तः। तृतीयभावे अष्टमभावे वा बलहीनाः पापग्रहाः स्यु तदा नैवेद्यं दोषयुक्तमस्तीति भावः। पूर्वोक्तयोगे पापग्रहः शनिश्चेत् समर्पणभावेन प्रदीयमानं नैवेद्यं देवस्य संत्रप्तये यथेच्छं नास्ति। देवः नैवेधं नैवास्वादयतीति विज्ञेयः। तृतीयाष्टमभावे संस्थिस्य कुजस्य सकाशाद् पात्रस्य अधः प्रदग्धत्वात् समर्प्यमाणनैवेद्यं दुर्गन्धयुतमस्ति। अतः दूषितत्वात् देवस्य संतुष्टिर्नाऽभवत् राहुकेतुमान्द्यादीनां संस्थितिः पूर्वोक्त तृतीयष्टमभावे वर्तते चेत् क्रिमिकीटादीनां शवं नैवेद्ये पतितत्वात् देवस्य अत्रप्तिर्वर्तते इति वाच्यम्। इत्थं रविणा शुष्कं नैवेद्यं, चन्द्रेण आरद्रं, कुजेन अग्निहतं, बुधेन अपात्रं, बलहीनेन गुरूणा अशुद्धं, दुर्बलेन शुक्रेण गन्धरहितं (अभिघारक्षीरदधिरहितश्च) शनिना अपर्याप्तं, राहुणा जन्त्वादिना स्पृष्टं, केतुना क्रिमिकीटाद्युतं, मान्द्या अन्यस्यर्शादिदोषयुतं च वक्तव्यम्।

अत्र शुभग्रहाः बलिनश्चेत् नैवेद्यं शुभम्। पापाः बलिनश्चेत् नैवेद्यं दोषयुतञ्चेति वदेत्। नवमभावे यदि पापाः स्युः तदा क्षेत्राधिपस्य दोषोऽपि वाच्यः। पुनः तत्तद्भावानुसारेण आचार्य-देवलक-देवालयस्य परिचारकादीनां च गुणदोषं सम्यक् विचार्य वदेत्।

एवमेव सप्तमभावे पापानां संस्थितेर्वशात् देवस्य दीपविभूषणानां, दशमभावगतग्रहाणां वशात् पूजा तत्साधनमुत्सवादीनां च वैकल्यं चिन्तनीयम्।

## १.९ अष्टबन्धचिन्तनविधिः

सन्ति बिम्बभावाः प्रथम-पञ्चम-अष्टम भावाः। पूर्वोक्तबिम्बभावैः सकाशाद् अष्टबन्ध ं विचिन्तयेतत्। बिम्बभावत्वेन चरराशयः यद्यागताः स्युः तर्हि अष्टबन्धः तावत् समीचीनं

नास्ति। स्थिरराशयः यदि बिम्बभावाः स्युः अष्टबन्धं सम्यक् वर्तते। उभयराशयः बिम्बभावत्वेन यद्यागताः स्युः तर्हि मध्यऽयमावस्थायाम् अष्टबन्धो अस्ति। एषु भावेषु स्थितैः पापग्रहैः किञ्च भावेशैश्च सकाशाद् अष्टबन्धविचारे गुणदोषचिन्तनं कार्यम्। केचन चतुर्थभावेऽनापि अष्टबन्धं चिन्तयेदिति जगुः। विचार्यमाणबिम्बराशिः चरराशिश्चेत् बिम्बे कम्पनं चलनं वा वर्तते। अधोमुखराशिश्चेत् बिम्बः पतितोऽस्ति। बिम्बभावे शुक्रचन्द्रौ प्रबलौ विद्यमानौ स्यातां तदा बिम्बः अस्ति सुन्दरम्।

देवप्रश्नै आरूढप्रश्ने शुभाः गुरुरपि तत्रैव स्थितः सन् शुभैरवलोकितश्चेत्, यद्वा आरूढलग्नस्य कृते गुरोः दृष्टिः यदि स्यात्, पापानां स्थितिः तेषां कृते विहितभावेषु यदि स्यात्, तदा दैवसान्निध्यम् उत्तमं वर्तते, अस्ति च देवानुग्रहस्य पूर्णता। पापग्रहाणाम् अनिष्टभावे योगदृष्टयादिस्थितेर्वशात् दैवकोपं वाच्यम्। यस्मिन् भावे दैवकोपहेतुकग्रहः वर्तते तद्भाव-निमित्तेन दैवकोपमागतमिति वदेत्।

## १.१० दैवमानुषप्रश्नयोः भेदचिन्तनविधिः

प्रश्नमार्गस्य पूर्वार्धे मानुषप्रश्नविचारे 'देवज्ञेन समाहितेन' इत्यस्मिन् श्लोके प्रोक्तानि पञ्चदश तात्कालिक लक्षणानि विचिन्त्य धनलाभ अर्थनाश-शत्रु-शत्रुबाधा-दशभेदप्रभृतयो विचिन्त्य वक्तव्यानि। अत्र देवप्रश्नेऽपि त्रिस्फुटचिन्तन मृतिचन्तिनादयोः कार्याः। परन्तु देवप्रश्ने मृतिसूत्रेण मरणम् अवलोकितं भवति चेत् तच्च देवालयस्य रक्षकाणां परिचारकाणां देवलकानां च कृते न तु देवानां कृते इत्यभिप्रायः। देवप्रश्नस्य अयमेव प्रमुखः भेदः। लग्नादितः यस्य भावस्य कृते पापग्रहाणां सम्बन्धः आगमिष्यमाणो वर्तते तदा तद्भावकारत्वेन विहित जनानां कृते एव तत्काले विपत्ति-मृत्युप्रभृतयो चिन्तनीयाः भवन्ति। स्व प्रदेशे क्षेत्रे च मरणप्रभृतयो लक्षणानि यदि दृष्टानि स्युः तर्हि पशु-प्राण्यादीनां वा मरणं स्वक्षेत्रे प्रदेशे च स्थित कूपे सरोवरे वा पतनवशाद् भवतीति वाच्यम्। प्रेतबाधादयो यदा विलोकिताः भवन्ति तदा तत्तद्भावसम्बन्धिविचारं सम्यक् कृत्वा पूर्वं 15 अध्याये प्रतिपादितरीत्य। जातिवयोलिङ्गसंख्यामृतिक्रमप्रभृतयो विचार्य बाधायाः विषये वदेत्। न तु प्रेताः देवान् पीडयन्तीति वदेत्।

दैवानुकूल्यादिनिरूपणे पूर्वं 15 अध्याये यत् प्रोक्तं युक्त्या तत् अत्रापि योजनीयम्। धननाशादयः देवप्रश्ने यदि अवलोकिताः भवन्ति तदर्थं सम्पत्समृद्धिकरान्यनुष्टानानि देवालये कार्याणि। यदि अशुच्याद्यनिष्टकरफलं देवस्थाने विलोक्यते चेत् तत्परिहाराय शुद्धिं श्रुतिस्मृत्यादिषु विहितरीत्या कर्तव्यम्।

निवृत्तिप्रश्ने विलोक्यमाणविधिना देवालये सर्वापन्निवृत्यर्थ गणहोम- भगवती सेवा- भाग्य सूक्तपारायण- संवादसूक्तपारायणदिना मूलदेवतायाः सन्त्रप्तिः कार्या। देवालयस्य शुध्यर्थं पञ्चगव्याभिषेक- पञ्चमृताभिषेक-सम्प्रोक्षण-नवकलश-स्नानपवनकलशादयो विहिताः सन्ति। पूर्वविहितकर्माणि विशिष्य केरलप्रान्ते प्रोक्तानि। तदत्तद्देशाचारानुगुण्येन विहितपद्धत्या निवृत्ति कारयेत्।

## १.११ राज्ञः प्रश्ने भूपतेर्विषये भावचिन्तनक्रमः

राज्ञः प्रश्ने तन्वादिद्वादशभाषैः विचार्यमाणाः विषयाः अधोनिर्दिष्टवत् वर्तन्ते। तद्यथा-

| भावाः | चिन्तनीयविषयाः |
|---|---|
| लग्नतः | शरीरम् |
| द्वितीयतः | कोशः |
| तृतीयतः | सेना, सैनिकश्च |
| चतुर्थतः | वाहनम् |
| पञ्चमतः | मन्त्रालोचनक्रमः |
| षष्ठतः | शत्रु |
| सप्तमतः | युद्धमार्गः |
| अष्टमतः | आयुः |
| नवमतः | मनोवृत्तिः |
| दशमतः | प्रवृत्तिः, व्यापारश्च |
| एकादशतः | लाभः |
| द्वादशतः | अप्राप्तिः नष्टं च |

योधाप्तिभावौ तृतीयेकादशौ विहाय अन्येषु भावेषु स्थिताः पापाः तत्तद्भावान् क्षपयन्ति। तृतीयेकादशौ पापानाम् इष्टस्थाने स्तः। 03.10.11 भावान् हित्वा तदितरभावेषु गतौ रविकुजौ भावहानिकारकौ स्तः। शुभग्रहः यस्मिन् कस्मिन् भावेऽपि विद्यमानः शुभदः। लग्ने शुभग्रहः शरीरस्य पुष्टिकरः। षष्ठभावे स्थितः शुभः शत्रुक्षयकरः। लग्नाष्टमस्थो चन्द्रः भाववृद्धि न प्रथयति। सप्तमस्थो शुक्रः हानिकारकः। अवनिभर्तुः यत् शुभाशुभनिरूपणं वर्तते तत् अवश्यं प्रजास्वपि भवेदेवेति ग्रन्थान्तरेषु उदीर्यते। अतः प्रजाना कृतेऽपि राज्ञः शुभाशुभफलं परिणमति इति मनसि विधाय अत्र राज्ञः प्रश्ने तस्य भाग्य - युवराज-राज्यादीनां प्राप्तेः विचारो विधीयते।

### १.१२ राज्ञः भाग्यं, युवराजादीनां चिन्तनं राज्ञः स्थानप्राप्तिश्च

नृपतेः पूर्वकर्मविपाकात् आत्मसुत-कोश-वाहन-राजधानी-राज्ञी-पुरोहित-प्रजाश्चेति अष्टधा दैवं परिकल्पनीयम्। अदृष्टवशात् प्राप्यमाणा एते सर्वे राज्ञः भाग्यसूचकाः सन्ति।

सूर्यचन्द्रौबलिनौ चतुष्ट्यगतौ, आरूढलग्नं तात्कालिकलग्नो वा कर्कसिंहराशिगश्चेद् नृपतेः राज्यानुभूतिपरयोगो अस्तीति। बलहीनौ सूर्यचन्द्रौ 3.6.9.12 भावगौ वर्तेते कर्कसिंहलग्ने च न स्यातां तदा राज्यानुभोगयोगः नास्तीति मन्तव्यम्। जातकेऽपि राज्ञः स्थितयोगान् सम्यक् परीक्ष्य एतत् फलं वदेत्।

युवराजादीनां चिन्तनावसरे बुधेन युवराज्ञः, कुजेन दण्डनायकः गुरूशुक्रयोः सकाशाद् मन्त्रिणौ, (विशिष्य गुरूः कार्यसचिवः शुक्रः नर्मसचिवः) एते चिन्तनीयाः। एतेषां गुणदोषविचारसमये स्वोच्चस्थाः, शुभभावगाः शुभयुक्ताः, शुभावलोकिताश्च सम्पदं बलिष्टं च कुर्युः। पूर्वोक्ताः विपरीताः स्युः तदा तेभ्यः आपत्प्रदाः अथवा भूपतेरात्प्रदाः भवन्ति।

आरूढलग्नम् उर्ध्वमुखराशिगम् आरूढाधिपतेश्च उच्चाभिलाषिता च स्यात् तदितरग्रहाः स्वोच्चांशगाः बलिनः स्युः तदा भूपतेः कृते स्थानोत्कर्षं बहुशीघ्रं सम्भवतीति वदेत्। राज्यप्राप्त्यादिप्रश्ने, शुभवर्गगतं लग्नं, लग्ने शुभयोगमायाते सति पृष्टुरभिमतासिद्धिं स्थानान्तरप्राप्तिं च ब्रूयात्। राज्ञः स्थानराज्यादिप्राप्तेः प्रश्ने लग्नात् सप्तम-दशमस्थाने च स्थिताः शुभाः स्थानप्रदाः स्युः। प्रथमद्वितीयपञ्चमेषु सौम्याः मानार्थदाः स्युः। आयव्ययसहिताः पापाः न शुभप्रदाः स्युः। लग्ने शशी न शुभदः दशमगः चन्द्रः शुभदश्चेति विशिष्य चिन्तयेत्।

भूप्रदेशलाभप्रश्ने उदयलग्नम् अथवा शशिनं बलिनः शुभग्रहाः विलोकयन्ति अथवा बुधो पश्यति, अशुभफलदायकग्रहाणां योगदृष्टयादिसम्बन्धाो तत्र नास्ति चेत् विजयभूध नलब्धिं तत्र कथयेत्।

### १.१३ राजोचित उपायनप्राप्तिः नौकाप्राप्तिश्च

ईप्सितभावेषु, विशिष्य एकादशभावे वीर्यान्वितैः नभश्चरगतैः तद्धिक्स्थस्य धात्वादिपादार्थरूपस्योपायनावाप्तिम् आदिशेत्। भूपतेरयं प्रश्नो आरूढेन चिन्तनीयमस्ति।

नौकायाः प्राप्तेः प्रश्ने तावत् द्वितीयभावाधितिः एकादशाधिपतिश्च अभीष्टस्थाने स्थितौ स्यातां, प्रश्नलग्नं जलराशिगं पूर्वोक्तभावाधिपौ जलराश्यंशगतौ च स्यातां तदा पोतस्य प्राप्तिं वदेत्।

मकरराशिगतं लग्नं द्वितीयेकादशभावाधिपौ नीचादिस्थानगतौ अशुभयोगादिदृष्टया बलहीनौ च स्यातां तौ मौढ्यं गतौ जलराशेः नवांशे विद्यमानौ स्तः, तदा पोतः जले निमज्जतीति वाच्यः।

### १.१४ युद्धप्रश्नः

युद्धाय गच्छताम् एषां मध्ये कस्य कस्य मृतिः कस्य वा जयः इति प्रश्नै कृतै तत्र किं वाच्यमिति उच्यते-

शनिराहुकेतुमान्दयः कुण्डल्यां यस्याः राशेर्दिक्स्थिताः तत्तद्राशेर्दिशि सेनायाः पराजयः भवति। योद्धुः जन्मराश्याधिपः प्रश्नकाले मौढ्यं गतश्चेत् सः पराजितो भवति। शीर्षोदयोर्ध्वमुखवदनोच्छ्रित देशग सैन्यस्य कृते विजयो भवति। प्रश्नकाले दक्षिणहस्तेन मस्तकं संस्पृर्श्य यः सेनाधिकारी प्रश्नं प्रच्छति तस्य सेनायाः विजयो सम्भवतीति आदिशेत्।

प्रश्नकाले अग्निदिशः राशिस्थो भटाः, याम्यं वह्निदिशं च विलोक्यमाणाः भटाः जानुयुगलं परिस्पृशन परिपृच्छमाणाः भटाः, शस्त्रमवधार्य पृच्छन्तो भटाःश्चेत् तदानीं तेषां मृतिः वाच्यः युद्धे।

## १.१५ युद्धे विजयसूचकलक्षणानि

प्रश्नकाले पूर्वादिचतुर्षु दिक्षु प्रश्नः क्रियते चेत्, स्पर्शनदर्शनादिलक्षणानि विजयसूचकानि यदि स्युः, तदा शत्रो आयुधमेव स्वहस्ते आगत्य शत्रुवधो भवतीति निर्दिशेत्।

अपि च प्रश्नकाले पृच्छको भटः आग्नेयादि-विदिक्षु स्थित्वा प्रच्छति चेत्, निम्नप्रदेशे पृच्छकस्य संस्थिति अस्ति चेत्, वामाङ्गस्पर्शनं कृतो दृश्यते चेत्तदा शत्रोः हस्तगतआयुध वशात् मृत्युः भवति। वक्षदेशः, शिरः दक्षिणहस्तेन शस्त्रस्पर्शः, किञ्च कस्यचित्ताडनं, भेदं, छेदं वा कुर्वतामपि पृष्टःश्चेत् तदानीं जयो भवति युद्धेति वक्तव्यम्।

शत्रुराजभटस्यागमनप्रश्ने स्थिरराशिस्थो चन्द्रः, लग्नं चरराशिगः, चरराशेर्नवांशके च स्यात्तदा शीघ्रं युद्धाय सबलो रिपुरायाति। अस्य विपरीतलक्षणेन युद्धार्थं नागच्छतीति वाच्यम्।

उभयराशौ चन्द्रः, स्थिरराशिगतो लग्नं, षष्ठभावे गुरूबुधशुक्राणां संयुति स्यात्तर्हि प्रतीयमानो शत्रुः प्रबलोऽपि युद्धे पराजितः सन् निवर्तितो भवति विनश्यति च। स्थिरराशिगो चन्द्रः चरलग्नञ्चेत् शत्रोरागमनं न भवति। चरराशौ चन्द्रः स्थिरलग्नञ्चेत् युद्धाय शत्रोरागमनं भवति। उभयराशिगतश्चन्द्रः, स्थिरलग्नञ्चेत् युद्धार्थं बहुदूरात् रिपुः समागतश्चेदपि स पुनः निवर्तते।

लग्नात् पञ्चम्-षष्टभावे च पापाः स्युः तदा शत्रुः मार्गमध्यादेव निवर्तते। चतुर्थभावे पापाः स्युः प्राप्तः शत्रुः भग्नो भूय निवर्तते। लग्नात् चतुर्थवेश्मोपगतौ रविचन्द्रौ स्यातां, तदाभ्येति न वैरिचक्रम्। गुरूबुधशुक्राः चतुर्थभावे स्युः तदा रिपोरागमनम् आशु विद्यात्।

## १.१६ शत्रोरागमनकालनिर्णयः

शत्रोरागमनकालनिर्णयप्रश्ने लग्नर्क्षात् पृच्छकस्य जन्मर्क्षं यावत् गणयेत्। गणनवशात् यावन्ति दिनानि लभ्यन्ते तावन्तिसंख्याके दिने प्रश्नदिनादारभ्य शत्रोरागमनं भवतीति वक्तव्यम्। परन्तु तेषां नक्षत्राणां मध्ये कश्चिद् ग्रहो न स्यात्।

प्रश्नारूढलग्नाद् शुभाशुभफलप्रदो ग्रहः यस्मिन् भावे अस्ति तत्संख्यायाः कृते

लग्नेशो विद्यमान राशिसंख्यया संगुण्य प्रश्नस्य दिनात् तत्कालं यावत् परिगणय्य शुभाशुभफलस्य कालविशेषं वदेत्। तत्र तत्तद्ग्रहस्य अयनक्षणवासरऋत्वादिकालांशानुगुण्येन संख्यां परिगणयेत्।

तदुक्तं यथा-

**लग्नाद् यावति भे खेटः शुभाशुभफलप्रदः।**

**काले तावति लग्नेशस्योदिते तत्फलं भवेत्॥**

## १.१७ युद्धे सन्धेर्लक्षणानि

युद्धे सन्धेर्लक्षणकथनावसरे प्रश्नकाले पृच्छकेन नरान्तरेण संयोगे कृते दृष्टे सति, अथवा हस्तयोरपि संयोगो कृते दृष्टे सन्धिर्भवति। स्वक्षेत्रे बन्धुक्षेत्रे च गताः ग्रहाः लग्नं यदि पश्यन्ति तदा विना युद्धेन सन्धिरूक्तो मनीषिभिः।

आपोक्लिमराशौ विद्यामानः (3.6.9.12) बुधः नवमलग्नयोरूपरि शुभानां दृष्टिः वर्तते चेत् महीपतीनां युद्धं विनैव सन्धानो भवति।

क्रूरग्रहः सप्तमभावे विद्यमानश्चेत् विना युद्धेन सन्धिर्भूय वित्तस्य प्राप्तिर्भवति। बलीग्रहः लग्नभावोपगतश्चेत् भेदमुपैति सन्धिरिति वदेत्।

## १.१८ युद्धलक्षणं स्थायीयायीभावयोर्विचारश्च

लग्ने क्रूराः स्युः तृतीये बुधः, चतुर्थे रविश्चेत् भूभृतां मध्ये युद्धं भवत्येव, येन तत्र स्थितानां पौराणां नाशो वाच्यः। पापैर्विलोकिताः पापाः केन्द्रे कुजद्रेष्काणादिवर्गे स्थिताः स्युः तर्हि संग्रामसूचकाः। विशिष्य पापाः लग्नाधिपतेः शत्रवः स्युः तर्हि अवश्यं युद्धं सम्भवतीति ज्ञेयः।

युद्धार्थं समागताः सैनिकाः यायिनः। राज्ञः पक्षतः पृच्छकत्वेन समागताः स्थायिनः सन्ति। यायी चिन्तनभावाः नवम-दशम-एकादश-द्वादश प्रथम-द्वितीयभावाश्च। 3-4-5-6-7-8 एते भावाः स्थायीचिन्तनभावाः। इत्थं चक्रदलभागद्वये यस्मिन् भागे बलिनः शुभग्रहाः स्थिताः स्युः तत्पक्षस्य कृते विजयः। तदितरअन्यभागस्य कृते पराजयश्चेति वदेत्।

युद्धप्रश्नकालिकसूर्यचन्द्राश्रितराशेर्वशात् जयापजयस्य निर्णयः कार्यः। सिंहकन्या-तुलावृश्चिककुम्भमीनाः सूर्यराशयः एते द्युःराशयेति कश्यन्ते। मेषवृषमिथुनकर्कधनुमकरराशयः चन्द्रराशय कथ्यन्ते। इमे राशयः निशाराशयेति व्यवह्रीयन्ते। सूर्य राशिगतौ चन्द्रसूर्यौ चेद्यायिनो जयं भवति। तौ चन्द्रराशिगातौ चेत् स्थायिनो जयम् आदिशेत्। चन्द्रराशिगतः सूर्यश्चेत् यायी युद्धे विजयते।

सुर्यराशिगते चन्द्रे वैरिणं स्थायी जयति। युद्धप्रश्ने अन्योन्यराशिगौ सूर्याचन्द्रमसो यदा स्यातां स्थायी यायिनोः कलहेन देहे व्रणप्रदौ भवतः। स्वस्वराशिगतयोः चन्द्रसूर्ययोर्वशात् यायीस्थायी च तरूणावपि रणभूतले कलहं नेच्छतः। विना युद्धेन स्व स्व स्थाने यायीस्थायिनौ गच्छतः।

## १.१९ पराशरमतेन योद्धुः अङ्गविभागः

पराशरमतेन रणाकांक्षिणो नरस्य अङ्गानि जन्मनक्षत्रादितः कोष्टके प्रदर्शितवत् ज्ञेयानि। तद्यथा-

| नक्षत्राणि | अङ्गानि |
|---|---|
| जन्मनक्षत्रम् | मुखम् |
| ततः नक्षत्रद्वयम् | वामनेत्रम् |
| ततः परं त्रयो नक्षत्राणि | शिरोभागः |
| ततः एकनक्षत्रेण | दक्षिणनेत्रम्। |
| तदग्रिमेण नक्षत्रेणैकेन | दक्षिणकर्णः |
| ततः नक्षत्रचतुष्टयेन | दक्षिणहस्तः |
| पुनः नक्षत्रत्रयेण | दक्षिणपादः |
| ततः पञ्चनक्षत्रैः | हृदयस्य भागः |
| पुनः एकेन नक्षत्रेण | ग्रीवा |
| नचत्रचतुष्टयैः | वामहस्तः |
| नक्षत्र त्रयेण | वामपादः |

इत्थं सप्तविंशतिनक्षत्रेषु अङ्गविभागं परिकालप्य रणाकांक्षिणो नरस्य अङ्गानि चिन्तनीयानि। अनभिमतस्थानगतैः बलान्वितैः पापैः सकाशाद् युद्धप्रश्ने तस्थितताराङ्गे योद्धुः व्रणमादिशेत् मतिमान् दैवज्ञः।

### १.२० माधवीयमतानुसारेण ध्वजधनुखड्गधारणविधिः

धनिष्टानक्षत्रे भूभृत् जयध्वजधनुः खड्गादीन् स्वीकुर्यात्। पूर्वाभाद्रानक्षत्रे धनसञ्चयं कृत्वा उत्तराभाद्रर्क्षेरिपुसेनायाः मध्ये प्रविशेत् नृपः। स्ववर्गस्थयोः शशांकुजयोर्लग्ने एकांशकगतौः तौः स्यातत्तदा यदि युद्धं प्रारमेत अवश्यं युद्धे नृपः विजयं विन्दते।

कुजवासरे विषघट्युदयसमये कुजे उदयगते सति तच्छुभमुहूर्ते बाणं वा जलं वा हस्ते संस्थाप्य (गृहीत्वा) आग्नेयास्त्रमन्त्रेण जपेत्। तद्वह्निमयमिति विचिन्त्य पुरतः स्थितसेनाया उपरि प्रयुञ्जेत्। विष्ट्युदयदिशि स्थित्वा शरान् यदि विमुञ्चते चेत् अरिसेनातः पृथ्वीपतिः जयं प्राप्नोति।

### १.२१ वाराहीसंहितोक्तयुद्धाद्यनिष्टलक्षणानि

राज्ञः राजधान्यां प्रासादभवन-देवालय-तोरण-ध्वजादीनां च कृते अकस्मात् अग्निदाहो सम्भवति तदा षाण्मासाभ्यन्तरे शत्रुसैन्यानाम् आगमो निश्चयेन स्वराज्ये भवतीति पृथ्वीपतिः विजानीयात्।

अग्न्यभावस्थले धूमस्य समुत्पत्तिः, रात्रौ रक्तवर्णेन आकाशे प्रतीयमानत्वं, रात्रौ रक्तरजः आवृतवत् परिदृश्यमाणत्वं, मेघस्य अभावेऽपि नक्षत्राणां दर्शनाभावः, दिने नक्षत्रदर्शनादीनि च महाभयादानि सन्ति। प्रासादस्य पुरतः स्थितस्य मार्गे वृक्षशाखाया अकस्माद् भङ्गेन पतनं तावत् रणरंगोद्योगसूचकः। तद्वृक्षमैव समूलेन विनष्टो भवति चेत् राज्ञः देशभ्रंशः समजायते। अनृतौ वृक्षे पुष्पाणि यद्यागतानि तानि राज्यनाशकसूचकानि सन्ति। अकारणेन वृक्षे क्षीरस्रावो सम्भवति चेत् सर्वद्रव्यक्षयो भवति। पुष्पोत्पत्तेः समयात्पूर्वमेव लतासु बालकुसुमानि सम्भविष्यन्ति चेत् बालानां वधो भवति। वृक्षात् अकारणेन मद्यसदृशरसस्य

स्रावववशात् वाहननाशो भवति। वृक्षात् रक्तसदृशरसेन संग्रामः, मधुसदृशरसेन रोगः, तैलसदृशरसस्रावेन दुर्भिक्षभयं सलिले निसृते सति महद्भयं चेति चिन्तयेत्।

### १.२२ युद्धसूचकानि अवलक्षणानि

आयुधज्वलन-ध्वनि-कम्प-कोशविनिर्गमनप्रभृतीनि चिह्वानि दृष्टानि स्युः तर्हि महायुद्धसूचकानि सन्ति। आयुधेश्वन्या विकृतिः महायुद्धसूचकम्। पुरपक्षिणः वनचराः यदि भवन्ति, वनचराः पक्षिणः निर्भयेन पत्तनं यदि प्रविशन्ति, निशाचरपक्षिणः जन्तवश्च दिविगोचराः, द्युचराः पक्षिणः जन्तवश्च रात्रौ गोचरायन्ते च इमानि अवलक्षणानि युद्धभयदानि सन्ति।

कस्यचिद् गृहस्य पुरतः शुनकाः शवस्य अवयवा अस्थीनि वा आनीय स्थापयिष्यन्ति अथवा तदवयवैः सह गृहे प्रविशन्ति ते यदि तदा अचिराद् मरणं भवेत् गृहे।

### १.२३ रणरङ्गप्रवेशाय कालविशेषः

राज्ञः स्वानुकूलनक्षत्रतिथिराश्यादीन् विलोक्य विजयप्राप्तये सुमुहूर्ते युद्धाय प्रस्थानं कुर्यात्। ब्राह्मणक्षत्रियादि जातौ समुत्पन्नाः राजानः स्ववर्णनाथो अभीष्टस्थाने सञ्चारिष्यमाणकाले जन्मपतिः वीर्यान्विते मूर्धोदय, उर्ध्वास्य, चरलग्नेषु च ग्राह्यगणनक्षत्रे युद्धाय प्रयाणं कुर्यात्। विशिष्यछिद्रतिथिं चित्रानक्षत्रं च विहाय शुभशकुनानि विलोक्यमाणसमये, सर्वेषु ग्रहेषु सुगोचरेषु ग्राह्यनक्षत्रेषु च नृपतिः युद्धाय प्रयाणं कुर्यात्। युद्धार्थं प्रयाणाय पृष्टोदयराशयो अशुभाः। अशुभाश्च स्थिरराशयः मीनमिथुनौ मार्गविघ्नकारिणौ स्तः। उर्ध्वाननराशयो उत्तमाः। ते च शुभयुताश्चेत् उत्तमाः। वीणाधरो (मिथुनः) गुणधरोऽपि निषिद्ध एव। शीर्षोदयोर्ध्वमुखराशयश्च शुभसंयुताश्चेत् स्थिरराशयोऽपि ग्राह्याः। कुम्भस्तु मध्यमः, मीनः मार्गं वक्रं करोति। गर्गाचार्याः मिथुनं वर्ज्येति जगदुः। शीर्षोदयराशिषु युद्धाय गमनं समभिवाञ्छितकार्यसिद्धिकरं भवति। पृष्टोदयराशौ विफलता बलहानिश्च भवति। तत्तद्दिशायाः कृते विहितराशौ तद्दिशि मुखं कृत्वा गतस्य सुखेन कार्यसिद्धिः भवति। दिक् प्रतिलोमलग्ने

प्रयातस्य व्यर्थश्रमो भवति। तत्र मेषसिंहधन्विनः प्राच्येशाः, वृषकन्यामकराः दक्षिणेशाः, मिथुनतुलाकुम्भाः पश्चिमेशाः, कर्कटवृश्चिकमीना उत्तरेशाः सन्ति। यथा पूर्वं प्रतिपादितदिक्पतिराशौ मुखं कृत्वा गतस्य सुखेन जयप्राप्तिः। तद्विरूद्धदिशि गतस्य अपजयो भवतीति ज्ञेयः।

दिवाबलिलग्नराशौ दिने प्रयाणम् उत्तमम्। निशाबलिलग्नराशौ रात्रौ यात्रायाः कृते उत्तमम्। दिवाराशयो दिवाफलदाः। निशाराशयो रात्रिफलदाः। अस्य व्यत्ययं भवति चेत् न शस्तः। विशेषतो युद्धयात्रायां चरराशेर्लग्नगतौ रविचन्द्रौ स्यातां तदा अन्यराज्ये युद्धाय गमनं शस्तम्। पूर्वोक्तयोगे स्थिर राशिश्चेत् स्वराज्ये आगमनं शस्तम्। उभयराशिश्चेत् महीपतेः अन्यराज्ये गमनाय स्वराज्ये आगमनाय च वृद्धिकरं प्रशस्तं च। युद्धयात्रायां प्रयातुः राज्ञः जन्मलग्नतः जन्मराशितो वा द्वितीय-तृतीय-षष्ठ-एकादशतमराशीनां लग्नानि प्रयाणाय उत्तमानि।

राज्ञः शत्रोः जन्मलग्नमन्विश्य तस्य जन्मलग्नतो अष्टमलग्ने, अष्टमराशौ वा पापग्रहसमारुढसमये युद्धाय गच्छतो राज्ञः शत्रोः वधो भवेत्। यात्रालग्नात् चतुर्थभावे स्थितः चन्द्रः शोकदाता भवति। षष्ठाधीशो लग्नसंस्थोऽपि तथैव करोति। प्रयाणराशेः दिक्पतिः वीर्यहीनः रन्ध्राद्यनिष्टस्थानगश्चेत् मृत्युशोकं वीर्यहानिं च करोति।

## १.२४ परिघदण्डदिक्शूलविचारश्च

यद्धयात्रायां परिघदण्डविचारः करणीयः। तद्यथा- कृत्तिकादीनि सप्तनक्षत्राणि प्राच्याग्नेययोर्दिशि सन्ति। मघादीनि सप्तनक्षत्राणि दक्षिणस्याः नैऋत्योः दिशि च वर्तन्ते। अनुराधादिसाभिजित्सहितानि सप्तनक्षत्राणि पश्चिमवायव्ययोर्दिशि, धनिष्ठादीनि सप्तनक्षत्राणि उत्तर ईशान्ये च स्थितानि। वायव्यात् आग्नेयं यावत् परिघदण्डौ विद्यमानत्वात् परिघदण्डयो अतिक्रमणं कुर्वद्भिः पुरुषैः कष्टमनुभूयन्ते। परिघदण्डयोरतिक्रमणं न कष्टकरं गोस्त्रियोः।

धनिष्टादित आश्लेषां यावत् 14 नक्षत्रेषु उत्तरपूर्वदिशोर्मध्ये परिघदण्डौ विद्यमानौ भवतः तस्मात् एषु नक्षत्रेषु दक्षिणपश्चिमयोर्दिशि यात्रा न शुभा। मघातः श्रवणानक्षत्रं

यावत् चतुर्दशनक्षत्रेषु दक्षिणपश्चिमर्योदिश परिघदण्डौ विद्यमानौ भवतः। अतः पूर्वोत्तरयोर्दिशि प्रयाणं दोषाय कल्प्यते। प्रयाणाय केवलम् एकयोजनाभ्यन्तरे अयं परिघदण्डयोर्दोषो न विद्यते। अत्र दिक्शूलविचरो विधीयते। तद्यथा- प्राच्याः शूल नक्षत्रमस्ति ज्येष्टा, आग्नेय्याः शूलनक्षत्रं वर्तते पूर्वाभाद्रा, दक्षिणस्याः रोहिणी, नैर्ऋत्याः उत्तराफल्गुनी प्रतीच्याः पुष्यम्, वायव्याः हस्तः, उदीच्याः श्रवणा, ऐशान्या अश्विनी, इत्थम् अष्टदिग्भ्यः अष्टौशूलनक्षत्राणि सन्ति। शूलनक्षत्रस्य दिशि यात्रा क्रियते चेत् विपत्तिर्भवति।

अश्विनी-मृगशिरा-पुष्य-हस्त-अनुराधा-श्रवणा-धनिष्ठा-रेवती प्रभृतीनि नक्षत्राणि सर्वासु दिक्षु प्रयाणाय शुभफलदानीति वृहस्पत्याचार्याः जगुः। अश्विनी-पुष्य-हस्त-अनुराध ा-प्रभृतीनि नक्षत्राणि कस्याऽपि दिशायाः यात्रायाः कृते शुभदानीति वराहो वक्ति। यात्रयां सर्वदिक्षु शुभं मूलं चित्रा सर्वत्र वर्जयेत्। प्रतिपद् शस्यते केचित् इमां तिथिं निन्दन्ति केचन।

प्रयाणाय तिथयः उच्यन्ते। तद्यथा- नन्दातिथयः प्राच्याः, भद्रातिथयः दक्षिणस्याः जयातिथयः प्रतीच्याः, पूर्णातिथयश्च उदीच्याः कृते यात्रायां प्रशस्ताः सन्ति। अधोमुखराशयोऽपि वर्ज्याः। प्रयाणकर्तुः जन्मनक्षत्रात् 25-27 नक्षत्रे क्रमशः वर्ज्ये भवतः। इत्थं तिथिशूलविचारो विधेयः।

## १.२५ प्रयाणाय विहिताः वासराः तेषां फलानि

कुजवासरे प्राच्यां, चन्द्रशनिवासरयोः दक्षिणस्यां बुधागुरुवासरयोः प्रतीच्यां, रविशुक्रवासरयोः उदीच्यां च दिशि प्रयाणार्थं शुभकराः विहिताः। प्राच्यादिदिक्षु न शुभाः रविभौमजीवशीतांशुसूनुभृगु- मन्दशा शाङ्कवाराः, रविगुरुशुक्रवासरेषु प्राच्यां, दक्षिणस्यां कुजवासरे, शनिचन्द्रवासरयोः प्रतीच्यां बुधावासरे उदीच्यां च दिक्षु प्रयाणं व्रर्ज्यम्।

प्रयाणे सूर्यादिवासरफलं कोष्टकद्वारा एवं सूचयितुं शक्यते

| वासराः | फलानि |
|---|---|
| रविवासरः | मार्गनाशः |
| सोमवासरः | शक्तिक्षयः, अन्नहानिश्च |
| कुजवासरः | अग्निमयं रक्तपित्तकोपश्च |

| | |
|---|---|
| बुधवासरः | बन्धुप्राप्तिः |
| गुरुवासरः | विजयः धनलाभश्च |
| शुक्रवासरः | स्त्रीवस्त्रधनादीनां लाभः |
| शनिवासरः | रोगः, बन्धनं, वधः पराधीनता च |

अत्र ग्रहाणां वासरफलवत् कालहोरायाः फलमपि विचिन्त्य वदेत्। चन्द्रहोरायाः फलं स्त्रीसहायः रत्नलाभश्च। इतरेषां वासरफलं कालहोरायाः कृतेऽपि वक्तव्यमिति।

यस्यां दिशि यात्रा क्रियमाणा वर्तते तद्धिक्पतिः केन्द्रे नक्षत्रवशात् दक्षिणभागे अस्ति चेत् तद्ग्रहस्य राशेरुदयसमये यात्राशुभदा भवति। वासराधिपः पूर्वोक्तवत् नक्षत्रक्रमेण दक्षिणभागे लग्नाद्युपचय स्थाने स्थितश्चेत् यात्रा तस्मिन् काले शुभदा भवति।

यात्राकालिकलग्नात् उपचयस्थाने स्थितवासरकारको ग्रहः अशुभफलप्रदश्चेदपि तस्य वासरः शुभफलप्रदो भवति। अनुपचयस्थाने स्थितवासराधिपतिः शुभदश्चेदपि तस्य वासरः अशुभफलदायको भवति।

नौकायानस्य कृतेऽपि मकरलग्नं मकरांश च विहाय जलरशीनां लग्नानि मृदुक्षिप्रचरनक्षत्राणि च शुभानि।

## १.२६ यात्रालग्नतः द्वादशभावस्थग्रहफलानि

यात्रालग्नतः द्वादशभावस्थसकलखेचराणां यद्यत्फलं शुभाशुभं तत्सफलं प्रयातुः कृते वदेत्। यात्रालग्नतः शुक्लचन्द्रः प्रथम-षष्ठाष्टभावगतः, कृष्णपक्षस्य चन्द्रः प्रथम-चतुर्थ-षष्ठ-सप्तम-अष्टम- द्वादशभावेषु च गतश्चेत् अशुभदो भवति। षष्ठ-सप्तम-एकादशभावगः शुक्रोऽपि अशुभदः। गुरुः तृतीय-षष्ठ- अष्ठमस्थानगो अनिष्टः। सर्वे पापग्रहाः तृतीय-षष्ठ-दशम-एकादशभावन् विहाय अन्येषु भवगतेशु सत्सु अशुभाः। षष्ठ-तृतीय-एकादशभावन् विहाय अवशिष्टेषु नवभावेषु शनिराहू अशुभौ भवतः। रिष्फभावगतान् अखिलान् ग्रहान् अशुभदान् प्रोचयामासुः वाचस्पतयः।

यात्रालग्नतः तन्वादिद्वादशभावेषु स्थितसूर्यस्य भावफलानि।

| भावः | फलानि |
|---|---|
| लग्नम् | सन्ताप-रोग-शोक-विघ्नश्चेति |
| द्वितीयः | आरोग्यहानिः, अर्थनाशः, मानहानिः, सैन्यबलहानिश्च |
| तृतीयः | सुवर्ण-आहार-विद्रुम-भूमिप्राप्तिश्च |
| चतुर्थः | वैराग्यः, बन्धुकलहः, मनश्चिन्ता च |
| पंचमः | पुत्राणां विपत्तिः |
| षष्ठः | मार्गे अर्थलाभः, वाञ्छितफलसिद्धिः शत्रुनाशश्च |
| सप्तमः | भार्याकलहः, धननाशश्च |
| अष्टमः | मृत्युः रोगादयश्च |
| नवमः | धर्मह्रासः अर्थलाभश्च |
| दशमः | अयत्नेन कार्यलाभः |
| एकादश | बहुरत्नलाभः |
| द्वादशः | स्वधनव्ययः, अन्येन अर्थलाभः |

## यात्रालग्नात् तन्वादि-द्वादशभावगतचन्द्रस्य फलानि

| **भावः** | **फलानि** |
|---|---|
| लग्नम् | पूर्णचन्द्रं विहाय अस्मिन् भावे चन्द्रः शोककलहयोः कारको भवति। |
| द्वितीयः | स्त्रीलाभः, रत्न-मित्र-पुत्र प्राप्तिश्च |
| तृतीयः | शुक्लपक्षस्य चन्द्रेण बन्धुप्राप्तिः, कृष्णचन्द्रेण बन्धुहानिः स्त्री लाभः रत्नध |
| | नादिलाभश्च |
| चतुर्थः | शुक्लपक्षस्य चन्द्रेण बन्धुप्राप्तिः, कृष्णचन्द्रेण बन्धुहानिः |
| पञ्चमः | अर्थलाभः पुत्रशोकश्च |

| | |
|---|---|
| षष्ठः | सुखनाशः, मित्रारितां प्रकरोति च |
| सप्तमः | पूर्णचन्द्रः-धनलाभकरः, क्षीणचन्द्रः धननाशकरश्च |
| अष्टमः | मरणं दुःखञ्चेति फलं प्रददाति |
| नवमः | पूर्णचन्द्रश्चेत् कार्यसिद्धिः, क्षीणचन्द्रश्चेत् व्ययाधिकता च पूर्णचन्द्रः वृद्धिकरः, क्षीणचन्द्रः नाशकरश्च |
| एकादशः | ऐश्वर्य-सुख-धनलाभश्च |
| द्वादशः | क्लेशः, क्षयः, व्ययः, भयञ्च |

**यात्रालग्नादिद्वादशभावेषु गतस्य कुजस्य फलानि**

| **भावः** | **फलानि** |
|---|---|
| लग्नम् | विषभयं, अग्निबाधा, रुधिरस्रावः अस्त्रहानिश्च |
| द्वितीयः | शत्रुबलनाशेन अर्थागमः |
| तृतीयः | स्त्रीधनवस्त्रादीनां लाभः |
| चतुर्थः | बन्धुक्षयः, शत्रुभयञ्च |
| पञ्चमः | पुत्रविपत्तिः |
| षष्ठः | शत्रुनाशः |
| सप्तमः | अर्थः, रोगः, शत्रुभिः दुःखम् |
| अष्टमः | बन्धूनां विपत्तिः, रोगः, मृत्युः अर्थनाशश्च |
| नवमः | धर्मवृद्धेः विघ्नकरः |
| दशमः | शुभफलदायकः |
| एकादशः | द्रव्यलाभो ऐश्वर्यवृद्धिः |
| द्वादशः | बहुव्ययः |

## यात्राकालिकलग्नादिः-द्वादशभावेषुस्थितस्य बुधस्य फलानि

| भावः | फलानि |
|---|---|
| लग्नम् | कीर्तिः, सुखम्, अर्थलाभः, जयश्च |
| द्वितीयः | कदाचित् वित्तागमः, सोत्कण्ठं, कदाचिच्च अश्रद्धयाच्च धनागमः |
| तृतीयः | अभिलषितकार्यसिद्धिः |
| चतुर्थः | शयनम् अन्नापानादिविभवप्राप्तिः |
| पञ्चमः | पुत्रागमनम् |
| षष्ठः | शत्रुमरणं, मनक्लेशश्च |
| सप्तमः | प्रवराङ्गनाप्राप्तिः, वस्त्रधनप्राप्तिश्च |
| अष्टमः | केचित् वदन्ति क्लेशः, केचित् शंसन्ति शुभम् |
| नवमः | धर्मवृद्धिः |
| दशमः | ईप्सितार्थ-सिद्धिः भवति |
| एकादशः | अयत्नेय विद्याऽर्थाप्तिश्च |
| द्वादशः | व्ययः |

## प्रयाणलग्नादिद्वादशभावेषु स्थितस्य गुरोः फलानि

| भावः | फलानि |
|---|---|
| लग्नम् | कीर्तिः लाभश्च |
| द्वितीयः | अर्थलाभः |
| तृतीयः | क्षुत्श्रमाप्तिश्च |
| चतुर्थः | धर्मतः अभिमानः |

| | |
|---|---|
| पञ्चमः | असाध्यस्य कार्यस्य सिद्धिः |
| षष्ठः | शत्रोः वशीकरणम् |
| सप्तमः | स्त्रीधनप्राप्तिः यशप्राप्तिश्च |
| अष्टमः | मृत्युः |
| नवमः | पुत्रलाभः, धर्मवृद्धिश्च |
| दशमः | अर्थलाभः, यशो लाभश्च |
| एकादशः | वाञ्छितकार्यसिद्धिः |
| द्वादशः | शोकः दुःखञ्च |

**यात्रालग्नादिद्वादशभावेषुस्थितस्य शुक्रस्य फलानि**

| **भावाः** | **फलानि** |
|---|---|
| लग्नम् | वेश्यालाभः, अर्थलाभः, वस्त्रलाभः, कार्यसिद्धिश्च |
| द्वितीयः | अर्थलाभः |
| तृतीयः | गतः न सीदति, प्राप्नोति च अभीष्ट फलम् |
| चतुर्थः | मित्रप्राप्तिः |
| पञ्चमः | स्थानार्थमानाप्तयः |
| षष्ठः | शत्रुपराजयः रतिसुखप्राप्तिश्च |
| सप्तमः | स्त्रीलाभः, धनलाभः अन्तेच राज्यनाशः |
| अष्टमः | कार्यसाधनम् |
| नवमः | शीघ्रम् ईप्सितकार्यसिद्धिः |
| दशमः | बहुधनलाभः |
| एकादशः | जयः धनलाभश्च |
| द्वादशः | दुःखं शाठ्यं च |

**यात्रालग्नादिद्वादशभावेषु स्थितस्य शनेः फलानि**

| **भावाः** | **फलानि** |
|---|---|
| लग्नम् | बन्धं वधं च |
| द्वितीयः | अर्थनाशः शोकश्च |
| तृतीयः | शत्रुबलनाशः |
| चतुर्थः | परेभ्यः बन्धुवधम् |
| पञ्चमः | अर्थसिद्धेरभावः |
| षष्ठः | शत्रुजयः |
| सप्तमः | उत्साहभङ्गः अक्षिरूजः |
| अष्टमः | विषाग्निशस्त्रादिवधः |
| नवमः | सुखलाभः धर्मग्लानिश्च |
| दशमः | कर्मवैकल्यं दुःखं च |
| एकादशः | द्रव्यलाभः शत्रुजयः |
| द्वादशः | अनर्थमुपैति |

एते भूपतेः यात्रालग्नात् द्वादशभावेषु स्थितानां ग्रहाणां फलानि सन्ति।

यात्रालग्नात् तृतीय षष्ठ दशम एकादशेषु स्थिताः पापाः शुभाः स्युः। दशमस्थो वृहस्पतिः न शुभदः। सौम्याः सर्वत्रगाः शुभं फलं जनयन्ति चेदपि सप्तमस्थो शुक्रः जिगमिषोः राज्ञः कृते इष्टफलदायको न भवति।

**१.२७ यात्राया आरम्भविधिः**

राज्ञः प्रयाणं सिद्धियोगैर्वशात्, ब्राह्मणानां यात्रां नक्षत्रतिथिबलैर्वशात्, चोरादीनां शुभशकुनैः, अन्येषां यानं सुमुहूर्तैश्च चिन्तयेत्।

यात्रारम्भे यास्यन्नृपः भूमौ दक्षिणपादपूर्वं द्वात्रिंशत्पदानि गत्वा, ततः क्रमशः प्राच्यां गजः दक्षिणस्यां रथः, प्रतीच्याम् अश्वः, उदीच्यां दारूफलकम् (शिबिकां) आरूड्य यायात्।

प्रयाणे सहस्रधनुष्प्रमाणं, तदर्धं वा शतं वा गत्वा प्रस्थितः तिष्टेत्। प्रायाणे सहस्रध नुष्प्रमाणं यावत् दूरं गत्वा अथवा पञ्चदशशतधनुषां प्रमाणं वा शतधनुषां प्रमाणं वा दूर गत्वा विश्रामः कार्य इत्यभिप्रायः। तदनन्तरं स्वेच्छया गच्छेत्। प्रयातो नृपः दशदिनानि अन्ये च पञ्चदिनानि नैकत्र वसेत्। यदि तदपेक्षया अधिकानि दिनानि स्थातव्यञ्चेत् पुनः प्रस्थानं सुमुहूर्तं दृष्ट्वा कुर्यात्।

## १.२८ प्रयाणार्थं शुभशकुनानि

प्रयाणस्य आदौ सर्वतः क्षुत आकर्ण्यते चेत् अशुभदः, गोक्षुतः मरणमेव करोति। बलाद आगतो क्षुतः, वृद्ध-पीनसिक-बालकृतं च क्षुतः अफलमिति केचित् आहुः। औषध सेवनकाले, वाहनारोहणकाले, उपवेशने, शयने, भोजनकाले, विद्यारम्भकाले बीजवापे च क्षुतं शुभकरं स्मृतम्।

प्रज्वलिष्यमाणो वह्निः, गजः, अश्वः, भद्रदीपः, वेश्या, अङ्कुशः, आयुधः, मृत्तिका, तण्डुलः, व्रीहिः, इक्षुदण्डः फलम्, चामरं, भक्ष्यप्रभृतीनि यात्राकाले शकुनानि शुभानि भवन्ति।

भेरी-मृदङ्ग-मृदुमर्दल, शङ्ख-वीणा-वेदध्वनि-मधुर मङ्गलगीतघोषप्रभृतीनां श्रावः शुभदः। पुत्रान्विता युवती, सवत्साधेनुः, धौतांशुकरजतप्रभृतयो अभिमुखाः यात्रायां प्रशस्ताः।

यात्रा प्रस्थितिकाले कलहायमाणशब्दानां श्रवणं रोधनशब्दश्रवणं वा यदि श्रूयते तदा यात्रायाः कृते न गच्छेत्।

## १.२९ सूर्यकालाग्निचक्रं रविशूलचक्रं भूबलं च

अद्य मम कृते समरे मृत्युः भवति किम्? का स्थितिर्मम युद्धे भविष्यति? किं युद्धे

व्रणोद्भवो भवति किं, जयो वेति पृच्छायां सूर्यचक्रादिना कथं वाच्यमिति उच्यते। तद्यथा- सूर्याधिष्टितनक्षत्रं, एकं नक्षत्रं पृष्टत अग्रतो एकैकं नक्षत्रम् आहात्य त्रीषु अमीषु नक्षत्रेषु जातानां जनानां युद्धे भयम्। अमीभिः नक्षत्रत्रयैः सकाशाद् एकादशनक्षत्रतः प्रारभ्य एकोनविंशति नक्षत्रेषु जातानां जनानां मृत्युभयम्। रविनक्षत्रतः 3.4.20.21 तमनक्षत्रेषु जातानां कृते युद्धे विजयः भवति। अवशिष्टेषु नक्षत्रेषु सामान्यतो विजयस्य प्राप्तिः भवति। पृच्छकराज्ञा स्वजन्मभं कुत्र वर्तते इति विचार्य युद्धकर्तुः सकाशाद् जयं वा अपजयं वा विजानीयात्। अर्कभात् पुरतः पृष्टतश्च एकैकनक्षत्रे जातानां युद्धे भयामिति यत् पूर्वं प्रोक्तं तादृशनक्षत्रत्रयैः सकाशाद् तृतीयनक्षत्रतः अष्टमनक्षत्रेषु जातानां जनानां कृते विजयो भवति युद्धे। सूर्यभात् चतुर्दश-पञ्चदशतम् नक्षत्रयोर्जातानां जनानां कृते युद्धे मृत्युः भवति। अभिजित् सहितं इदं चक्रं सूर्यकालाग्निचक्रमिति नाम्ना अभिधीयते। यतः अत्र सर्वत्र अभिजिन्नक्षत्रं गणनावसरे योज्यम्।

सूर्यभात् 2.9.10.11.18.19.20.27 एतेषु नक्षत्रेषु जातानां योद्धानां मरणम्। सूर्यभात् 12.13.14.15.16.17 एतेषु नक्षत्रेषु जातानां कृते पराजयः। सूर्यभात् 3.4.5.7.8.21.22.23. 24.25.26 एषु नक्षत्रेषु जातानां विजयो भवति। सूर्यशूलचक्रे तावत् अभिजिन्नक्षत्रस्य गणना न क्रियते। पृच्छकस्य जन्मनक्षत्रं यत्र आयातीति विज्ञाय तदनुसारेण जयापजयमृत्युप्रभृतिफलं चिन्तयेत्।

रणरङ्गे कुत्र स्थित योद्धानां जयापजयो भवति इत्यस्य विषये भूमेः वीर्यवशात् फलं वक्तव्यम्। तस्य प्रकारः अत्र उच्यते। तद्यथा- चैत्रदिमासेषु पक्षणां त्रिस्तयं रणक्षिततले एकैकस्यां दिशि विन्यसेत्। तत्र क्रमशः पक्षत्रितयस्य वीर्यत्वं पूर्व-वायव्य, दक्षिण-ईशान्य, पश्चिम-आग्नेय, उत्तर-नैऋत्यादिषु तत्तद्धिशि क्रमेण अवगन्तव्यम्। रणरङ्गे स्व स्व भूबलस्य दिशं पृष्टतः कृत्वा दक्षिणे दक्षिणभागे वा युध्यन् जयं प्राप्नुवन्ति योद्धारः।

**१.३० मृगयाप्रश्नः**

आखेटप्रश्ने आरूढलग्नात् अष्टमराशिः मेषः वृश्चिको वा स्यात्, लग्नात् अष्टमे कुजः, केन्द्रे वा स्यात्, पूर्वोक्तलक्षणत्रये यद्येकोऽपि लक्षणं वर्तते चेत् आखेटकप्रक्रियायां बालयुतो वराहः मरिष्यतीति। लग्नात् केन्द्रे सूर्यो वर्तते चेत् व्याघ्रो मरिष्यति। लग्नात्

अष्टमैकादशे केन्द्रे च बुधो वा शुक्रो वास्यात्तदा कस्यापि जन्तोः मृतिः न भवति। केन्द्रे स्थितः कुजः शुक्रश्च 1.8.11 भावेषु गतश्चेत् शस्त्रतः क्षतो मृगः यस्याति। न तु मरिष्यति।

चरराशीनां लग्नानि लग्ने कुजः, अष्टमे मान्दिः चतुर्थे शनिश्चेत् आखेटे एको वराहो लभ्यते।

लग्नात् चतुर्थे सूर्यः, सप्तमे शनिः, लग्ने कुजः दशमे राहुश्चेत् बहवो मृगाः मरिष्यन्ति मृगयाम्।

आखेटकप्रश्नस्य आरूढलग्नात् पापग्रहाः केन्द्रे त्रिकोणे च स्युः, तृतीये मन्दिः मकरो आरूढ लग्नञ्चेत् मृगयाप्रश्ने मृगलाभसूचकः। अष्टमे कुजचन्द्रौ, नवमे यमघण्टकः तृतीये मान्दिश्चेत् गर्भिणी मृगप्राप्तियोगः। अत्र मृगाकृतिद्रेष्काणेन आदिशेत्-प्राणिम्।

राशीनां ग्रहाणां च उक्तादिशि निम्नोन्नत प्रदेशे मृगाणां हननं वदेत्। मरिष्यमाणमृगाणां संख्या ग्रहाणाम् अंशु-रश्मिसंख्यया वदेत्। ग्रहाणां शत्रु-नीच-मोढ्यादियुतेर्वशात् मृगस्य बन्धनादीन् विचार्य वदेत्।

## १.३१ सूर्यादिग्रहैश्चिन्तनीया मृगाः

मृगयाप्रश्नै सूर्येण सिंहाद्युत्कृष्टमृगाः चिन्तयितव्याः। चन्द्रेण शशकप्रभृतयो सौम्यमृगाः, कुजेन व्याघ्रप्रभृतयो क्रूरमृगाः, बुधेन वराहप्रभृतयः, गुरूणा अश्वगजादयः, शुक्रेण कुरङ्गादयः, शनिना कपिश्वरोष्ट्रादयः, राहुणा गोधादयश्च चिन्त्याः सन्ति।

स्पष्टार्थं ग्रहैर्विचारणीयाः मृगवर्गाः कोष्टके प्रदत्ताः सन्ति।

| ग्रहः | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | राहुः |
|---|---|---|---|---|---|---|---|---|
| वर्गः | सिंहवर्गः | शशवर्गः | व्याघ्रवर्गः | वराहवर्गः | वनगजवर्गः | हरिणवर्गः | क्षुद्रभोज्योष्ट्रादिवर्गः | गोधावर्गः |

विशेषेण मृगयाप्रश्ने आरूढलग्नाद् केन्द्रे त्रिकोणे च स्थितग्रहेभ्यः विहितानां मृगाणां दर्शनादिकं भवति। यस्य ग्रहस्य कृते गुलिकस्य योगादिसम्बन्धो वर्तते तद् ग्रहस्य मृगस्य मृतिं वदेत्।

****

# प्रश्नावली

1. संक्षेपण उत्तरं लिखित - 5 x 7 = 35

(1) दैवमानुषप्रश्नयोः भेदचिन्तनविधिं वर्णयत।

(2) राज्ञः प्रश्ने भूपतेर्विषये भावचिन्तनक्रमं स्पष्टयत।

(3) युद्धप्रश्नकरणविधिं स्पष्टयत्।

(4) प्रयाणार्थं विहितानि शुभशकुनानि कानि?

(5) सूर्यादिग्रहैः चिन्तनीयाः मृगाः के?

II विस्तरेण उत्तरं लिखित - 10 x 4 = 40

(1) राज्ञः भाग्यं युवराजादीनां चिन्तनं राज्ञः स्थानप्राप्तिश्च कथं विचारयेत।

(2) रात्रोः आगमनकालनिर्णयः युद्धे सुन्धेर्लक्षणानि च लेख्यानि।

(3) देवप्रश्नविधि विलिख्य देवता सान्निध्यहानेः कारणानि च कानि?

(4) वाराहीसंहितोक्तयुद्धाद्यनिष्टलक्षणं युद्धसूचकं अवलक्षणं च विशदीकुरुत

प्रश्नद्वयस्य कृते निबन्धं रचयतः- 12½ X 2 = 25

(1) नैवेद्यादिषु दोषचिन्तनक्रमम् अष्टबन्धचिन्तनरीतिं विशदीकुरुत।

(2) सर्वसम्मतदेवभावाः के? देवभावानां गुणदोषचिन्तनक्रमं निरुपयत।

*******

<u>**श्रीः**</u>

# पञ्चविंशोऽध्यायः

## १.० अवतरणिका

अये छात्राः!

पूर्वं चतुर्विंशे अध्याये भवन्तः देवप्रश्न–राजप्रश्न–युद्धप्रश्न–मृगयाप्रश्नश्चेति चतुर्णां प्रश्नानां समाधानक्रमं पठितवन्तः। इदानीम् अस्मिन् अध्याये वृषिलक्षणविचारो विधीयते। कृषिप्रधानेऽस्माकं देशे वृष्टि अस्माकं प्राण एवास्ति। **'आदित्याज्जायते वृषिः'** इति स्मृतौ प्रोक्तवत् भगवान् सूर्यः अष्टाभिर्मासैः सर्वदार्थेभ्यः रसात्मिका आपः संगृह्य पुनः वृष्टिरूपेण भूमौ वर्षति। ता आपः सामुद्रियाः सरिताः भौमा आन्तरिक्षा इति चतुष्प्रकाराः सूर्यात् आयान्ति। **अन्नं वै प्राणाः** अन्नैर्विना प्राणिनां प्राणाः न वर्तन्ते। तच्चान्नं प्रावृट्कालाश्रयाधीनं वर्तते। यदा ग्रीष्मातपेन सर्वेऽपि प्राणिनो वृक्षादीनि प्रकृतेर्विभिन्नान्यङ्गानि च व्याकुलतामायान्ति तदा वर्षायाः प्रारम्भो भवति। अतो अस्माकं देशे अस्य ऋतोः अपूर्वं महत्वं विद्यते। समये वर्षणं न स्यात् तर्ह्यसंख्याः जना अन्नाभावेन पञ्चत्वं गच्छेयुः। यद्यपि नद्यादिजलं वर्तते तथाऽपि कृषये वर्षाजलं यावल्लाभकारी तावल्लाभप्रदं नद्यादिजलं न भवति। सर्वप्राणिनां कृते प्रकृतिप्रदत्तमेकपूर्वं वस्तु इयं वृष्टिः वर्तते। अतः 'वृष्टिमाद्यं खलु कृषिकर्मसाधनम्' इति प्रस्तुत प्रधानः विषयः।

**उद्देश्यानि** –

* **वर्षालक्षणम्**
* **इन्द्रधनुषः सकाशाद् वृष्टिचिन्तनक्रमः**
* **सस्योत्पत्ततेः काललक्षणम्**
* **धनुर्मासलक्षणेन अग्रिमवृष्टिचिन्तनविधिः**
* **चचपादिवृष्टिमण्डलक्रमः**
* **गोसर्पपिपीलाकादिशकुनैः वृष्टिविचारः**
* **मार्जालबालचेष्टादिभिः वृष्टिचिन्तनक्रमः**
* **सद्योवृष्टेः शाकुनानि**

* **मासारम्भकालिकसूर्यादिवासरैः वृष्टिः**
* **नक्षत्रैः वर्षस्य लक्षणम्**
* **तिथिभिः वृष्टेर्लक्षणम्**
* **करणैः वृष्टेर्लक्षणम्**
* **संक्रमणलग्नात् वृष्टिचिन्तनप्रकारः**
* **इन्द्रमण्डलादिदीनां लक्षणं फलञ्च**
* **संक्रान्तिपुरूषमीमांसा**
* **वर्षप्रश्नविचारक्रमः**
* **प्रश्नावली**

इमे विषयाः अस्य पाठस्य अध्ययेन ज्ञायन्ते।

## १.१ वर्षालक्षणम्

रवेः मिथुनसंक्रमणकाले चन्द्रः जलराश्यशस्थः सूर्याद् द्वितीये अथवा जलराश्यंशस्यः शुक्रः सूर्याद् द्वादशस्थे सति प्रभूता वृष्टिः तस्मिन्मिथुनमासे सम्भवति। यद्यपि अयं विषयः प्रश्नवशात् विचारर्यमाणो नैवास्ति। अपितु कालस्य लक्षणमस्ति। वर्षाकाले राहुकुजरविचन्द्रशनयः जलराशिगाः चन्दबुधौ च स्थलराशिगौ स्यातां स समये महावृष्टिः सम्भवति।

आदित्यशुक्रौ एकर्क्षगौ एकस्यैवराशेरंशे बुधसंयुतौ स्यातां तदा भूः तावत् वर्षपूर्णा स्यात्। विशिष्य पूर्वाक्तयोगे जलराशेंशे तौ च स्यातां तदा असंशयेन वृष्टिः भवति।

एकर्क्षे एकांशकसमायुक्तौ शुक्रबुधौ स्यातां तौ च मोढ्यंगतौ, शुक्राद् अधस्ताद् भौमश्चेद् बहुवर्शसमागमो वाच्यः।

### १.२ इन्द्रधनुषः सकाशाद् वृष्टिचिन्तनविधिः

सूर्यः स्थलराशिगः सन् जलराशेर्वर्गगाः चन्द्रबुधशुक्राः स्युः, इन्द्रधनुः वारूण्यां दिशि विलोक्यमाणश्चेत् भूरिवर्षणं भवति।

प्राच्यां इन्द्रधनुः पश्येत्, चन्द्रः जलवर्गस्थः, शनिः स्थलराशौ सञ्चरिष्यमाणकाले महद् वर्षं सञ्जायते। वर्षर्तौ कुलिशभृच्चापः उदीच्यां दृष्टश्चेत् अवृष्टिः भवति। वर्षाकालं

विहाय अन्यकाले पूर्वदिशि इन्द्रधनुः विलोक्यते चेत् वृष्टिः भवति। प्रतीच्यां यस्मिन् कस्मिन् कालेऽपि इन्द्रधनुर्द्रक्ष्यते चेत् वृष्टिः न भविष्यतीति चिन्तयेत्।

मेघाः सूर्यश्मीन् यदा आच्छादयन्ति तदा आच्छादिते घनान्तरे करसंघो अर्कवद् दृश्यः सः प्रतिसूर्येति ईर्यते। तादृशोः प्रतिसूर्यः सूर्यबिम्बस्योत्तरे विलोक्यते चेत् वृष्टिः सम्भवति। प्रतिसूर्यः दक्षिणभागे दृष्टः चेत् अनिलकृद् भवति। उभयस्थः सलिलभयं, उर्ध्वभागे दृष्टश्चेत् राज्ञां विपत्तिः, अधो परिदृष्टश्चेत् जनहानिश्च सम्भवति।

## १.३ सस्योत्पत्तेः काललक्षणम्-

आषाढमासस्य पूर्णिमायाम् ईशान्यदिशि अनिलो नुदति स समयः सूर्यस्तमयकालश्चेत् तदानीं सस्यानां निष्पत्तिरुत्तमा भवति।

आषाढकृष्ण-चतुर्दश्यां पूर्वाभाद्रानक्षमागत्य तद्दिने एव वर्षति पर्जन्यः तर्हि तस्मिन् वर्षे सुवृष्टिः भविष्यति। येन सस्यानां समृद्धिः सञ्जायते परन्तु तद्दिने पर्जन्यो नहि वर्षति तर्हि ततः सम्पूर्णे वर्षे वृष्टिः सम्यक् न भवति। आषाढशुक्ल पञ्चमी यदि रविवासारे आयाति तर्हि अल्पवृष्टिः, सोमवासरे चेत् सुवृष्टिः कुजवासरे चेत् महर्ति वृष्टिः, बुधवासरे चेत् मारुतभीतिः गुरुवासरे चेत् सुभिक्षं, शुक्रवासरे चेत् प्रलयं, शनिवासरे चेत् तापम् इत्थं निर्दिष्टातिथौ वासरानुगुण्येन वृष्टेः फलं चिन्तनीयम्।

## १.४ धनुर्मासस्य लक्षणेन अग्रिमवृष्टिचिन्तनविधिः

सुर्यः पूर्वाषाढाश्रितर्क्षे सति (धनुर्मासे) तन्नक्षत्रस्य (लयः-13) आदौ एकविभागात्मककाले आकाशस्थो सूर्यः मेघावृतश्चेत् ततः आगमिष्यमाण आद्रानक्षत्रे तावत् सूर्यस्य सञ्चारकाले प्रभूतावृष्टिः जायते। अत्र सूर्यनक्षत्रस्य कृते महानक्षत्रमिति नाम्ना व्यवहारः) कस्यांचित् दिशि मेघो आवृतश्चेत् कृचित् स्थाने एव वृष्टिः। पूर्वोक्त समये मेघा एव न विलोक्यन्ते तर्हि सूर्यः आद्रानक्षत्रप्रवेश समये वृष्टिः न भवति केवलम् आतप एव दृश्यते। पूर्वोक्तत्रयोदशभागात्मक नक्षत्रस्य द्वितीयभागे मेघः आवृतो दृश्यते तर्हि पुनर्वसुनक्षत्रे सूर्यः सञ्चरिष्यमाणकाले वृष्टिः सम्भवति। द्वितीयभागे मेघो नावलोकितश्चेत्

त्रयोदशदिनानि यावत् वृष्टेरभाव:। कुत्रचित् स्थले मेघा: विलोकिताश्चेत् कृचिद् वृष्टि: भवति। एवं रीत्या पर्वाषाढानक्षत्रतृतीयेभागेन पुष्यनक्षत्रे सम्भाव्यमाणां वृष्टिं, चतुर्थं भागेन आश्लेषायां जायमानां वृष्टिं च चिन्तयेत्। आद्रात: ज्येष्टां यावत् पूर्वाषाढाया: त्रयोदशभागेभ्य: त्रयोदशमहानक्षत्रेषु वृष्टे: स्थिति: ज्ञेया।

## १.५ चचपादिवृष्टिमण्डलक्रमः -

दिकरकरनिकटतयाऽदृश्यतां प्राप्य उदीयमानो शुक्रस्य नक्षत्रकाललक्षणेन वृष्टे: लक्षणं निगद्यते अत्र। शुक्रस्य अस्तानन्तरम् उदये चचपत्रिपषड्भाद्या: वृष्टे: फलचिन्तनाय प्रोक्ता: सन्ति। अत्र प्रतिपादितचकारेन चतु: संख्यां, पकारत: पञ्चसंख्यां, त्रिकारेण, तिस्रस्संख्या षकारेण षट्संख्या च ज्ञेया:। अत्र पपौ कष्टफलं, चचौमध्यफलं त्रिषट्के उत्तमं फलं च सूचयन्ति। भरण्यादिमहानक्षत्रत: प्रारभ्य 4.4.5.3.5.6 इत्थं 27 महानक्षत्राणां कृते आहत्य षण्मण्डलानि भवन्ति। शुक्र: दिनकरनिकटतयाऽदृश्यतां गतो चतुर्थषष्ठमण्डलयोर्मध्ये सञ्चारिष्यमाणकाले उदितो भवति तदा सुवृष्टि: सस्यानां समृद्धिश्च भवति। शुक्र: प्रथमद्वितीयमण्डले गमनसमये अस्तंगतो उदितो भवति तर्हि मध्यमवृष्टि: सम्भवति। पूर्वोक्तशुक्र: तृतीयपञ्चममण्डले सञ्चरिष्यमाणसमये मौढ्यं गतो अभ्युदेति तर्हि अल्पवृष्टि: दारिद्रयं च फलं चिन्त्यम्। भरणीत: आश्लेषां यावत् अष्टसु नक्षत्रेषु मौढ्यं गतो शुक्र: उदेति तदा सामान्यवृष्टि: चित्रादिपञ्चके ज्येष्ठादिपञ्चके च मौढ्यंगतो शुक्रो उदेति तर्हि अल्पवृष्टि: दारिद्रयं च। स्वाती-विशाखा-अनुराधा-धनिष्ठा-शतभिषा-पूर्वाभाद्रा-उत्तराभाद्रा-रेवती-अश्विनीप्रभृतीषु नवनक्षत्रेषु अदृश्यतां गतो भार्गव: उदेति तर्हि सुवृष्टि: सस्यसमृद्धिश्च भवति।

प्रावृट्काले चन्द्र: शुक्रस्थितराशित: सप्तम् राशिगत: किञ्च शनि: विद्यमानराशित: नवमपञ्चमगो वा शुभदृष्टश्चेत्तदा वृष्टि: सम्यक् भवति।

एकराशिगतयो: ज्ञशुक्रयो:, जीवज्ञयो: संयुति: गुरुसितयोश्च संगमश्चे एते योगत्रया: सम्यक् वृष्टिकारका: सन्ति प्रावृट्काले। यमारयो: योगेनापि वृष्टिर्भवति परन्तु तयो: यमारयोरुपरि सद्ग्रहाणां दृष्टि: न स्यात्तर्हि अग्निभयं वायुभयं च भवति।

## १.६ गो-सर्प-पिपीलिका-मार्जाल-बालचेष्टाभि वृष्टिचिन्तनक्रमः-

विना उपघातेन गवां प्लुतिः, भुजङ्गानां द्रुमाधिरोहः, अहिव्यवायः, पिपीलिकानाम् अण्डोपसंक्रान्तिः, भूमौ ओतुर्नखैर्विलिखननं, शिशुभिः रभ्यायां कृतसेतुबन्धैश्च वर्षं निवेदयेत् उपर्युक्त निमित्तैः सकाशाद्। गिरयो अञ्जनश्चूर्णसन्निभाः, दिवा वाष्पनिरूद्धकन्धराः, शशिनः परिवेशः, कृकवाकु विलोचनारूणा एते वृष्टिदाः सन्ति शिघ्रम्।

## १.७ सद्यो वृष्टेः शाकुनानि

चन्द्रः आकाशे शुककपोतविलोचनसन्निभो वा मधुनिभसदृशो वा दृश्यते अथवा निशि प्रतिशशी यदि विराजते तदानीं शीघ्रमेव वृष्टिः सम्भवति। निशि सविद्युन्मेघध्वनिः, यदि दिने रूधिराभो दण्डवत् स्थितो विद्युत् प्रतीयते, पूर्वदिशि शीतलः पवनः यदि नुदति च, तदा आशु सलिलस्य आगमो भवति।

यदि सन्ध्याकालिकमेघाः मयूर-शुक-चाष-चातकसदृश वर्णाः वा जपाकुसुम-चम्पकद्युतियुताश्च वा स्युः तर्हि ते अचिरेण यच्छन्ति आपः। जलोर्मीनगनक्रकच्छपव-राहमीनोपमाः मेघाऽपि शीघ्रवृष्टिकारिणो भवन्ति।

## १.८ संवत्सराम्भकालिकरव्यादिवासरैः वृष्टिः

| वासरः | फलम् |
|---|---|
| चैत्रमासारम्भे यदि रविासरश्चेत् | प्रावृट्कालस्यादौ अन्ते च वृष्टेरभावः कृचित् तत्र तत्र वृष्टिः। |
| चैत्रमासारम्भे चन्द्रवासरश्चेत् | समुचितसमये अल्पवृष्टिः, परन्तु विलम्बेन वृष्टिः। |
| चैत्रमासारम्भे कुजवासरश्चेत् | वर्षणं भवति पर्वतेषु। |
| चैत्रमासारम्भे बुधवासरश्चेत् | सुवृष्टिर्भवति संवत्सरे। |
| चैत्रमासारम्भे गुरुवासरश्चेत् | महती वृष्टिः सम्भवन्ति। परन्तु अतिवृष्टि अनर्थकरी भवति। |
| चैत्रमासारम्भे शुक्रवासरश्चेत् | न्यूना वृष्टिः, परन्तु सुभिक्षं समृद्धिश्च भवति। |
| चैत्रमासारम्भे शनिवासरश्चेत् | रोगः धान्यानां नाशः, जनक्षयश्च। |

इत्थं वर्षस्यलक्षणं चैत्रमासारम्भकालिकवासरैः सकाशाद् चिन्तनक्रमो प्रतिपादितः

## १.९ नक्षत्रैः वर्षस्य लक्षणम्

मकरमेषयोः सन्क्रान्तिकालिकनक्षत्रैर्वशात् वृष्टेः लक्षणम् उच्यते कोष्टकेऽस्मिन्-

| **नक्षत्राणि** | **फलानि** |
|---|---|
| अश्विनी | कालेवर्षकृद् भवति। |
| भरणी | जननाशः सस्यसुभिक्षं च। |
| कृत्तिका | अल्पवृष्टिः, राजोपद्रवश्च । |
| रोहिणी | ब्राह्मणानां कृते विपत्तिः, आदौ वृष्टिश्च। |
| मृगशिरः | अल्पवृष्टिः पशुहानिश्च। |
| आर्द्रा | धान्यानाम् अल्पक्षयः। |
| पुनर्वसुः | आदौ वृष्टिः, पशुरोगः, मानवानां रोगभयः, दुवृत्तिः, कोपश्च। |
| पुष्यः | सुवृष्टिः भवति, सस्यनाशश्च । |
| आश्लेषा | अतिवृष्टिः, सस्यभयं, भीषणं युद्धं च । |
| मघाः | महतीवृष्टिः, राजभयं, धान्यानां नाशश्च। |
| पूर्वाफल्गुनी | शूद्राणां ब्राह्मणानाञ्च नाशः भूमौ सुभिक्षं च भवति। |
| उत्तराफलगुनी | ‘‘ ‘‘ ‘‘ ‘‘ |
| हस्तः | क्षेमः, आरोग्यं सुभिक्षं च। |
| चित्रा | अनर्थः, अल्पवृष्टिः, अरोगता च । |
| स्वाती | अतिवृष्टिः, सुभिक्षं, ब्राह्मणानां पुष्टिः शूद्राणाम् आपदश्च। |
| विशाखा | मनुष्यमाणां रोगभयम्। तत्र तत्र कृचिद् वृष्टिः, सुभिक्षं, शूद्राणां विपत्तिश्च। |
| अनुराधा | प्रभूता वृष्टिः, धान्यनाशश्च । |
| ज्येष्टा | प्रभूता वृष्टिः, धान्यनाशश्च। |
| मूला | गवां रोगः, मानवानां रोगः ब्राह्मणकर्म महती वृष्टिश्च विघ्नानि। |
| पूर्वाषाढा | सस्याभिवृद्धिः, महतीवृष्टिः, अन्ते विपत्तिः । |
| उत्तराषाढा | अल्पवृष्टिः । |

| | |
|---|---|
| श्रवणम् | महद्वृष्टिः सस्यवृद्धिश्च । |
| धनिष्ठा | आदौ वृष्टिः, स्वकाले न वर्षणम्, धान्यहानिश्च । |
| शताभिषक् | बह्वी वृष्टिः, कुत्सितधान्यानां वृद्धिः। |
| पूर्वाभाद्रा | बह्वी वृष्टिः, कुत्सितधान्यानां वृद्धिः। |
| उत्तराभाद्रा | बह्वी वृष्टिः, पुण्यकर्माल्पता च । |
| रेवती | बह्वी वृष्टिः, स्वोचितकाले वृष्टिः सुभिक्षं च । |

## १.१० तिथिभिः वृष्टेर्लक्षणम्

मेषसंक्रानतेर्दिने प्रतिपदादि-तिर्थेर्वशात् वृष्टेः फलविचारः कोष्ठके प्रदर्शितवत् ज्ञेयः।

तद्यथा-

| तिथयः | फलानि |
|---|---|
| मेषसंक्रान्तेर्दिने प्रतिपद्तिथित्रचेत् | भूः वर्षविहीना भवति। |
| मेषसंक्रान्तेर्दिने द्वितीयातिथिश्चेत् | वृष्टिः निजसमये भवति, धान्यमल्पताच । |
| मेषसंक्रान्तेर्दिने तृतीयातिथिश्चेत् | वृष्टिः निजसमये भवति, धान्यमल्पताच । |
| मेषसंक्रान्तेर्दिनं चतुर्थी तिथौ चेत् | बह्वी वृष्टिः, अनर्थः, कर्मणि विघ्नबाहुल्यच। |
| मेषसंक्रान्तेर्दिनं पञ्चमी तिथौ चेत् | महद्युद्धं किञ्चद्धान्यनाशः। |
| मेषसंक्रान्तेर्दिनं षष्ठी तिथौ चेत् | बह्वीवृष्टिश्च । |
| मेषसंक्रान्तेर्दिनं सप्तमी तिथौ चेत् | कालेत्वर्षति पर्जन्यः राजोपद्रवः। |
| मेषसंक्रान्तेर्दिनं अष्टमी तिथौ चेत् | समुचितवर्षम् धान्यसमृद्धिश्च। |
| मेषसंक्रान्तेर्दिनं नवमी तिथौ चेत् | बहूनि सस्यानि प्ररोहन्ति, अनर्थश्च। |
| मेषसंक्रान्तेर्दिनं दशमी तिथौ चेत् | बहवो अनर्थाः, शोकः, बह्वी वृष्टिश्च। |
| मेषसंक्रान्तेर्दिनं एकादशी तिथौ चेत् | बहुवर्षम् कुधान्यानां वृद्धिश्च। |
| मेषसंक्रान्तेर्दिनं द्वादशी तिथौ चेत् | सुसमये बहुवर्षणं, तस्कराणां पीडाधिकता च। |
| मेषसंक्रान्तेर्दिनं त्रयोदशी तिथौ चेत् | सुसमये बहुवर्षणं, तस्कराणां पीडाधिकता च। |
| मेषसंक्रान्तेर्दिनं चतुर्दशी तिथौ चेत् | **प्रारम्भे वह्वी वृष्टिः तदनन्दतरं नो वर्षणम्।** |

मेषसंक्रान्तेर्दिनं पूर्णिमायां अमावास्या च तिथौ चेत् **भूरिवर्षं, युद्धधान्यार्धिरप्युन्नता च**

## १.११ करणैः वृष्टेर्लक्षणम्

संक्रमणकालिककरणैः सकाशाद् वृष्टिचिन्तनक्रमो अधोनिर्दिष्टवत् पदर्श्यते। तद्यथा–

| **करणानि** | **फलानि** |
|---|---|
| बवः | बहुवर्षः, धान्यसम्पत्तिः, अनर्थः |
| बालवः | समुचितवर्षं, पशुनाशः कृचित् दुर्भिक्षम् |
| कौलवः | नहि वृष्टि आदौ अवसाने च वह्नी विपत्तिः |
| तैतिलः | पशुधनधान्यवृद्धिः |
| गरलम् | आदौ वृष्टेरभावः, अन्ते अतिवृष्टिः, बहवो रोगाश्चः |
| वणिजः | आदौ अतिवृष्टि, अन्ते च वृष्टेरभावः |
| विष्टिः | पशुरोगः, सस्यसमृद्धिः, काले वर्षति पर्जन्यः |
| शकुनिः | पशुरोगः सस्यसमृद्धिः, काले वर्षति पर्जन्य |
| चतुष्पाद् | अतिवृष्टिः, धान्यहानिः, कार्यनाशश्च |
| नागः | बह्वीवृष्टिः, सस्यसम्पदश्च |
| किंस्तुघ्नः | अल्पधान्यनाशः, काले वृष्टिसम्भवः सस्यानां पोषणं समृद्धिश्च |

## १.१२ संक्रमणलग्नात् ग्रहस्थितिवशाच्च वृष्टेः चिन्तनक्रमः

मेषसंक्रमणकालिकं लग्नं मेष-तुला-मकरलग्नेष्वन्यतमं लग्नञ्चेत् अल्पवृष्टिः सम्भवति। पूर्वोक्तलग्नं सिंह लग्नञ्चेद्, क्वचित् वृष्टिः तत्र तत्र, वृश्चिकश्चेत् महतीवृष्टिः, पूर्वविहितलग्नानि विहाय अवशिष्टेषु इतरेषु लग्नेषु यद्येकोऽपि लग्नञ्चेत् महतीवृष्टिः सस्यसमृद्धिश्च भवति।

मेषसंक्रान्तिकालिकलग्ने सूर्यो वर्तते चेत् किञ्चिद् विलम्बेन समुचितवृष्टिः सर्वत्र संवत्सरे भवति। संक्रमणलग्नगो चन्द्रश्चेत् बहुवर्षः सस्यविभवश्च, कुजोलग्नगश्चेत् वर्षस्यादौ

अन्ते च वृष्टिः, संक्रमणलग्नं जलराशिगं तद्लग्नगतो बुधश्चेत् वह्वीवृष्टिः, परत्राल्पिका, लग्नगो गुरुश्चेत् आदौ वृष्टेरभावः अन्ते वृष्टिः, धान्यानां क्षयश्च, लग्नगो शुक्रश्चेत् असमये वृष्टिः, युद्धं, भूपोपद्रवः, पशुरोगः, धान्यपुष्टिः सुभिक्षं च संक्रमलग्ने शनिर्वर्तते चेत् अल्पतरं हि वर्षं चोरभयं, बहवो अनर्थाश्च, राहुः जलराशेर्लग्नगश्चेत् भूरिशः वृष्टिः अन्यभेषु अल्पवृष्टिः, केतोः फलं राहुवत् ज्ञेयम्। इत्थं तत्तद्वर्षस्य वृष्टेः फलम् अवगन्तव्यम्।

संक्रमणलग्नं जलगृहं जलग्रहसंयुतम् अथवा जलराशेर्लग्नं जलग्रहो विलोकयति चेत् तस्मिन् संवत्सरे वृष्टिरुत्तमा भवति। संक्रमणलग्नम् अग्निराशिगम् अग्निग्रहवीक्षीतं संयुतं चेत् तदानीं तस्मिन् संवत्सरे वृष्टिः न भवति।

इत्थं मेषसंक्रान्तितः वर्षफलं ज्ञेयम्। तदितर संक्रान्तिभिः तत्तन्मासफलानि ज्ञेयानि। संक्रमलग्नगत-शुभयोगदृष्टि-जलवृद्धिराशिभिश्च तत्तन्मासे वर्षे च समुचितं वृष्टिं सुभिक्षं च चिन्तयेत्। पापानां योगदृष्टि तोयह्रासवतीराशिभिश्च अल्पवर्षणं दुर्भिक्षं च वाच्यम्।

## १.१२ इन्द्रमण्डलादीनां लक्षणं फलञ्च

मेषसंक्रान्तिः रोहिणी-अनुराधा-ज्येष्टा-अभिजित्-श्रवणा-उत्तराषाढा-धनिष्टाप्रभृतिषु नक्षत्रेषु यदि स्यात्तदा सा माहेन्द्रजं मण्डलमिति नाम्नी प्रसिद्धा, सा सुखदा सुभिक्षदा च। यस्मिन्दिने मेष संक्रान्तिः तद्धिने चन्द्रो यदि भरणी-कृत्तिका-पुष्य-मघा-पूर्वफल्गुनी-विशाखा पूर्वाभाद्राप्रभृतिषु नक्षत्रेषु स्यात्तदा सा संक्रन्तिः अग्निमण्डलमिति नाम्नी प्रसिद्धा। तद्वर्षे दुर्भिक्षम् अग्निमयं च फलं कल्प्यम्। यस्मिन्दिनेमेषसंक्रमस्तद्धिने चन्द्रो यदि अश्विनी-पुनर्वसु-मृगशिरा हस्त -उत्तराफल्गुनी -चित्रा- स्वाती-प्रभृतिषु नक्षत्रेषु स्यात्तदा सा वायुमण्डलमिति नम्नी कथिता, तत्संक्रमणवशात् तस्मिन् वर्षे राजभयं, वायोर्भीतिं स्वल्पवृष्टिं च कथयेत्।

आर्द्रा-आश्लेषा-मूला-पूर्वाषाढा-शतभिषा-उत्तराभाद्रा-रेवती प्रभृतिषु नक्षत्रेषु मेषसंक्रमणं यदि स्यात्तदा तत्कृते वरुणमण्डलेति नाम। तस्मिन् वर्षे सुवृष्टिः ऐश्वर्यवृद्धिः जगतः महतीं पुष्टिश्च स्यात्।

## १.१३ संक्रान्तिपुरुषमीमांसा

मेषसंक्रमणं किंस्तुघ्नशकुनिकौलवाख्यकरणेशु यदि स्यात् तदा संक्रान्तिपुरुषः उर्ध्वस्थितः स्यात्। अस्य फलं सकलवस्तूनाम् अर्घवृद्धिः। यस्मिन् वर्षे मेषे सूर्यः तैतिलनागचतुष्पादाख्यकरणेषु उपविष्टः सन् संक्रमितः स्यात्। तस्मिन् वर्षे सकल वस्तूनां न मवर्घं वा न समर्घं वा स्यात्, किन्तु समत्वं स्थास्यति। मेषसंक्रमणं गरवणिजभद्राबवबालवाख्यकरणेषु यदि स्यात्तदा संक्रान्तिपुरुषः शयनावस्थायां स्यात्। अतः तस्मिन् वर्षे सकलवस्तूनां समर्धां भवति।

## १.१४ वर्षप्रश्नविचारक्रमः

वृष्टेः प्रश्ने पृच्छकः दैवज्ञस्य समीपे प्रश्नपृच्छाकाले आद्रद्रव्यं संस्पृशन्, वारिसंज्ञकवस्तूनां संस्पर्शनेन, तोयासन्नप्रश्नकरणेन, जलं गृहीत्वा प्रश्नकरणेन, तोयकार्योन्मुखः सन् पृच्छती, तत्र सलिलशब्दस्य श्रवणं जलस्य नाम्ना व्यवहरिष्यमाणवस्तूनां स्पर्शनञ्चेति एतादृशलक्षणैः अचिरादेव वृष्टिः सम्भविष्यतीति वक्तव्यम्

रुदितेक्षवथौकास-निष्टव-नासिकास्रव-शीतच्छाया-प्रवेशश्चेति एते प्रश्नकाले विलोक्यन्ते तर्हि महतीं वृष्टिं समादिशेत्।

प्रश्नकाले मद्य-नवनीत-गर्भिणी-जलभाजन महिषि-गज-ब्राह्मणश्चेति एतेषां दर्शनेन शीघ्रमेव वृष्टिः भवतीति वदेत्। वृष्टिप्रश्ने आस्य-नेत्र मेढ्रादि जलवाहिन्यङ्गस्पर्शनेन पृष्टुः कृते वृष्टि विनिर्देश्या। इदमिदानीं मूत्रोत्सर्गं कृत्वा यदि पृच्छति तदा महती वृष्टिः वाच्या।

मीनकर्कटौ बहुजलराशी स्तः। मकर-कुम्भ-वृष-तुला-वृश्चिकेषु उत्तरोत्तरराशयः पूर्वपूर्वराशेरपेक्षया अल्पजलयुताः राशयः वर्तन्ते। शेषाः विजलराशयः स्थलराशयः मेषमिथुनध नुकन्याः। चन्द्रशुक्रौ जलग्रहौ स्तः। गुरुशुक्रौ तोयराशिस्थौ स्यातां तदा जलग्रहौ भवतः। तौ च साक्षात् जलकारकौ न स्तः। अवशिष्टाः सर्वे ग्रहाः निर्जलकारकाः सन्तीति विदुषां मतम्। तत्र रविकुजौ अनावृष्टिकारकौ वर्तेते। गुरुबुधौ मन्दवृष्टिदौ स्तः। चन्द्रशुक्रौ महावृष्टिदायकौ

स्तः। चन्द्रशुक्रयोः प्रश्नलग्नस्य सम्बन्धेन शीघ्रमेव महद्वृष्टिं कथयेत्। प्रश्नलग्नस्थराशिः ग्रहयोः सम्बन्धेन वृष्टिम् आदिशेत्।

प्रश्नकाले प्रष्टुः प्रश्नवाक्यस्य आदिमो वर्णत्वेन, वर्गस्य चतुर्थवर्णः महाप्राणाक्षरः, स्वरः, दीर्घस्वराक्षरादयश्च आगतश्चेत् शीघ्रमेव वृष्टिः सम्भवति। तदितराक्षराः प्रश्नवाक्यस्य आद्यक्षत्रत्वेन आगताश्चेत् वृष्टेरभावो वाच्यः। जलग्रहः निर्जलराशौ विद्यमानश्चेत् वृष्टिः सम्भवति। निर्जलग्रहः जलराशौ गतश्चेत् मन्दवृष्टिः सम्भवति। जलग्रहः जलराशौ वर्तमानश्चेत् प्रभूतावृष्टिः भवति। निर्जलग्रहः निर्जलराशिगतश्चेत् वृष्टेरभावं विनिर्दिशेत्।

सौम्याः जलराशिस्थाः तृतीय-धन-केन्द्रगाः स्युः प्रश्नकालिकचन्दः शुक्लपक्षे जलराशौ उदयलग्ने याते सति वर्षो भवेदिति वाच्यं तोयप्रश्ने जलराशिगंलग्नं केन्द्रस्थाः गुरुबुध शुक्रचन्द्राः यदि शुभदृष्ट्या संयुताः स्यु तदानीं महतीवृष्टिः भवतीति कथयेत्। पूर्वोक्तगुरुबुधौ पापैः दृष्टाः यद्वा तैरेव संयुताः स्युः तदा स्वल्पवृष्टिर्भवति। आरूढलग्नं वा छत्रराशिर्वा जलग्रहयोगेन जलराशौ यदि स्यात्तदा भूरिस्यात् वृष्टिः।

लग्नात् चतुर्थस्थानेन भूमेरन्तः सलिलं, सप्तमात् नद्याः जलं, दशमेन वृष्टेः पतनम्, इत्थं केन्द्रेषु विशिष्य एते त्रयः चिन्तनीयाः। पूर्वोक्तवत् इत्थं वर्षस्य लक्ष्मणि सत्यपि प्रश्नलग्नस्य कृते बुध- स्य संयुतिः दृष्टिर्वा, देष्काण-नवांशदि सम्बन्धो यद्यागतश्चेत् वृष्टिरारब्धा पवनेन इतस्ततः विहन्यमाना भवति।

वृष्टिप्रश्ने लग्नात् कुजशनिराहुबुधाः केन्द्रस्थाः भवेयुश्चेत् आरब्धावृष्टेः विघातो अतिमारुतात् आदेश्यो भवति।

जलराशिस्थौ राहुमन्दौ सुखवृष्टिदौ भवतः। यदि तौ शुक्रेन्दू दृष्टौ स्यातां तौ महावृष्टिप्रदायकौ भवतः। इत्थं वर्षलक्षणविचारः कार्यः।

***

# प्रश्नावली

1. संक्षेपण उत्तरं लिखित - 5 x 7 = 35

(1) इन्द्रधनुषः वशात् वृष्टिचिन्तनविधिं स्पष्टयत।

(2) कानि तानि वृष्टिलक्षणानि।

(3) गो-सर्प-पिपीलिका-मार्जार-बालचेष्टादिभिः वृष्टेः विचारं कथं कायम्।

(4) संक्रान्ति पुरुषात् समर्घमहर्घयोः विचारं कथं करणीयम्।

(5) इन्द्रमण्डलादीनां लक्षणं फलं विलिख्त।

II विस्तरेण उत्तरं लिखित - 10 x 4 = 40

(1) धनुर्मासस्य लक्षणेन अग्रिमवृष्टिचिन्तनप्रकारं निरूपयत।

(2) चचपादिवृष्टिमण्डक्रमं विशदीकुरुत।

(3) संक्रमणलग्नात् ग्रहस्थितिवशाच्च वृष्टेः चिन्तनक्रमं निरूपयत।

(4) करणैः सकाशाद् वृष्टिविचारं कुरुत।

III प्रश्नद्वयस्य निबन्धात्मकम् उत्तरं प्रदेयम्- 12½X 2 = 25

(1) वर्षप्रश्नविचारक्रमं सम्यक् प्रतिपादयता।

(2) संक्रान्तिकालिकनक्षत्रैर्वशात् वृष्टेः लक्षणं फलं च किमिति विशदीकुरुत।

*******

<u>श्रीः</u>

।। षड्विंशोऽध्यायः।।

## १.० अवतरणिका

अये छात्राः!

प्रपञ्चे पर्याप्तमाहारं जलं स्थलं च सर्वेषां कृते अपेक्षितम्। अपेक्षितासु आवश्यकतासु जलं महत्वपूर्णं स्थानं भजते। 'जलं जीवनमुच्यते' जीवन्ति भूतानि यस्मादिति व्युत्पत्तिः। 'जल' इति पदे जकारो जगतो जन्मकारणं 'ल' इति लयगारणं सूचयति। जगति जीवयति लोकान् आच्छादयति भूम्यादीनि इति व्युत्पत्या सर्वप्राणिनां सृष्टिहेतुभूतत्वाज्जीवनहेतुभूतत्वाच्च इदं जलं कृषेः मूलमस्ति। अत एव मनुरपि ''आप एव ससर्जादौ तासुबीजमिवासृजत्'' इत्यत्र जगतो मूलाधारं जलमेव मनुते।

जीवनसृष्टेः प्राणभूतं जलं मानवस्य सर्वासु क्रियासु उपयुज्यमानत्वात् स्वस्थपुरुषस्य रोगिणो वा न कश्चन व्यवहारः जलं विना सेत्स्यति। वस्तुतस्तु जलरहितेन जीवो निर्जीवतां याति। जीवयति जीवनं तच्च जलमित्यपि वक्तुं शक्यते। अतएव सलिलाश्रयाणां सर्वेषां तोयाधाराणां वापीकूपतडागादीनां खननं शुभमिति शास्त्रे प्रोचुः। तस्मात् अत्र जलाधारभूतस्य कूपे अम्भसः परीक्षणं प्रस्तुतः प्राधानो विषयः। यतोहि आदित्यपुराणे '**कूपोदकं वातहरं प्रदिष्टम्**' इत्युक्तत्वात्।

**उद्देश्यानि**

* **कूपजलस्य परीक्षणविधिः तल्लक्षणञ्च**
* **जलप्राप्तिस्थानानि**
* **चन्द्रगुप्तिचक्रक्रमः**
* **प्रकारान्तरेण चन्द्रगुप्तिक्रमः**
* **सिरालक्षणं पुरातनकूपान्वेषणञ्च**
* **कूपजलस्य स्वादः**
* **कूपनिर्माणाय प्रदेशः, पाषाणादिज्ञानञ्च**

* **जलसञ्चयनलक्षणं कूपस्य निम्नमानञ्च**
* **ग्रहाणां राशिमसंख्याः**
* **आरूढलग्नयोः भेदादिचिन्तनक्रमः दिनर्क्षानयनप्रकारश्च**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

## १.१ कूपजलस्य परीक्षणविधिः तल्लक्षणञ्च

कूपप्रश्ने विद्वान् दैवज्ञः मकरादिमासेषु क्वचिद् मीनादि चतुर्षु-मासेषु कूपगताम्भसः परीक्षणाय तत्रस्थं वल्मीक-वृक्ष-तृणादिभिः सकाशाद् भूमेः लक्षणं सम्यक् परिलक्ष्य, जलस्य प्राप्तये खन्यमानकूपस्य स्थाने सम्भाव्यमाणवर्षाकृत विकारस्य अवलोकनं कृत्वा तस्मिन् स्थाने शाश्वत रूपेण जलं स्थास्पति वा न वेति विचार्य ग्राह्यस्थानम् आदिशेत्।

कूपप्रश्ने पृच्छकस्य समीपे विद्यमानवस्तूनां लक्षणं तस्य प्रश्नवाक्ये स्थितवर्णाः, आरूढलग्नं, ग्रहबलाबलादिसर्वं निमित्तं विलोक्य वारिस्थितिं वक्तव्यम्।

प्रश्नकाले चाण्डाल-वेश्या-प्रमुषित-धनिक-ब्राह्मण-किरातप्रभृतिषु यः कोऽपि तत्राऽगतश्चेत् इन्द्रधनुषः दर्शनं च तत्काले यदि भवति तर्हि यस्मिन् स्थले कूपो खन्यमाणो वर्तते तत्र पर्याप्तं जलं लभ्यतेति वदेत्।

प्रश्नकाले कण्ठम् आस्यं वा पृष्टा स्पृशति चेत् पृच्छकेन चिन्तितस्थाने जलं वर्तते। तत्समये कर्णस्पर्शे कृते सति शान्तिं कुर्यात्। शान्तिं विना कूपो खन्यते चेत् कूपे पतित्वा मृतेर्योगो वर्ततेति वक्तव्यम्।

चन्द्रः राहुयुतः चरलग्नगश्चेत् चिन्तितस्य स्थाने कूपखनने जलं मिलति। दशमगतो भानुः प्रश्नलग्नात् चतुर्थे च गुरुर्वर्तते चेत् तदानीमपि कूपखननेन सलिलं प्राप्तो भवतीति चिन्तयेत्।

उदयलग्ने चन्द्रः आरूढोदयराशी च जलराशिस्यात्तदा अवश्यं निर्धारितस्थले कूपखननेन सलिलं प्राप्तो भवति।

पातालस्थो पापो, आरूढलग्नस्थो चन्द्रश्चेदपि कूपखनने कृते सति शीघ्रं जलं लभ्यते।

स्वोच्चराशिस्थौ चन्द्रभार्गवौ, तौ च नीचगतैः ग्रहैः पृथक् प्रेक्षितौ स्यातां तदा जलदौ भवतः। लग्नारूढचन्द्रेषु यद्येकोऽपि वृषभगतश्चेत् पुरातनः कूपः तत्र विद्यमोनोऽस्ति जलमपि तस्मिन् कूपे सम्यक् अस्तीति वदेत्।

वृषभगतो हिमांशुः सप्तम भावगतो राहुश्चेत् कूपनिर्माणाय निश्चिते स्थाने सलिलं नस्तीति भावः।

## १.२ जलप्राप्तेः स्थानानि

पूर्वं प्रतिपादितवत् जलस्य सत्ता ज्ञाते सति वक्ष्यमाणयोगादिभिः जलोद्भवदिशः विविधलक्षणानि वक्ष्यन्ते।

कूपप्रश्नकाले यदि प्रष्टा स्ववामभागे स्पृशति चेत् चिन्तितस्थाने नैरृत्यभागे वारिरायाति, उर्ध्वाङ्गस्य यः कस्यापि भागं परिस्पृशन् पृच्छेत् तदा ऐशान्यां जलमायाति, कण्ठस्याधः परिस्पशन् पृच्छति तर्हि वायव्यभागे जलं वर्तते, अस्थिप्रधानाङ्गशरीरावयवस्पर्शनेन नेष्टं जलम्। मृदुस्थलं स्पृशति चेत् जललाभः, मांसाढ्यस्थानानां संस्पर्शनवशात् रवन्यमाणकूपस्य स्थाने पङ्कबाहुल्यं विद्यते। फालदर्शनवशाच्च पाषाणसंयुता कठिनाभूमिः, तस्मात् तत्र कूपखननेन जलं कष्टेन प्राप्तो भवति।

## १.३ चन्द्रगुप्तिचक्रक्रमः

प्रष्टुः क्षेत्रे प्रश्नवशात् समान्यतः जले ज्ञाते सति चन्द्रगुप्तिचक्रेण दैवज्ञः कूपनिर्माणाय देशविशेषं ब्रूयात्। चन्द्रगुप्तिचक्रलेखनक्रमे उदयात् मध्याह्नं यावत् पूवस्यां दिशि सञ्चरणं, माध्याह्नात् सूर्यास्तं यावत् दक्षिणे, सूर्यास्तात् मध्यरात्रिं यावत् पश्चिमे, अर्धरात्रितः प्रातः सूर्योदयं यावत् उदत्तरस्यां दिशि सञ्चरणं च चक्रलेखनक्रमः कथितः। दक्षिणतः वामं पञ्चरेखाः उपरितः अधो यावत् अष्टौ रेखाः, इत्थं रेखाविन्यासेन अष्टाविंशति कोष्टकात्मकं समचतुरस्राख्यं चक्रं विन्यसेत्

अष्टाविंशतिकोष्टकैर्युते अस्मिन् चन्द्रगुप्तिचक्रे प्रथमपङ्क्तौ ईशान्यकोणात् एकसंख्यातः पञ्चसंख्यां यावत् स्थापयेत्। ततः अधस्तन पङ्क्ततः प्रतिलोमेन चतुःसंख्यां संगणय्य संस्थापयेत्। पुनः प्रथमपङ्क्तौ प्रोक्तवत् उत्तरतः दक्षिणस्याम् अनुलोमेन पञ्चसंख्यां पञ्चकोष्टेषु संस्थाप्य, ततः संख्याद्वयं पश्चिमतः प्राच्यां स्थाप्य संख्याविन्यासेन प्रातः कालिकसूर्योदयतः मध्याह्नं यावत् चक्रं भवति। प्रारीप्सित एकसंख्यातः नक्षत्रविन्यासः कार्यः। अपराह्णे इदमेव चक्रं परिवर्त्य स्थापयेत्। इदं चक्रं पूर्वदक्षिणत्मको भवति। इत्थं दिने वारद्वयं रात्रौ च वारद्वयं परिवर्त्य तद्वशात् जलस्य स्थितिं विज्ञेयम्।

चन्द्रगुप्तिचक्रलेखनं अधोनिर्दिष्टवत् ज्ञेयम्। तद्यथा–

| ईशान्यः | चन्द्रगुप्तिचक्रम् | | | | | | | आग्नेयः |
|---|---|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 16 | 17 | |
| | 28 | 9 | 8 | 7 | 6 | 15 | 18 | |
| उत्तरः | 27 | 10 | 11 | 12 | 13 | 14 | 19 | दक्षिण |
| | 26 | 25 | 24 | 23 | 22 | 21 | 20 | |
| वायव्यः | पश्चिमः | | | | | | | नैर्ऋत्यः |

सूर्योदयतः आरभ्य परेद्युः सूर्योदयं यावत् षष्टिघटिका अष्टाविंशतिनक्षत्रैः प्रविभाज्य क्रमशः प्रथमं नक्षत्रम् अश्विनी, द्वितीयं च भरणी इत्यादिक्रमेण अभिजित् सहितानि अष्टाविंशति नक्षत्राणि निक्षिप्यानि। प्रश्नकाले चन्द्रगुप्तिचक्रे तावत् उदीयमानं नक्षत्रं किमिति ज्ञानाय 60/28 तः विलोकयेत्। प्रश्नसमये यन्नक्षत्रम् उदितो भवति तन्नक्षत्रम् उदयर्क्षम्। एकस्य दिनस्य कृते 60 घटिकाः ताः 28 नक्षत्रैर्विभाजिताः स्युः 128 विघटिकाः स्युः। इदमेव नक्षत्रस्य मानं चक्रस्य पूर्वदिशि विन्यस्तप्रथमसंख्यास्थानमिति भावयेत्। पुनः उपर्युक्त चन्द्रगुप्तिचक्रे एकमितिलिखितस्थाने उदितनक्षत्रं विलोक्य ततः तद्दिनस्य चन्द्रनक्षत्रसंख्याक्रमेण यस्मिन् कोष्टके आयातीति अवलोक्य तन्नक्षत्रं चन्द्रोदयनक्षत्रमिति

भाव्यम्। उदाहरणार्थं प्रथमस्थाने उदितनक्षत्रम् अनुराधा आगतश्चेत् चन्द्रः तद्दिने शतभिषक् नक्षत्रे वर्तते चेत् उदयात् अष्टमस्थाने चन्द्रो आगत्य तत् पृच्छकस्य चिन्तितस्थानविभागे पूर्वोत्तरमध्ये आगतमिति भावयेत्। इत्थं कोष्टके यस्यां दिशि (नक्षत्रवशात्) आगमिष्यमाणो वर्तते पृच्छकेन चिन्तितत्स्थाने कूपखननेन जलं सम्यक् आगमिष्यतीति वदेत्।

अत्र चन्द्रं विहाय शुक्रगुरुबुधादिजलसूचकग्रहैः सकाशादपि तेषां नक्षत्रं कुत्र आगच्छतीति विलोक्य तेषा मध्ये बलीग्रहस्य नक्षत्रदिशि जलमायातीति निर्दिशेत्। पूर्वाह्णे एकसंख्यायाः स्थानम् ईशान्ये आयाति। अपराह्णे एकमित्याख्यस्थानम् अग्निकोणे, रात्रौ नैर्ऋत्ये, मध्यरात्रौ च वायव्ये आयाति एकमित्याख्यस्थानम्।

## १.४ प्रकारान्तरेण चन्द्रगुप्तिचक्रम्

पूर्वोक्तचन्द्रगुप्तिचक्रक्रमे दिनर्क्षस्य अन्वेषणं विना प्रथमकोष्टकस्य एकस्य स्थाने अश्विनीनक्षत्रं विन्यस्य, चन्द्रशुक्रादिजलग्रहाः प्रश्नकाले यत्र स्थिताः तेषां नक्षत्रम् अश्विनीतः संगणय्य यत्र तन्नक्षत्रमायाति तादृशि जलस्य प्राप्तेर्लक्षणं प्रोचुः धीमन्तः।

## १.५ सिरालक्षणं पुरातनकूपान्वेषणञ्च

प्रश्नलग्नं चरलग्नञ्चेत् एका एव सिरायाः सकाशाद् कूपे जलमायाति। प्रश्नलग्नं स्थिरलग्नञ्चेद बह्वयः सिराः सन्ति कूपे। उभयलग्नञ्चेत् अम्भसः धाराद्वितयं वर्ततेति भाव्यम्।

अथ अत्र मृच्छन्नाः पुरातनाः कूपाः कुत्रचित् सन्ति चेत् तज्ज्ञापकाः योगाः कथ्यन्ते। प्रश्नारूढलग्नं स्थिरराशिगश्चेत् किञ्च चन्द्रो वृषभे विर्द्यमानश्चेत्तदा पुरातनः कूपः वर्ततेति वदेत्।

आरूढलग्नं वृषभः, शुक्रेण संयुतः शशाङ्क वृश्चिकगतश्चेत् प्रष्टुः भूमौ पुरातनः कूपः विद्यमानो अस्तीति वदेत्। दशमे राहुः चतुर्थे च चन्द्रशुक्रौ स्यातां तदा पुरातनकूपद्वयं प्रच्छकस्य भूमौ अस्तीति वक्तव्यम्। आरूढलग्नात् उच्चराशिगौ चन्द्रशुक्रौ स्यातां नीचे कूपद्वयं वर्तते इति भावः। आरूढलग्नात् सप्तमे सूर्यश्चेत् लग्नात् सप्तमे चन्द्रो गतश्चेदपि पुरातनः कूपः पृच्छकस्य भूमौ अस्तीति मन्तव्यम्।

उदयलग्नं छत्रराशयश्च जलराशयः स्युः निर्देशितस्थाने कूपो मृच्छन्ना वर्ततेति वदेत्। इत्थं पुरातनकूपस्य निश्चयः प्रश्नकालतः चिन्तनीयः।

## १.६ कूपजलस्य स्वादः

पुरातनकूपानां लक्षणं भूमेः लक्षणं च ज्ञात्वा चतुर्थराशितः तत्र स्थितग्रहयोगदृष्टया च कूपस्य लक्षणं जलस्य रूचिं च वदेत्। लग्ननवांशेन कूपजलस्य गुणान् वदेत्। लग्ननवांशाधिपतेः बलाबलं विलोक्य भास्करेण कटुकः रसः, चन्द्रेण लवणः, कुजेन तिक्तः, बुधेन मिश्ररसः, गुरुणा मधुरः, शुक्रेण आम्लः शनिना काषायश्चेति जलस्य रूचिं वक्तव्यम्।

प्रश्नवाक्यस्य आदिमवर्गेनाऽपि जलस्य रसभेदाः वाच्याः सन्ति। अकचटतपयशवर्गाः तत्र चन्द्राद्यर्कपर्यन्ताः ग्रहाणाम् उक्ताः रसवर्गाः वर्गाणाम् अष्टसंख्यात्वादत्र राहुमपि योजयेत्।

चन्द्रदिग्रहाणाम् अकचटतपयशवर्गाः -

| ग्रहाः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | सूर्यः |
|---|---|---|---|---|---|---|---|---|
| वर्णाः | अवर्गः | कवर्गः | चवर्गः | टवर्गः | तवर्गः | पवर्गः | यवर्गः | सवर्गः |
| कारकरसाः | लवणः | तिक्त | मिश्रः | मधुरः | आम्लः | कषायः | विरसः | कटुकः |

इत्थं जलस्य रसभेदचिन्तनक्रमः ज्ञेयः। परन्तु केवलं जलस्य कृते एव अयं वर्णक्रमः। अथ च कूपप्रश्ने प्रष्टुः चेष्टादिभिः सम्यक् जलस्य लक्षणं विज्ञाय चन्द्रचारवशात् चन्द्रस्य स्थितभेदेन कूपस्य संस्थानं रस-प्रदेश-मानविशेषं च प्रवदेत्।

## १.७ कूपनिर्माणाय प्रदेशः पाषाणदिज्ञानञ्च

कूपखननप्रदेशे वास्तुपुरुषं साक्षात् स्वपन्तमिव परिकल्प्य तस्य नेत्र-नाडी-वक्तृ मुखप्रभृतीन् परिगणय्य तानि स्थानानि विहाय कूपं निखनेदिति शिल्पशात्रेऽपि उच्यते। अन्यच्च आयुर्वेदेऽपि आग्नेयविमुक्तदेशे कूपं खनयेदित्यूचुः। तस्मात् कुम्भगतं कूपं श्रेष्टम्। मीनमेषयोर्दिशि मध्यमम्। मकरराशेर्दिशि कूपम् अधमम्। एवं रीत्या कूपखननविधिं बुधाः

विदुः। परन्तु यस्तु कन्यायां (कन्याराशेर्दिशि) निखनेद् कूपं स मृतिं व्रजेत्।

कूपप्रश्ने लग्ने रविर्वर्तते चेत् भूमौ अतिदूरे जलमस्ति। कुजः लग्नगतश्चेत् पाषाणमध्यगं तोयं, राहुमन्दौ उदयगौ स्यातां न जलावहौ भवतः।

## १.८ जलसञ्चयलक्षणं कूपस्य निम्नमानं च

चन्द्रशुक्रौ लग्नगतौ स्यातां तदा कूपे पर्याप्तं जलम् अस्ति। उदयगौ बुधगुर्वोर्मध्यमं जलं विद्यात्। चन्द्रबुधयोः लग्ने संयुतिश्चेत् सिकतायुक्तं कूपम्। कुजसूर्यौ लग्ने भवतः तर्हि कूपे पाषाणस्य भेदनेन तदन्तराजलमिति विभावयेत्।

शुक्रो लग्ने विद्यमानश्चेत् रूचिरं रम्यं जलं, गुरुदये मध्यमं जलं ब्रूयात्। मन्दो लग्नगश्चेत् अल्पतोयं तोषरजलं च राहुर्लग्ने वर्तते चेत् अजलाम् अवनीं वदेत्।

कूपस्य निम्नमानं दूतवाक्यस्य वर्णसंख्याभिः विनिर्दिशेत्। ग्रहाणां रश्मिसंख्यायाः तुल्यम् अथवा राशीनां रश्मिसंख्यायास्तुल्यं वा कूपस्य निम्नमानं प्रवदेत्। लग्ने वा चतुर्थभावे वा स्थितगहाणां रश्मिसंख्याभिः कूपस्य अगाधतामानं निश्चयेत्। लग्नचतुर्थयोः उभयत्र ग्रहाः स्युः बलीग्रहानुसारेण कूपस्य अगाधतामानं वक्तव्यम्।

कूपस्य अगाधतामानं जलेन आर्द्रप्रदेशे ग्रहरश्मि संख्यायाः आधारेण अरत्निभिः ब्रूयात्। अरण्ये मध्येप्रदेशे च दण्डैः गणना कार्या। मरुप्रदेशै पर्वतप्रदेशे च मनुष्योच्छ्रायानुरूपै अगाधतामानस्य गणना कार्या। इत्थं कूपस्य अगाधतामानं भूप्रदेशानुगुण्येन अरत्नि दण्ड-मनुष्योच्छ्रायैश्च निश्चयेत्।

## १.९ ग्रहाणां रश्मिसंख्याः

अत्र कोष्टके प्रदर्शितवत् ग्रहाणां रश्मिसंख्याः सन्ति।

| ग्रहाः | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| रश्मिसंख्याः | 16 | 04 | 10 | 09 | 07 | 05 | 21 |

जलस्य अगाधतामानज्ञानाय इयं रश्मिसंख्यां तेषाम् उच्चनीचादिस्थानभेदेन गुणनं हरणं च कार्यम्। यथा ग्रहाणां रश्मिसंख्या: प्रतिपादिता: तथैव राशिनां रश्मिसंख्याऽपि प्रोक्ता: सन्ति। अधोलिखितकोष्टके राशीनां रश्मिसंख्या: सूचिता: सन्ति।

तद्यथा

| राशय: | मेष: | वृष: | मिथुन: | कर्क: | सिंह: | कन्या: | तुला | वृश्चिक: | धनु: | मकर: | कुम्भ: | मीन: |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रश्मिसंख्या | 7 | 8 | 12 | 11 | 12 | 06 | 09 | 07 | 13 | 07 | 08 | 27 |

ग्रहाणां राशीनां च रश्मिसंख्याभि: नष्टद्रव्यसंख्यां द्रव्यलाभसंख्यां, गमनागमनादिकालमानसंख्यां दूरस्थ समीपस्थयो: संख्यां, जलस्य अगाधतामानसंख्यां च प्रवदेत्।

## १.१० आरूढलग्नयोञ्च भेदचिन्तनक्रम: दिनर्क्षानयप्रकारश्च

कूपप्रश्ने आरूढलग्नम् उदयलग्नञ्चेति प्रत्येकं यत्र नोक्तं तस्मिन् स्थाने योगकारका उदयलग्ने यद्वा अरूढलग्ने वा स्यु: तेषां योगफलं वक्तुं शक्य 'उदयम्' इति प्रयोगो यत्र विहित: तत्र सर्वत्र तत्कालिकलग्न-आरूढलग्नयो: द्वयोरपि सकाशाद् तत्तद् फलं चिन्तनीयम्। आरूढमिति यत्र प्रोक्तं तत्रापि उदयलग्नवशेन चिन्तयितुं शक्यते। अयं क्रम: सर्वेषु प्रश्नेषु सामान्यो वर्तते।

रव्युदयात् प्रश्नकालं यावत् गतघटोविघटीन् 28 त: संगुण्य 60 त: विभजेत्तदा लब्धि: या आगच्छति सा अश्विन्यादिगतनक्षत्राणां संख्या भवति। शेषं दिनर्क्षमिति ज्ञेयम्। पूर्वं चन्द्रगुप्तिचक्रचिन्तनक्रमे दिनर्क्षशब्देन व्यवहृतस्य गणितमिदमिति बोध्यम्।

***

# प्रश्नावली

1. संक्षेपण उत्तरं लिखित - 5 x 7 = 35

(1) प्रश्नवाक्यस्य आदिमवर्शेन रसभेदक्रमं विलिखत।

(2) कूपजलस्य परीक्षणविधिं तल्लक्षणं च प्रतिपादयत।

(3) सिरालक्षणं पुरातनकूपान्वेषणक्रमं च वर्णयत।

(4) ग्रहाणां रश्मिसंख्या: विलेखनीया:।

(5) कूपनिर्माणाय प्रदेशज्ञानं पाषाणादिज्ञानं च कथं ज्ञेयम्।

II विस्तरेण उत्तरं लिखित - 10 x 4 = 40

(1) जलसञ्चयलक्षणं कूपस्य निम्नमानं च कथं विचिन्तयेत्।

(2) कूपजलस्य स्वाद: राशीनां रश्मिसंख्याश्च प्रतिपादनीया:

(3) जलप्राप्ते: स्थानं कथम् अनुमेयम्।

(4) आरुढलग्नयोश्च भेदचिन्तनक्रमं दिनर्क्षानयनप्रकारं च निरूपयत।

III प्रश्नद्वयस्य निबन्धात्मकम् उत्तरं प्रदेयम्- 12½X 2 = 25

(1) चन्द्रगुप्तिचक्रलेखनक्रमं निरूपयत।

(2) कूपे अम्भस: परीक्षणस्य औचित्यं प्रदर्शयत।

*******

**श्रीः**

।। सप्तविंशोऽध्यायः ।।

## **१.० अवतरणिका**

अये छात्राः!

**''आहारः प्राणिनः सद्यो बलकृद्धेहधारकः।**

आयुस्तेजः समुत्साहस्मृत्योजोऽग्निविवर्धनः।।'' इति सुश्रुतः भोजनस्य विषये वर्णयति तच्च आहारं (1) भोज्यम् (2) भक्ष्यम् (3) चर्व्यम् (4) लेह्यम् (5) चूष्यम् (6) पेयञ्चेति, षड्विधम्। पुनः तस्य त्रिविधो विभागः क्रियते। सात्विकः, राजसिकः, तामसिकश्चेति। सात्विकाहारो यथा -

**आयुः सत्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्नाः स्थिराहृद्या आहाराः सात्विकप्रियाः।।**

राजसिको यथा-

**कट्वम्ललवणात्युष्णातीक्ष्णरूक्ष विदाहिनः।**
**आहारा राजसस्येष्टाः दुःखशोकामय प्रदाः।।**

तामसिकाहारो यथा-

**''यातयामं गतरसं पूतिपर्युषितञ्च यत्।**
**उच्छीष्टमपि चामेध्यं भोजनं तामसप्रियम्।।**

पूर्वोक्तवत् भोजनं त्रिधा विभक्तोऽस्ति। बुभुक्षितस्य भोजनं सर्वथा अवश्यम्। तस्मात् अस्मिन् अध्याये भोजनप्रश्न एव प्रस्तुतः प्रधानः विषयः।

**उद्देश्यानि**

* **भोजनप्रश्नः**
* **भोजनप्रश्नलग्नात् इतरभावचिन्तनप्रकारः**
* **भुक्तजनानां संख्या तेषां जातयश्च**

* **ग्रहाणां रसभेदाः**
* **भोजनस्य प्रकाराः**
* **मांसभोजनप्रश्नः**
* **भोजनलाभालाभविचारः**
* **लाभप्रश्ने कार्यसिध्यादिचिन्तनप्रकारः**
* **प्रोषितागमनप्रश्नः**
* **प्रश्नावली**

इमे विषयाः अस्य पाठस्य अध्ययनेन ज्ञायन्ते।

## १.१ भोजनप्रश्नः

भोजनप्रश्ने तावत् आरूढलग्नेन देहस्य चिन्तनम्। तल्लग्नस्य कृते शुभयोगवशात् भोजनस्य सुस्थितिः अशुभयोगवशात् दुःस्थितेर्भोजनमिति कथयेत्। भोजनप्रश्नस्य लग्नाधि पतेर्दिशि भोक्तुः मुखतां वदेत्। लग्ने शुभाशुभानां योगेन स्थलचिन्तनम्। भोक्तुरासनगृहादयश्च राशिग्रहप्लवत्वादिगुणादितश्चिन्त्याः। बुध्या युक्त्याऽऽलोच्य वक्तव्यम्। द्वितीयभावेन प्रात्राणां चिन्तनं कर्तव्यम्। द्वितीयभावे शनिर्वर्तते चेत् पात्रं भिन्नमस्ति। द्वितीयभवागतयोः रविकुजोर्वशात् भोजनपात्रं म्लानमस्ति। द्वितीये चन्द्रो वर्तते चेत् वृत्ताकृत्या स्थितं भोजनपात्रम्। द्वितीयभावे स्थिरराशयः स्युः भोजनार्थं पाकार्थं च प्रयुज्यमानं पात्रं लोहमयं वर्तते। द्वितीयभावे शुभयोगवशात् भोजनपात्रम् उत्तमधातूनां पात्रम्, अशुभयोगवशाच्च लोहस्य पात्रे भोजनमिति चिन्तयेत्।

## १.२ भोजनप्रश्नलग्नात् इतरभावचिन्तनप्रकारः

भोजनप्रश्नलग्नात् तृतीयभावाधिपेन भक्ष्यं कथयेत्। तृतीयभावगतः सूर्यश्चेत् मूलाख्यदलकन्दसूरणमयादिपदार्थः भोजनार्थम् आसीदिति वक्तव्यम्। शुक्रचन्द्रयोः सकाशाद् रम्भादिफलान्यासन्। तत्स्थाने स्थितग्रहाणां बालकुमाराद्यवस्थानुसारेण अपक्व-असिद्धादिफलमासीदिति वक्तव्यम्। तृतीयाभावः धातुमूलजीवादिराशिविभागे

जीवराशिश्चेत् अपूपादिकं ब्रूयात्। चतुर्थभावेन पेयवस्तूना चिन्तनं कुर्यात्। चतुर्थे गुलिकमन्दौ संस्थितौ स्यातां तदा तच्च द्रवपदार्थः स्वादरहितः क्रिमिकीटाद्युतश्च आसीत्। चतुर्थे शुभाः स्युः सुमधुरं भोजनं, अशुभेषु सत्सु भोजनं सम्यक् नासीदिति चिन्तयेत्। अत्र केचन आचार्याः चतुर्थभावेन भोजयितुः गुणजात्यादिलक्षणं चिन्तयेदित्यूचुः। तत्रापि केचन चतुर्थभावतः भोजनपरिवेशयितुः, पञ्चमभावेन भोजयितुश्च गुणादयो चिन्तनीयमिति वदन्ति। पञ्चमभावः भौमान्वितश्चेत् भोजयिता क्रोधस्वभावयुतोऽस्ति। शनिराहू पञ्चमे स्यातां तदा भोजयिता श्रद्धाहीनो अस्तीति वाच्यः।

लग्नाद् पञ्चमे शनिराहू स्यातां तदा अन्नदात्रणा मुमुष्य आनीतमन्नम्। पञ्चमभावः युग्मराशिश्चेत् अन्नदात्रिणी स्त्री वर्तते। ओजराशिश्चेत् अन्नदाता पुमान्, पञ्चमे शुभानां स्थितेर्वशात् तस्य अन्नदातु उत्तमगणाः वक्तव्याः। पञ्चमे पापानां योगेन सा अधमेति ब्रूयात्।

षष्ठभावात् उपदंशस्य विचरं कुर्यात्। अत्र षष्ठभावे स्थितग्रहैः सकाशाद् चिन्तनीयाः उपदंशाः कोष्ठके प्रदर्शितवत् सन्ति।

| **ग्रहः** | **उपदंशः** |
|---|---|
| सूर्यः | मरीचप्रधाानोपदंशः शिग्रुमुद्गादिभिः कृतोपदंशः |
| चन्द्रः | लवणप्रधानोपदंशः विशिष्य बृहतीफलस्य पदार्थः |
| कुजः | अतिमरीचः पदार्थः वह्निना दग्धत्वात् स्कन्देति |
| बुधः | बहुरसास्वादयुतः पदार्थः |
| गुरुः | वृहत्याः पदार्थः, पभ्याहारश्च |
| शुक्रः | आम्रफलेन कृतपदार्थः वल्लीफलादिभिश्च कृतो पदार्थश्च |
| शनिः | आम्लोपदंशः पटोलकारवल्लीफलाद्यैः रचितोपदशञ्च |
| | राहुकेतुगुलिकैश्च मांसकृतोपदंशः |

षष्ठभावे मान्दिराहुकेतुनां मध्ये यद्येकोऽपि ग्रहः मीनराशौ वर्तते चेत् मत्स्येन रचितो

पदार्थः, मेघषं गतश्चेत् अजामांसो उपदंशः, मकरे अस्ति चेत् हरिणः मांसश्च चिन्तनीयः। सप्तमभावेन अन्नं सेकं कर्तुं द्रवपदार्थचिन्तनं कार्यम्। सप्तमभावे स्थितैः ग्रहैः सकाशाद् चिन्तनिया: द्रवपदार्था: एते सन्ति। तद्यथा-

| **ग्रहः** | **द्रवपदार्थः** |
|---|---|
| सूर्यकुजौ | जलमयमरीचः |
| गुरुशुक्रौ | दुग्धं तक्रं च |
| चन्द्रः | दधि |
| शनिः | यवागूर्जलम् |
| बुधः | सम्भारपदार्थः |

सप्तमभावेन अन्नस्य गुणावगुणाः भोजनप्रश्ने विचर्यमाणाः सन्ति। अष्टमे सूर्यो अस्ति चेत् असिद्धम् अन्नं, चन्द्रेण पुष्टोऽधिकं, कुजेन प्रस्कन्नं, राहुणा पर्युषितं विषमयम् अन्नं, शनिना दूरसं, प्राण्यङ्गारकेशसंयुक्तम् अन्नं ब्रूयात्। अष्टमभावे शुभाः स्युः तर्हि निर्दोषमन्नं वदेत्। अष्टमभावे ग्रहाभावे सति तद्भावोपरि ग्रहाणां दृष्टिः भावाधिपतेश्च वशात् अन्नस्य स्थितिं चिन्तयेत्।

## १.३ भुक्तजनानां संख्या तेषां जातयश्च

नवमभावेन सहभोक्तृवर्णसंख्याद्यखिलं ग्रहयोगदृष्टिकिरणद्यैः कथयेत्। नवमभावगतमान्देर्वशात् भोजनवेलयां सञ्जनित अशुद्धेः कारणेन स्नानादिकं कृतमिति वदेत्। उदरपूर्तिं दशमभावे न चिन्तयेत्। दशमभावे पापग्रहाः स्युः, तर्हि उदरपूर्तिर्नाभवत्। शुभाः तत्र स्युः तर्हि उदरपूर्तिरभवत्। दशमभावे उर्ध्वमुखराशिर्वर्तते चेत् आकण्ठं भुक्तम्। अधोमुखराशिश्चेत् अर्धपूर्णा अभवत् उदरस्य। तिर्यङ्मुखश्चेत् सामान्येन प्रपूरितम्। दशमभावे जलराशिगोवर्धिष्यमाणः चन्द्रः वर्तते चेत् उदरपूर्तेर्भोजनेन तृप्तिरभूदिति भावः।

भोजनसमये काः कथाः सम्भाष्यमाणा आसन् इत्यस्य विचारः लाभभावेन निर्दिशेत्। एकादशे – स्थितेन सूर्येण नृपाणां कथा, चन्देण स्त्रीविषयक कथा, कुजेन शूराणां कथा, बुधेन विदुषां, गुरुणा देवब्राह्मणानां कथा, शुक्रेण विप्रगुर्वोः, शनिना चोराणां, राहुणा विषवैद्यानां, केतुना चाण्डालानां, मान्द्या मृतानां च कथा भोजनस्य मध्ये कथाप्रसङ्गः प्रचलिष्यमाणः आसीदिति वदेत्।

भोजनानन्तरं शयनं व्ययेन वक्तव्यम्। द्वादशभावे शुभाः स्युः तदानीं सुखेन शयनम्। भोजन प्रश्नस्य द्वादशभावे पापाः स्युः तदा कष्टेन शयनं वदेत्। द्वादशभावे स्थितेन कुजेन कम्बले ससुखं शयनं, पूर्वोक्त भावगतशनिबुधयोः सकाशाद् चर्मणा निर्मितवस्तूनामुपरि शयनं, द्वादशगतरविणा तृणेनकृतकटे, चन्द्रेण तरौ, गुरुशुक्रयोः तद्भावगतयोर्यशाच्च उत्कृष्टासनादि युते शय्यायां शयनं वक्तव्यम्। व्ययेशे उच्चगतश्चेत् तङ्गगते खट्वे शय्याया उपरि शयनं वक्तव्यम्। द्वादशेशः स्वनीचादिवर्गे स्थितश्चेत् केवलं भूमिशायीति। एवं रीत्या व्ययेशस्य गुणदोषेण भोजनानन्तरस्य शयनस्थितिं वक्तव्यम्।

भोजनप्रश्ने पुनः सुस्पष्टार्थं द्वादशभावैः चिन्तनीयाः विषया अधः कोष्ठके प्रदर्शितवत् ज्ञातव्याः।

तद्यथा–

| भावः | तत्तदभावैर्विचारणीयाः विषयाः |
|---|---|
| तनुभावः | भोक्तुः शरीरस्य स्थितः लक्षणञ्च |
| द्वितीयः | भोजनपात्रम् |
| तृतीयः | भक्ष्याणि |
| चतुर्थः | पेयवस्तूनि |
| पञ्चमः | भोजयितारः |
| षष्ठः | उपदंशः तदितरपदार्थश्च |
| सप्तमः | सेचनद्रव्याणि |
| अष्टमः | अन्नम् |
| नवमः | सहभोक्तारः |

| | |
|---|---|
| दशमः | संत्रप्ति अत्रप्तिश्च |
| एकादशः | भोजनवेलायां करिष्यमाणकथाः |
| द्वादशः | शयनस्य स्थितिः |

### १.४ ग्रहाणां रसभेदाः

ग्रहाणां रसाः कोष्ठके प्रदर्शितवत् एवं परिज्ञेयाः सन्ति

| ग्रहाः भास्करः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|
| रसाः कटुकः लवणश्च | स्निग्धः पदार्थः | तिक्तः | शुष्कः पदार्थः | शुष्कः मधुरपदार्थः | आम्लः | कटुश्च |

पूर्वं रसभेदाः यद्यपि कथिताः तथापि भोजनप्रश्ने अत्र विशिष्य वर्णिताः।

अत्रापि केचन आचार्या गुरोः मधुरः, सूर्यस्य कटुकः, शनेः तिक्तः बुधस्य कषायः, शुक्रस्य आम्लः, कुजस्य कटुकः, चन्द्रस्य लवणञ्चेति सूर्यादीनां रसान् ब्रुवते।

### १.५ भोजनस्य प्रकाराः

भोजनप्रश्ने शुभग्रहाः लग्नगताः लग्नमपि सौम्यानां क्षेत्रं वर्तते चेत् मृष्टान्नभोजनं कृतम्। पापाः लग्नस्थाः, लग्नमपि अशुभानां क्षेत्रं वर्तते चेत् रूक्षमन्नं, युग्मराशिः जलराशिश्चेत् द्रवपदार्थस्याधिक्यं अन्नाभावः भोजने वक्तव्यम्।

जलराशिं विना अन्ये राशयः लग्नगताः स्युः तत्रैव रविकुजौ वर्तेते तदा सशुष्कमुष्णपदार्थस्य भोजनम्। शनिराहू जलराशौ स्यातां सम्यक् शीतम् अन्नं भुक्तमिति वदेत्। चन्द्रशुक्रयोः जलराशौ स्थितेर्वशात् सद्रवमनुष्णपदार्थस्य स्थलराशौ स्थितयोः गुरुबुध योः सकाशाद् दृढपदार्थस्य च चिन्तनं भोजनप्रश्ने कर्तव्यम्।

## १.६ मांसभोजनप्रश्नः

भोजनप्रश्ने सूर्यादिग्रहैः सकाशाद् विचार्यमाणप्राणिनां मांसाः अधोलिखितवत् ज्ञेयाः।

| ग्रहः | मांसः |
|---|---|
| सूर्यकुजयोः | मृगमांसः |
| चन्द्रेण | कौलीरमांसः |
| गुरुणा | हस्त्यश्वादिमांसः |
| बुधेन | पक्षिमांसः |
| शुक्रेण | महिषवृषभयोर्मासः |
| शनिना | महिषवराहादिमांसः |

ग्रहैः सकाशाद् यथा चिन्त्यते तथैव तेषां क्षेत्रवशादपि अजाप्रभृतिप्राणिनः, सस्यादयः धात्वादयश्च पदार्थाः चिन्तनीयाः। जलराशौ स्थितैः जलग्रहैः सकाशाद् जलचरप्राणयः, जलप्रदानवस्तूनि च चिन्तनीयानि। ग्राम्यराशयः ग्राम्यग्रहैश्च सकाशाद् ग्रामे उत्पत्स्यमानानां सस्यानां पदार्थानां च चिन्तनं भोजनप्रश्ने कुर्यात्। अरण्यराश्यादिभिः अरण्ये सञ्जायमानफलकन्दमूलादीनो चिन्तयेत्।

## १.७ भोजनलाभालाभविचारः

भोजनप्रश्नकाले पृच्छकेन रसनया अधरस्पर्शनेन, प्रोत्फुल्लनेत्रेण अवलोकनेन, हसनेन, हस्तयोः तलभागम् अभिमुखेन उत्थापनवशाच्च, पृच्छको भुक्त्वा आगतेति वदेत्। प्रश्नादौ 'म' कारम् उच्चरति चेत् अतिशीघ्रमेव भुक्तं, 'अच्' अक्षरान् आदौ उच्चरति चेत् शनैः शनैः भुक्तं, 'कादितः भान्तं यावत् अक्षराणाम् उच्चारणेन अतिमन्देन भुक्तं यवर्गमाद्यक्षरं कृत्वा प्रष्टश्चेत् रात्रौ न भुक्तं अथवा विलम्बेन भुक्तत्वात् अत्रप्टिऽभवदिति वदेत्।

भोजनप्रश्ने अधोमुखं कृत्वा पृच्छति प्रश्नं प्रष्टा तदा तस्य कष्टेन भुक्तिरभवत्। यदि निमीलनदृशः पृच्छेत् तेन नूनं भोजनं न कृतम्। प्रष्टा कराग्रम् अधरे संस्थाप्य

निश्चलश्चेत् भोजनमप्राप्तम्। शुभग्रहाणां राशेर्लग्नं शुभानां च योगः लग्ने स्यात्तदा भोजनेन संत्रप्ति अभवदिति वाच्यम्। पापग्रहाणां राशेर्लग्नं तत्रैव पापाः स्युः तर्हि अहितकरं भोजनमिति वाच्यम्।

## १.८ लाभप्रश्ने कार्यसिध्यादिचिन्तनप्रकारः

लाभप्रश्ने मिथुन-कुम्भ-तुला-कन्याप्रभृतिराशिषु यद्येको राशिरारूढलग्नगो भवेत्, स च राशिरूर्ध्वमुखराशिः यदि स्यात्, (1) शुभग्रहाः 1.2.4.5.7.9.10.11 एतेषु स्थानेषु स्युः, (2) धनलाभाधिपत्योः योगः स्यात्, (3) धनलाभाधिपती स्व-स्व भावे स्याताम् (4) धनेशस्य क्षेत्रे लाभेशः, लाभेशस्य क्षेत्रे धनेशश्च स्यात् (5) धनलाभाधिशौ लग्नेशेन सह योगं कुरुतः (6) धनलाभेशौ लग्नाधिपतिं पश्यतः (7) वीर्याढ्यो देवगुरुः इष्टभावे यदि स्यात् (8) नवमाधिपतिः प्रबलः सन् इष्टभावे यदि स्यात्, इमानि लक्षणानि धनलाभो अस्ति वा इत्यस्मिन् प्रश्ने धनलाभसूचकानि सन्ति किञ्च अभीष्टकार्यो जयो भवति नवेति प्रश्नस्य विषयेऽपि कार्यसिद्धिकराः सन्ति पूर्वोक्ताः योगाः।

## १.९ प्रोषितागमनप्रश्नः

प्रष्टा प्रोषितस्यागमनं पृच्छति चेत् मेषादिचरराशिषु यः कोऽपि राशिरारूढलग्नगतो भवेत्, ततः 2-3-4-8 एषु भावेषु शुभग्रहाणां योगो विद्यते चेत् गतस्यागमनं वदेत्। दशमभावेशः वक्रं गतश्चेत् दूरं गन्तुं निर्गतोऽपि प्रयातुः विनिवृत्तिः भवति।

लग्नेशः पञ्चमभावगतो वा षष्ठगतो वा स्यात् तदा गृहं परित्यज्य दूरं गतः मार्गस्थो वर्तते, परन्तु गृहम् अप्राप्तेति वदेत्।

चतुर्थलग्नात् अधो भागे, दशमलग्नात् उर्ध्वभागे अनयोर्मध्ये स्थितभावाः 11-12-1-2-3 एषु भावेषु प्रोषितागमनप्रश्नस्य आरूढलग्नाधिपो वर्तते चेत् प्रोषितो नायाति पुनः गृहं प्रति। लग्नात् केन्द्रेषु पापग्रहाः स्युः तदानीमपि नायाति।

अष्टमस्थो चन्द्रः केन्द्रे च पापग्रहाः न स्युः तदा प्रोषितस्य निरुपद्रवेन आगमनं

वक्तव्यम्। केन्द्रे शुभाः अष्टमस्थे चन्द्रे सति सुखेन आयाति, तत्र न संशयः। लग्नेशदशमेशौ 11-12-1-2-3 एषु भावेषु स्थितौ स्यातां तदा गमनाय उद्युक्तश्चेदपि गमनं दुःसाध्यमिति वदेत्।

प्रोषितस्यगमनलक्षणमुच्यते- लग्नाधिपति उच्चे मूलत्रिकोणे वा, यः कोपि अन्योग्रहः लग्नात् सप्तमभावे वक्रंगतश्चेत् प्रोषितस्यागमनं भवति। यत्र क्वापि विलोमगः यद्येकोपि ग्रहः गुरुश्च केन्द्रे विद्यमानश्चेत् प्रोषितस्य विनिवृत्तिर्भवति। इत्थं प्रश्ने प्रोषितस्यागमनलक्षणं विलोक्यमाणे सति तद्योगकारकग्रहस्य शिघ्रा वा मन्दा वा मध्यमा वा गतिर्ज्ञात्वा तदनुरूपं प्रोषितस्य आगमनं वक्तव्यम्।

पूर्वोक्तलक्षणैः प्रोषितागमनं निश्चयेन ज्ञात्वा लग्नाधिपतिर्वा अन्यो वा बलयुतो यो ग्रहः प्रोषितागमनकारको भवति स ग्रहो यादृशे राश्यंशे स्थितः प्रोषितस्तादृशेनागच्छेत्। लग्ने बलयुते तेनैव वदेत्। द्विपाद्राशिगते ग्रहे पदातिः ससहायम् आगच्छति। चतुष्पाद्राशिगते लग्नेशे चतुष्पाद्रथमारुह्यागच्छेत्। लग्नेशः स्थलराशिगते स्थलेनागच्छेत्। जलराशिगते जलेन नावा स्थिते आगच्छेत्। शकटद्रेष्काणगतश्चेत् शकटेन वा रथेन वा आगच्छेत्। पक्षिद्रेष्काणराशिगते अश्वमारूह्यायात्। आकाशराशिगते लग्नाधिपे शिबिकमारूह्यायात्। यादृशेन ग्रहगतिर्वर्तते तादृशः प्रोषितोऽप्यागच्छेदिति। यात्रा निवृत्तिकारकग्रहः बलरहितश्चेत् प्रयातस्य पुनरायातीति वार्ता एव श्रूयते। न विनिवृत्तिर्भवति तस्य।

लग्नाद् नवमभावे शुभग्रहो वर्तते चेत् प्रयातस्य प्रवासकाले शुभं वाच्यम्। लग्नसप्तमाष्टमगतैः शुभग्रहैः प्रोषितस्य निरोगत्वं द्रव्यलाभं च वदेत्। पापग्रहैः पूर्वोक्तस्थानगतैः त्रासं भयं क्लेशं च वक्तव्यम्। इत्थं प्रोषितागनप्रश्नविचारः कार्यः।

***

# प्रश्नावली

1. संक्षेपण उत्तरं लिखित - 5 x 7 = 35

(1) भोजनप्रश्ने सूर्यादिग्रहेः सकाशाद् विचार्यमाणप्राणिनां मांसाः के।

(2) ग्रहाणां रसभेदवर्णनं कुरुत।

(3) भोजनलाभालाभविचारं कथं कुर्यात्।

(4) भोजनप्रश्ने द्वादशभावैः चिन्तनीयाः विषयाः के।

(5) सप्तमभावे स्थितस्य ग्रहैः सकाशाद् चिन्तनीयाः द्रवपदार्थाः के।

II विस्तरेण उत्तरं लिखित - 10 x 4 = 40

(1) भोजनप्रश्ने आरूढलग्नात् स्थलपात्राणां च कथं विचारं कुर्यात्।

(2) भोजनस्य प्रकाराणां वर्णनं कुरुत।

(3) लाभप्रश्ने कार्यसिध्यादिचिन्तनरीतिं विशदीकुरुत।

(4) भुक्तजनानां संख्या तेषां जातयश्च कथं विचारयेत।

III प्रश्नद्वयस्य निबन्धात्मकम् उत्तरं प्रदेयम्- 12½X 2 = 25

(1) प्रोषितागमन प्रश्नविचारमधिकृत्य निबन्धमेकं रचयत।

(2) भोजनप्रश्नलग्नात् इतरभावचिन्तनप्रकारं निरूपयत।

*******

<u>श्रीः</u>

।। अष्टाविंशोऽध्यायः।।

## १.० अवतरणिका

अये छात्राः!

सुष्टु रतं रमणं यत्र इति सुरतस्य व्युत्पत्तिः। कश्चित् पुरुषः अमुकस्मिन् दिने अमुकस्मिन् स्थाने काचित् स्त्रिया सह मिलित्वा सुरतक्रीडां कृतवान् वा इति प्रश्ने कृते तस्य समाधानं कर्तुम् अत्र क्रमो विधीयते। यत्प्रकारेण अस्तराशिः मिथुनं समेति तत्प्रकारेण मैथुनं वक्तव्यं भवति। अत्र मिथुनं युग्मस्योपलक्षणम्। अस्तराशिः सुरतोपलक्षणम्। शुक्लकारकशुक्रवर्गवशात् शोणितकारककुजवर्गशाच्च वात्स्यायनादिकृतकामशास्त्रोक्तप्रकारेण बहुविधबहुवारकसुरतमपि युक्त्या तर्क्या भवति। यत्प्रकारेण चतुष्पदायोयद्रूपेण अस्तराशिः निषेकलग्नात् प्रश्नलग्नाद्वा मिथुनं समेति तथैव चतुष्पदादिवन्मैथुनं भवति। अन्यच्च सप्तमभावेन मिथुनीभावस्याकर्षकरूपकुचभगादीनामपि लक्षणं, सप्तमराशिराशीशद्रैष्कादिभिश्चिन्त्यम्। तस्मात् मैथुनप्रश्नः कामविषयकत्वात् **'अस गतिदीप्त्यादानेषु'** इति धातोर्निष्पन्नत्वाद्वा अस्तराशिना आरूढलग्नमेव गृह्यते। एवमारूढलग्नवशाद् जातके सप्तमराशिवशाद्वा स्त्रीणामुच्चादिभेदत्वमपि वक्तव्यम्। स्वक्षेत्रस्थद्रष्ट्रा स्वभार्या सङ्गमं, अन्यक्षेत्रस्थेन परभार्यासङ्गमम्, उच्चस्थेन श्रेष्टराजस्त्र्यादिसङ्गमं, बन्धुस्थेन बन्धुस्त्रीसङ्गमं शत्रुराशिस्थेन शत्रुस्त्री सङ्गमं, नीचस्थेन नीचस्त्रीसङ्गमं च ब्रूयात्। स्वेतरस्थितस्य ग्रहस्य तु तत्स्वभाववशात् कथयेत्।

यथा शोणितकारककुजेन वेश्यास्त्रीसङ्गमं, सस्यादिकारकशुक्रेण कर्षकभार्यासङ्गमं, देवमन्त्रिणा मन्त्रिभार्यासङ्गमं यद्वा बाह्मणगुरोर्भार्य्याभुक्ताः, चन्द्रेण ब्राह्मणस्त्रीसङ्गमम् उत्तमक्षत्रियकारकसूर्येण राजस्त्रीसङ्गमं च परादारगृहणविधौ युक्त्या तर्कयित्वा वक्तव्यम्। अस्तराशिः पुरूषश्चेत् पुरूषकर्त्रकं, वनिता चेत् स्त्रीकर्त्रकं पुरूषराशौ स्त्रीग्रहयुतिदृष्टे चोभयकर्त्रको मिथुनप्रयोगः। इत्थम् अत्र **सुरतप्रश्नः प्रस्तुतः** प्रधानः विषयः।

**उद्देश्यानि** -

- ✶ **गर्भाधानस्य प्रधानाङ्गभूतं अनन्यसाक्षिकं मैथुनस्वरूपम्**
- ✶ **अनुरागविरागयोश्चिन्तनविधिः**
- ✶ **स्व-परभार्यागमनज्ञानप्रकारः**
- ✶ **परस्त्री चिन्तनक्रमः, स्त्रीलक्षणं स्त्रीजातिविचारश्च**
- ✶ **छत्रराशितः स्त्री स्वभावज्ञानं सङ्गमस्थानञ्च**
- ✶ **सुरतविषयकरहस्यविचारः**
- ✶ **गर्भसम्भवः, चोरभीतिः प्रियकलहश्च**
- ✶ **मैथुनगृहस्य लक्षणं राशिपरत्वेन सुरतस्थानलक्षणञ्च**
- ✶ **सुरतकालिकदीप लक्षणं दीपस्थानं च**
- ✶ **सूर्यपञ्चघटिका-चक्रं दीपश्च**
- ✶ **प्रश्नावली**

## १.१ गर्भाधानस्य प्रधानाङ्गभूतम् अनन्यसाक्षिकं मैथुनस्वरूपम्

सुरतप्रश्ने आरूढलग्ने वा सप्तमभावे वा सूर्यः स्यात् लग्नेशसप्तमयोर्मध्ये यद्येकेन संयुतश्चेत्, यद्वा लग्नेश सप्तमेशौ सूर्येण ईक्षमाणौ स्यातां तदा प्रष्ट्रा तस्मिन् दिने सुरतं न कृतम्। पूर्वोक्तलक्षणाभावे सति सम्भोगो अभवदिति वक्तव्यम्। सप्तमभावे शुभैर्युक्ते दृष्टे वा सविलासहासेन सुरतक्रीडां वदेत्। अर्थाद् मिथुनप्रयोगो अन्योन्यानुरागयुतो समभवदिति भावः। अस्तराशौ अशुभग्रहैर्युक्ते दृष्टे वा कलहबहुलेन रतिक्रीडा अभवदिति ज्ञेया। अत्र कलह बहुलशब्देन कोपभयवादपृथक्शयनवस्त्रच्छेदा दयो ग्राह्याः।

अस्तराशौ शुक्रचन्द्रयोः योगदृष्ट्यादि-सम्बन्धा-भावेन पापानाम् अवलोकन संयुतेर्वशाच्च निश्चितदिने सुरतं नाऽभवदिति भावः। शुभानां रवेश्च योगः दृष्टिः च शुक्रचन्द्रयोरूपरि यदि स्यात् तौ चन्द्रशुक्रौ लग्नं विलोकयतश्चेत् सा स्त्री पुरूषानुरागिणी आसक्ता च आसीत्। चन्द्रशुक्रयोः कृते सूर्यं विहाय तदितरअसद्ग्रहावलोकनसंयुतिः यदि स्यात्तदा विना अनुरक्ता सुरतक्रीडायां समुद्युक्त आसीदिति भावः।

## १.२ अनुरागविरागयोश्चिन्तनविधिः

लग्नस्योपरि शुभानां दृष्टिः योगश्च यदि स्यात्तदा स्त्रियाः कृते अनुराग आसक्तिश्च आसीदिति, पापानां दृष्टिः योगश्च यदि स्यात्तदा अनुरागः नासीदिति भावः। चन्द्रस्य कृते पापयोगो विद्यते चेत् पुरुषः स्त्रीं बलात् भुक्तबानिति वदेत्। सूर्यस्य कृते पापयोगो वर्तते चेत् पुरुषं बलाद् आकृष्य स्त्री सूरतक्रीडां कृतवतीति वक्तव्यम्। सुतरप्रश्ने चन्द्रः सूर्यस्य योगदृष्टिद्रेष्काणादिवर्गान्वितो वर्तते चेत् पुरुषः सुलक्षणयुतः सुभगश्च आसीदिति। चन्द्रः शुभानां योगदृष्टिद्रेष्काणादिवर्गसमन्वितश्चेत् सौभाग्ययुता सन्दरीस्त्रिया सह सुरतं कृतेति भावः।

## १.३ स्व-पर-भार्यागमनज्ञानप्रकारः

लग्नं वीक्ष्यमाणो ग्रहः द्रेष्काणादिस्ववर्गे स्वक्षेत्रे वर्तते चेत् स्वगृहे स्वभार्यायामेव गमनं कृतम्। लग्नम् ईक्षयिष्यमाणो ग्रह अन्यग्रहाणां द्रेष्काणादिवर्गबाहुल्येनान्वितो अन्येक्षेत्रस्थेन परगृहे परभार्यासङ्गमम्, उच्चस्थेन तादृशग्रहेण श्रेष्टराजस्त्र्यादिसङ्गमं, बन्धुक्षेत्रादिवर्गसम्बन्ध ाद्युतेन बन्धुस्थेन बन्धुस्त्रीसङ्गमं शत्रुवर्गादिसम्बन्धाद्युतेन शत्रुराशिस्थेन शत्रु-स्त्रीसङ्गमं नीचस्थेन नीचस्त्रेसंङ्गमं च ब्रूयात्। अत्र स्त्रियाः जातिं, लग्नं वीक्षमाणग्रहस्य जातेः स्त्रीति वदेत्।

## १.४ परस्त्री चिन्तनक्रमः, स्त्रीलक्षणं स्त्री जातिविचारश्च

प्रश्नारूढलग्नात् सप्तमभावे रविशुक्रकुजानां योगो अस्ति चेत् परस्त्रीसम्भोगो कृतेति वदेत्। सप्तमभावे गुरूः विद्यमानश्चेत् स्वपत्नौ रतिक्रीडाकृता, सप्तमे बुधो वर्तते चेत् वेश्या स्त्री गमनं च वाच्यम्। चन्द्रस्य बालयाद्यवस्थां विज्ञाय स्त्रियाः वयः निर्णयं कुर्यात्। बालचन्द्रस्य कृते बाल्यावस्थायां विद्यमाना स्त्रीति। सप्तमस्थाने शनिः वर्तमानश्चेत् अन्यजातीयां स्त्रिया सह सुरतं कृतेति विजानीयात्। चन्द्रवत् शनेः बलाबलवशात् उच्चनीचादिजातेश्चिन्तनं कुर्यात्।

प्रश्नारूढलग्नाद् सप्तमभावस्थेन बालचन्द्रेण, बुधेन वा कुमारिका सङ्गमं वाच्यम्। सप्तमस्थेन नपुंसकपापग्रहेण शनिना वृद्धस्त्रीगमनं, सप्तमस्थयो गुरूशुक्रयोः सकाशाद् प्रसूतास्त्रीसंङ्गमः वक्तव्यः। कुजशुक्रौ सप्तमस्थौ स्यातां तदा कर्कशस्त्रीसङ्गो वक्तव्यः। लग्नस्थग्रहेण पुरुषस्य वयः सप्तमस्थेन स्त्रियाः वयश्च चिन्तनीयः।

## १.५ छत्रराशितः स्त्रीस्वभावज्ञानं सङ्गमस्थानञ्च

आरूढाधिपतिः छत्रराशौ स्थिते सति, आरूढाधिपतेः राशिश्च छत्रराशिश्चेत् स स्वस्त्रियायामेव गमनं कृतवान्। आरूढाधिपतेः बन्धुराशिः छत्रराशिश्चेत् अथवा मित्रग्रहः छत्रराशौ वर्तते चेत् बन्धुस्त्री गमनं कृतम्। शत्रुग्रहस्य राशिः छत्रराशित्वेन आगते सति अथवा आरूढदेशस्य शत्रुग्रहः छत्रराशौ वर्तते चेत् रिपोर्भामिन्याः सङ्गमो कृतेति वदेत्।

ओजराशिगलग्नम् ओजराशिस्थो ग्रहः लग्नं दृक्ष्यमाणोऽस्ति चेत् सकृदेव सङ्गमो वाच्यः। लग्नं युग्मराशिगं युग्मराशिगतग्रहेण वीक्ष्यमाणश्चेत् द्विवारं सङ्गमं कृतम्। लग्नस्य कृते भार्गवभौमयोः षड्वर्गसम्बन्धो यदि स्यात्तदा वात्स्यायनकामसूत्रोक्तरीत्या विविध ाभङ्गया बहुवारं रतिक्रीडा कृतेति। लग्नं ग्रामराशिश्चेत् ग्रामे, आरण्यकराशिश्चेत् वने, जनपद राशिश्चेत् पत्तने च सम्भोगः कृतेति विचार्यः। लग्नं सूर्यस्य षडवर्गे वर्तते चेत् सुरतं दिने कृतम्। लग्नं चन्द्रस्य षड्वर्गे स्यात्तदा रात्रौ सुरतं कृतम्।

## १.६ सुरतविषयकरहस्यविचारः गर्भसम्भवः, चोरभीतिः, प्रियकलहश्च

सुरतप्रश्नलग्नात् भाग्यापत्यवपुमदेषु यत्र कुत्रापि शशि कुजयोः संयुतिः स्यात्तदा स्त्रीपुरुषौ रात्रौ कलहायमाणौ जागरणं कृतवन्तौ स्यातामिति। पूर्वोक्तभावेषु शनिचन्द्रौ स्यात्तदा स्वप्ने एव अभूत् सुरतम्। पूर्वोक्तस्थाने सूर्यचन्द्रौ स्यातां तदा शय्यायां स्त्रीपुरुषौ परस्परं गुह्यस्थानं परिस्पृशन् कामाद्रेकेन बहुरम्य सुरतं कृतवन्तौ आस्तामिति। उपर्युक्तभावेषु शुक्रचन्द्रौ यदि स्तः बहुकालं यावत् शय्यायां गुह्योक्तिं संभाष्यमाणौ स्त्रीपुरुषौ आस्तामिति।

गुरुचन्द्रयोः योगः यदि प्रथम-पञ्चम-सप्तम-नवम-स्थानेषु प्रश्नारूढलग्नात् स्यात्तदा

काचित् उत्कृष्टा स्त्री गर्भधारणापेक्षया पृच्छकेन सङ्गम्य अन्तर्वत्नी अभवादिति वदेत्। पूर्वोक्त स्थाने बुधशनी स्यातां तदा अन्यस्त्री संसर्गः कृतेति वदेत्। शन्यङ्गारकयोर्मध्ये यद्येकः लग्ने अपरः सप्तमे स्यात्तदा तत्रापि विशिष्य कुजः प्रबलश्चेत् अग्निभयेन सुरतं न समजनि। कुजशन्यो अन्योन्य वेशमस्तित्या चोराग्निभयेन रात्रौ जागरण कृतामिति वक्तव्यं पृच्छकस्य कृते।

सुरतप्रश्नारूढलग्नात् 1-5-7-9 एषु भावेषु एकस्मिन् भावे शनिकुजयोः योग अन्यस्मिन् भावे च चन्द्रो वर्तते चेत् प्रणयिनौ कलहायमाणौ आस्ताम्। सप्तमे चन्द्रश्चेत् स्त्रीव्याजेन कलहमभवत्। लग्ने चन्द्रो वर्तते चेत् पुरुषस्य कारणेन कलहः समजनि। कुजशुक्रयोः संयुतिः, शनिशुक्रयोः संयुतिर्वा, लग्ने सप्तमे वा आगतश्चेत् प्रणयिनोः कलहतः पृथक् शायिकौ जातेति। तृतीयदशमे कुजशुक्रौ अथवा चन्द्रो सप्तमे अस्ति चेत् कलहस्य कारणेन प्रणयिनौ पृथक् भूत्वा भूमौ शायिनौ स्तः।

प्रश्नारूढलग्नात् चन्द्रशुक्रौ प्रथम-तृतीय-सप्तम-चतुर्थभवनेषु यत्र क्वापि स्यातां तदा परस्परं कलह निमित्तेन नार्याः वस्त्रच्छेदं समजनीति ब्रूयात्।

## १.७ मैथुनगृहस्य लक्षणं राशिपरत्वेन सुरतस्थानलक्षणञ्च

मैथुनगृहं कीदृशं गृहमिति निरूपणविधिः प्रोच्यते। तद्यथा- आरूढलग्ने सप्तमे वा शनिः वर्तते चेत् मैथुनग्रहं पुरातनं गृहं, वासयोग्यं कृतमिति वक्तव्यम्। कुजः आरूढलग्ने सप्तमे वा स्थितश्चेत्, अग्निदग्धैकदेशं मैथुनं गृहं, चन्द्रो वर्तते चेत् अभिनवं रमणीयं गृहं, सूर्यो अस्ति चेत् काष्ठबहुलं गृहं, बुधो अस्ति चेत् अनेकशिल्पान्वितं गृहं, शुक्रो अस्ति चेत् मनोहरं चित्रैरलङ्कृतनूतनं च गृहं गुरुणा दृढम् अविरतं वेदशास्त्रपठनात् संस्कृतं यद्वा सम्यग्योजितसन्धिबन्धं गृहं वक्तव्यम्।

पुनः सुरतस्थलचिन्तनक्रमः उच्यते। तद्यथा- सुरतप्रश्ने सूर्यस्य जलराशिस्थितिवशात्स्नानगृहं, अन्यथा पाकशाला च, कुजस्य पाकशाला, चन्द्रस्य राजगृहं

देवतागृहं च, बुधस्य क्रीडागृहं, गुरोः दृढं मन्दिरं द्रव्यस्थानं वा बलहीनभृगुजस्य जीर्णं गृहं, शनेः गवादीनां बृहती-शाला, राहोः वर्चोगृहं च रति क्रीडा स्थानानि तत्तद्ग्रहैः चिन्तनीयानि।

**सुरतकाले प्रकाशादिलक्षणम्**

1 प्रश्नकालिकचन्द्रः शनेर्भवने स्यात्,

2 मकरकुम्भयोः राश्यंशे चन्द्रो वर्तेत।

3 चन्द्रस्योपरि शनेः दृष्टिः स्यात्।

4 चन्द्रशन्योः योगः स्यात्।

5 आरूढलग्नात् चन्द्रः चतुर्थभावे स्यात्।

6 चन्द्रो जलराशौ स्यात्।

पूर्वोक्तेषु षट्लक्षणेषु यद्येकोऽपि लक्षणं स्यात्तदा तमसि शयनं कृत, सुरतं च कृतं तमसि। चन्द्रस्य कृते आदित्यस्य योगदृष्ट्यापि रतिक्रीडाकालिकः दीपविशेषः चिन्तनीयः।

## १.८ सुरतकालिकदीपकलक्षणं दीपस्थानं च

दिवारात्रौ मङ्गलार्थं प्रकाशर्थं च भुक्त्यादौ दीपोन्यस्यते। निहितस्य तादृशदीपस्य लक्षणमुच्यते। सुरतागारं द्वादशधा विभज्य सूर्याक्रान्तराशिवशात् तद्राश्युक्तदिशि दीपो वक्तव्यः। अत्र प्राचीदिशमारभ्य मेषादयः द्वौ द्वौ राशी एकैकस्य दिशि भवतः। तद्यथा- मेषवृषभौ प्राच्यां, कर्कटसिंहौ दक्षिणस्यां, तुलावृश्चिकौ प्रतीच्यां, मकरकुम्भावुदीच्यां च कल्प्याः। उभयराशयः कोणगताः विदिशो भवन्ति। तद्यथा- मिथुनम् आग्नेय्यां, कन्या नैर्ऋत्यां, धनुर्वायव्यां, मीनराशिरैशान्यां च वर्तन्तेति कल्प्याः। अथवा दीपाज्ञानाय अन्यः प्रकारोपि प्रोक्तः। तद्यथा- मेषसिंहधान्विनः प्राच्येशः, वृषकन्यामकराः दक्षिणेशाः, मिथुनतुलाकुम्भाः पश्चिमेशाः, कर्कटवृश्चिकमीनाश्च उत्तरेशाः। इत्थं पूर्वोक्तप्रकारद्वयेनापि दीपं सूर्यस्य स्थित्या चिन्तयेत्। तथाचोक्तम्- **''राशिभ्यः कालिदिग्देशाः वयोजातिश्च लग्नपात्''** इति। **'बलवशात् फलनियमेति'** न्यायात् लग्नं पूर्णवीर्यान्वितश्चेत् सूर्यभ्रमणदिक्वशात् दीपस्य स्थितिम् अन्वेष्टव्यम्।

## १.९ सूर्यपञ्चघटिकाचक्रं दीपश्च

सूर्योदयात्पूर्वं पादोन चत्वारिघटिकात: मेषादिराशिषु सूर्यसञ्चरणम् आरब्धो भवति। ततः सूर्योदयानन्तरं 1½ घटीं यावत् आहत्य पञ्चघटिका यावत् मेषे, ततः 1½ तः 6¼ घटीं यावत् वृषे, पुनः पञ्चघटीं यावत् मिथुने इत्थं पञ्च-पञ्च घटीनां कृते एकैकस्मिन् राशौ सञ्चरिष्यति भगवान् सूर्यः। एवं रीत्या सञ्चरिष्यमाणकाले प्रश्नकालिकसूर्यराशिः कीयद्घटिकामाने आयातीति दृष्ट्वा तद्राशेः दिशि दीपो आसिदिति वाच्यः। उपर्युक्तवत् घटेरनुसारेण प्रश्नकालिकसूर्यस्यराशिः स्थिरराशिश्चेत् स्थिरदीपः, (कुड्यादौ घटितः क्षितौ सुनिहितो वा दीपः) चरराशिरागतश्चेत् चरदीपः, (मर्त्येन धृतःदीपः) उभयराशिरागतश्चेत् मिश्रस्वरूपो डोलायमानो दीपः, (अम्बरे लम्बितो दीपः) तत्र असीदिति आदिशेत्।

सुरतप्रश्नकाले सूर्ये वीर्यान्विते सति दीपज्वाला प्रसन्ना, अबले मलिना च। चन्द्रे वीर्यान्विते स्नेहः नैर्मल्येन स्थितमासीत्। दुर्बलेन चन्द्रेण दूषितत्वं वाच्यम्। अत्र स्वहोरागतचन्द्रेण गोमहिषादिसम्भूतघृतादयो वाच्याः। सूर्यहोरागतचन्द्रेण नारिकेलतिलादिसम्भूततैलादीनां दीपं चिन्त्यम्। चन्द्रस्य शुभयोगदृष्ट्यादिभिः गोमहिषादिसम्भूतघृतादयः, चन्द्रस्य पापयोगदृष्टयादिसम्बन्धेन क्रिमिकीटाद्युतं तिलादिसम्भूततैलयुतत्वं दीपं च वाच्यम्।

चन्द्रस्य बलाबलवशात् स्नेहस्यापि गुणदोषाः चिन्तनीयाः। शशाङ्कस्य पूर्णत्वेन जलराशिगतत्वेन च दीपभाजने स्नेहस्य पूर्णत्वं क्षीणत्वेन जलराश्यन्तर्गतत्वेन च स्नेहस्य न्यूनत्वं च वक्तव्ये। लग्नाद् वर्तिवाच्या। लग्न लग्नस्थलग्नाधिपवशात् तत्तद् ग्रहोक्तवस्त्रेषु बलिनो वस्त्रं वाच्यम्। तत्रापि राश्यशकवशाद् वर्णो वाच्यः। ‘‘**बलयोगात्फलमंशकर्क्षयोरिति**’’ न्यायोऽत्राप्यनुसरणीयः। बलसाम्येविचत्रवर्णो वाच्यः। लग्नभुक्तभागेन वर्तेर्दग्धभोगश्च वक्तव्यः अभुक्तभागेनेतरभागश्च।

***

# प्रश्नावली

1. संक्षेपण उत्तरं लिखित - 5 x 8 = 40

(1) गर्भाधानकालिकमैथुनस्वरूपचिन्तनक्रमं वर्णयत।

(2) स्त्रीपुरुषयोः परस्परम् अनुराशचिन्तनविधिं स्पष्टयत।

(3) छत्रराशितः स्त्रीस्वभावज्ञानं कथं करणीयम्।

(4) मैथुनगृहस्य लक्षणं राशिपरत्वेन सुरतस्थान लक्षणानि च लेख्यानि।

(5) सुरतकाले प्रकाशादिलक्षणं कथं अनुनेयम्।

II विस्तरेण उत्तरं लिखित - 17½ X 2 = 35

(1) सुरतविषयकरहस्यविचारः कथं करणीयः।

(2) सुरतप्रश्नलग्नतः गर्भसम्भव-चोरभीति-प्रियकलहविचारश्च कथं ज्ञेयः।

III प्रश्नद्वयस्य कृते निबन्धं रचयतः- 12½ X 2 = 25

(1) सुरतकालिकदीपलक्षणं दीपस्य स्थानविशेषचिन्तनक्रमं च निरूपयत।

(2) सूर्यघटिकाचक्र तद्वशात् दीपज्ञानप्रकारं च निरूपयत।

*******

**श्रीः**

## ॥ एकोनत्रिंशोऽध्यायः॥

### १.० अवतरणिका

अये छात्राः!

नष्टो नाम अदर्शनविशिष्टः। अत्र नष्टाप्तिं सूत्रम् आचक्ष्यमाणा आचार्याः नष्टस्य अदर्शनविशिष्टस्य, चोरेण अपहृतस्य वा वस्तुन आप्तिः भवति वा न वेति जिज्ञासायाः समाधाानं कर्तुं नष्टप्रश्नविधिं प्रतिपादयामासुः। स्वाभिप्रायम् अनुक्त्वा पृच्छकः दैवज्ञमुपेत्य यदि प्रश्नं पृच्छति अयं प्रश्नः नष्टसंज्ञकप्रश्नो वा इति तज्ज्ञानाय आदौ वक्ष्यते। नष्टप्रश्ने **''लग्नस्वामिसमानं रूपं जातिं च तस्करं वदेदिति''** आर्यासप्ततौ उदीरयामासुः। अनेन एतदुक्तं भवति पृष्टं वा मुष्टिगतं, नष्टं वा लग्नस्वामिना समानं रूपं जातिं च चोराद्याकृतिचिन्तायां चोराकृतिं धातुमूलजीवेषु यद्रव्यधारी द्रेष्काणः तद्रव्यं नष्टचिन्तने वक्तव्यमिति विभावयेत्। तस्मात् नष्टप्रश्ने लग्नांशकादप्रहृतद्रविणस्य जातिं वदेत्। लग्नद्रेक्काणतस्तद्-तपहत्रृजनस्वरूपं कथयेत्। **'दिग्देशकाल-कलनं किल राशितः स्यात्'**। अपि च नष्टप्रश्नकालिकलग्नांशकाद् भवति जातिवयोविभागः। इत्थम् अध्यायेऽस्मिन् प्रस्तुतः प्रधानः विषयः नष्टप्रश्नः।

**उद्देश्यानि-**

* **प्रश्नवशात् पृच्छकस्य कस्यविषयकप्रश्नेति भेदक्रमः।**
* **चोरभावविशेषचिन्तनप्रकारः**
* **अपहृतवस्तुनः दिक्परिज्ञानविधिः**
* **मेषादिराशिप्रदेशस्य लक्षणानि**
* **ग्रहैः सकाशाद् नष्टद्रव्यस्थानचिन्तनक्रमः**
* **राशिभिः ज्ञापनीयवस्तुसंख्या नष्टवस्तूनां वर्णाश्च**
* **ग्रहाणां रश्मिसंख्यया चोरितवस्तुसंख्याज्ञानं पञ्चभूतैः वस्तूनां स्थितिश्च**
* **राशिभिः सकाशाद् कर्मभोगनाशधात्वादिचिन्तनक्रमः**

* **धात्वादिक्रमेण विविधनष्टद्रव्यचिन्तनक्रमः**
* **चोराकृतेः चिन्तनविधिः तेषां संख्या च**
* **चोरस्य जनस्थलवासस्थलयोः ज्ञानार्थं ग्रहैः सकाशाद् चिन्तनीयाः पत्तनग्रामादयः**
* **चोराणां नाम विज्ञानार्थम् अक्षराणां ग्रहराशिषु सम्बन्धकथनप्रकारः**
* **नष्टद्रव्याप्तिचिन्तनप्रकारः**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

## १.१ प्रश्नवशात् पृच्छकस्य कस्य विषयकप्रश्नेति भेदक्रमः

स्वाभिप्रायम् अनुक्त्वा हृदगतविषयं गोपयित्वा वा यदि पृच्छकः प्रश्नं पृच्छति तदा कार्यचिन्तनक्रमः प्रोच्यते। आरूढलग्ने वा तात्कालिकलग्ने वा गुरूचन्द्रयोर्मध्ये यदि कोऽपि लग्नभवनगतश्चेत् अथवा तयोः दृष्टिः लग्नभावे स्यात्तदा आयुषः प्रश्नेति भावः। रोगैः सकाशाद् वा तदितरकारणैर्वा शरीरविषयकगुणदोष चिन्तनप्रश्नेति मन्तव्यम्। लग्नात् 7-8-12 स्थानेषु यत्र क्वापि शनेः योगः दृष्टिर्वा आगतच्छेत् तर्हि चौर्यं समुद्दिश्य कृतः प्रश्नेति विभावयेत्। आरूढलग्नाद् तात्कालिकलग्नाद्वा द्वितीये अमरगुरुः, प्रथमैकादशे शुक्रः, दशमे बुधश्चेत् किमपि कार्यमुद्दिश्य कृतः प्रश्नेति चिन्तयेत्। अपि च तात्कालिकनिमित्तैर्वशादपि जयापजयं लाभालाभं च विचारणीयमस्ति। तद्यथा- काचित् स्त्री तत्काले आगमिष्यति चेत् स्त्रीविषयकप्रश्नः, आयुधधारीपुरुषः तत्रागतश्चेत् विवादप्रश्नः, मन्त्रपठनश्रवणेन देवता सम्बन्धीप्रश्नः, शिशो आक्रदनश्रवणेन शिशुसम्बन्धी प्रश्नः, काकस्वरस्य श्रवणेन मृत्युसूचकप्रश्नः, अष्टमे शनिमान्द्योः स्थितेर्वशात् मरणप्रश्नः सप्तमेशः शुक्रः लग्नाधिपतेः सम्बन्धेनावस्थिते सति विवाहप्रश्नः, गवां विचारः तत्र प्रश्नकाले आगतश्चेत् पशुविषयकप्रश्नः, तत्र पुस्तकधारी कश्चिदागतश्चेद् विद्यार्थीप्रश्नश्चेति सामान्यतः तत्तन्निमित्तेन प्रश्नविचारः कार्यः।

तात्कालिकलग्न-आरूढलग्न-चन्द्राच्च एषु त्रीषु कस्याप्येकस्य केन्द्रस्थाने षष्ठे वा यः कोपि ग्रहो विद्यमानः, कर्कवृश्चिकमीनराशिषु कस्यापि राशेर्नवांशे स्थितश्चेत् नष्टप्रश्नेति वाच्यः। तस्मिन् प्रश्ने अविद्यमानवस्तुं चोरेणापहृतमिति वक्तव्यम्। आरूढलग्नतः चन्द्राच्च दशमे यः कोपि पापग्रहोः वर्तते चेत् निःसंशय चोरितमस्ति वस्तु। लग्न-चतुर्थ-सप्तम-दशम-षष्ठ-भावे च स्थिताः पापाः चोरग्रहाः। पूर्वोक्तेषु ग्रहेषु वीर्यान्वितः विहगः क अस्तीति विलोक्य चोरस्य स्थितिं वदेत्।

चोरप्रश्ने लग्नस्फुटस्य नवांशकाद् अपहृतद्रव्यं ज्ञेयम्। द्रेक्काणतः तस्करजनस्वरूपं, राशिभ्यः कालदिग्देशाः, लग्नपात् वयो जाति च चिन्तयेत्। लग्नस्य द्रेक्काणस्वरूपं लग्नांशस्य स्वरूपं च यादृक् वर्तते तादृशेव चोरस्य वर्णवंशवस्त्राकृतिं चिन्त्येति शास्त्रकारणां मतम्।

**''लग्नस्वामिसमानं रूपं जातिं च तस्करस्य वदेत् इत्यार्यासप्ततितिः''**

## १.२ चोरभावविशेषचिन्तनप्रकारः

षष्ठभावः चोरभावः। षष्ठभावेशेन, षष्ठभावेस्थित ग्रहैर्वशाच्च चोरस्य आकृति जाति नामादीश्च वदेतदिति माघवाचार्यो वक्ति। लग्नं वीक्ष्यमाणो ग्रहः शत्रुराशिगतः सन् शत्रुराश्यंशकगतश्चेदपि अपहृतं वस्तु तावत् शत्रुहस्तगतो अस्ति। आरूढलग्नं विलोक्यमाणो ग्रहः बन्धुराशिस्थः सुहृन्नवांशे एव स्थितिश्चेत् चोरितं वस्तु बन्धुहस्तगतं, पूर्वोक्तग्रह उच्चस्थः उच्चांशके च स्थितिश्चेत् उत्कृष्टजनहस्तगतं चोरितं वस्त्विति वदेत्। आरूढलग्नांशकराशितः धात्वादीन् विचिन्त्य वस्तुनः स्वरूपं विजानीयात्। लग्नम् ईक्ष्यमाणो ग्रहः स्वराशौ स्वांशके विद्यमानश्चेत् चोर्यं नाऽभवत्। परन्तु तत्रैव तच्चोरितमस्ति वस्तु इति युक्त्या तर्कयित्वा वक्तव्यम्।

## १.३ अपहृतवस्तुनः दिक्परिज्ञानाविधिः

आरूढलग्नस्य कृते विहितदिशि अपहृतधनवस्त्वादीनां स्थितिं वदेत्। यतो हि द्रेक्काणसदृशश्चोरो लग्नांशकसदृशं चोरापहृतवस्त्वित्युक्तम्। आरूढलग्ने यदि कश्चिद् ग्रहो

वर्तते तद्ग्रहस्य दिशि चोरितधनस्य वस्तोर्वा स्थितिं वदेत्। यथा ग्रहाणां "प्रागाद्यारविशुक्रलोहिततमः सौरेन्दुवित्सूरयः" इति प्रागाद्यष्टदिशामीशाः कथिताः, तथा तेषां ग्रहाणां दिश्यनुसारेणापि अपहृतवस्तुनः स्थितिं वक्तुं शक्यते। आरूढलग्नं चरश्चेत् अपहृतं धनं दूरे वर्तते, स्थिरश्चेत् गृहे कुत्रापि अस्ति, द्विस्वभावराशिश्चेत् मध्यप्रदेशे अस्ति।

लग्ने वीर्ययुते सति तदुक्तदिशि हृतं द्रव्यं वर्तते। लग्ने दुर्बले सति लग्नं वीक्ष्यमाणो ग्रहः यः स्यात् तद्दिशि हृतं द्रव्यम् अस्ति। आरूढलग्नं चरराशिश्चेत् अपहृतं वस्तु सञ्चलितम् अस्ति। स्थिरराशिश्चेत् तत्रैव विद्यमानो अस्ति। द्विस्वभावराशिश्चेत् गृहाद्बहिः परिसरे ग्रामे गृहे वा तद्वस्तु अस्तीति प्रवदेत्। लग्नं स्थिरराशिगं स्थिरराश्यंशगतश्च यदि स्यात् अथवा लग्नांशकः वर्गोत्तमांशकश्चेत् स्वजनेन केनापि चौर्यं कृतमिति वदेत्। चरराशिश्चेत् अन्यजनाः, द्विस्वभावराशिश्चेत् निकटकुटिवासिना अपहृतमिति कथयेत्। आरूढलग्नं दिवाबलिराशिश्चेत् चौर्यं दिने कृतम्। निशाबलिराशिश्चेत् रात्रौ कृतं चौर्यम्। इत्थम् अपहृतवस्तुनः विषये सर्वं चिन्तनीयम्।

## १.४ मेषादिराशिप्रदेशस्य लक्षणानि

मोषितद्रव्यचिन्तनक्रमे मेषादिराशिप्रदेशस्य लक्षणानि अधोनिर्दिष्टवत् ज्ञेयानि

| **राशिः** | **प्रदेशलक्षणम्** |
|---|---|
| मेषः | यत्र अजाः प्रचरन्ति तन्मेषराशेः स्थानम् |
| वृषः | पशूनां सञ्चरणस्थानं तृणबाहुल्यस्थानं च |
| मिथुनः | निर्जनप्रदेशः शयनागारश्च |
| कर्कः | कर्कटानां वासस्थानं तडागश्च |
| सिंहः | अरण्यम् गह्वरः |
| कन्या | बहुसस्यैरावृतं जलस्थानम् |
| तुला | आपणं पत्तनं च |
| वृश्चिकः | कन्दरः वल्मीकस्थानं श्मशान च |

| | |
|---|---|
| धनुः | युद्धभूमिः राजधानी च |
| मकरः | नद्यन्ते स्थितं वनं, निषादालयश्च |
| कुम्भः | कुम्भकारस्य आलयं पाकशाला च |
| मीनः | नद्याः तीरं, तीर्थक्षेत्रं, देवालयः ब्राह्मणानां गृहं च |

इत्थं द्वादशराशीनां प्रदेशस्य चिन्तनं कुर्यात्। नष्टप्रश्ने लग्नराशितः एतादृशप्रदेशेषु मोषितद्रव्यस्य स्थितिं वदेत्।

## १.५ ग्रहैः सकाशाद् नष्टद्रव्यचिन्तनक्रमः

आरूढलग्नं गुरूणा वीक्षितयुतश्चेत् गोष्टागारपुरोहितदेवागार-पतिव्रतागृहप्रभृतिषु चत्वारिस्थानेषु कुत्रापि नष्टं विनिर्देश्यम्। पूर्वोक्तलग्नं शुक्रदर्शनयोगेन च स्थितश्चेत् शय्यास्थानम्, उद्यानं, जलाशयस्थानं, शुभस्त्रीगृहं, गन्धालयं माल्यालयं च अपहृतवस्तुनिहितस्थानानि वक्तव्यानि। कुजस्य योगदृष्टया अग्निनिलये कर्मकरादिधातुकारादिगृहे वा वक्तव्यं नष्टम्। लग्ने आदित्ययोगेन तद्दृष्टया वा कुलस्त्रीगृहे वयसां स्त्रीगृहे वा नष्टं निहितमिति वक्तव्यम्। आरूढलग्नं चन्दो पश्यति तत्रैव तिष्ठेद् वा तदा वेश्यावेश्मनि वारि वारिसविधे वा एषु त्रीषु स्थानेषु विनष्टं वस्तु निहितमस्तीति चिन्तयेत्। सौम्ययोगदृष्टया बहुनारीगृहे नष्टं वक्तव्यम्। शनैश्चरयोगदृष्ट्या जीर्णोपस्करादिभाजनेषु न्यस्तं नष्टमिति वदेत्। यस्य ग्रहस्य कृते यानि स्थानानि कथितानि तानि सर्वाणि स्थानानि न वक्तव्यानि। किन्तु लग्नं स्थानसमं विभज्य क्रमो तत्तद्स्थानागुण्येन समन्वयेत्। उदाहरणार्थं गुरोः चत्वारि स्थानन्यभिहितानि। लग्नस्फुटं चतुर्धा कृत्वा लग्नं यस्मिन् भागे विद्यमानो अस्ति तत्संख्याकस्थानं क्रमाद्गोष्टागारादिस्थानेषु नष्टवस्तुन्यस्तस्थानमिति वदेत्।

## १.६ राशिभिः ज्ञापनीयवस्तुसंख्या नष्टवस्तूनां वर्णाश्च

कोष्टके प्रदर्शितवत् राशिभिः ज्ञापनियवस्तुसंख्याः नष्टवस्तूनां वर्णाश्चं ज्ञेयाः।

| | मेष: | वृष: | मिथुन: | कर्क: | सिंह: | कन्या | तुला | वृश्चिक: | धनु: | मकर: | कुम्भ: | मीन: |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| वस्तुसंख्या | 7 | 5 | 12 | 6 | 8 | 6 | 4 | 7 | 13 | 10 | 5 | 15 |
| वर्ण: | रक्त: | कृष्ण: | हरिद्वर्ण: | श्वेत: | धूम्र: | चित्र: | श्वेत: | कृष्ण: | काञ्चनाभ: | रक्त: | कृष्ण: | श्याम: |

उपर्युक्तकोष्टके अपहृतवस्तुसंख्यां लग्नराशे: संख्याया: समानां वदेत्। आरूढराशे: वर्णा एव चोरितवस्तुन: वर्णेति मन्तव्यम्।

## १.७ ग्रहाणां रश्मिसंख्यया चोरितवस्तुसंख्याज्ञानं पञ्चभूतै: वस्तूनां स्थितिश्च

ख्यादिग्रहाणां रश्मिसंख्या: कोष्टके प्रदर्शितवत् ज्ञेया: सन्ति।

| ग्रहा: | सूर्य: | चन्द्र: | कुज: | बुध: | गुरु: | शुक्र: | शनि: | राहु: | केतु: |
|---|---|---|---|---|---|---|---|---|---|
| रश्मिसंख्या | 30 | 28 | 8 | 6 | 9 | 7 | 3 | 2 | 2 |

लग्नम् ईक्ष्यमाणो ग्रह: लग्नस्थग्रहयोश्च योगदृष्टे: सकाशाद् पूर्वोक्तानां तेषां रश्मिसंख्याकवस्तूनां नष्टं वदेत्। तस्कराणां संख्यापि अनेन वदेत्।

पञ्चभूतै: सकाशाद् वस्तूनां स्थितेर्ज्ञनाय विधि: प्रोच्यति। तद्यथा- शशिनं बुध कुजरवय: पश्यन्ति चेत् अपहृतं भूमौ निहितमिति वदेत्। चन्द्रं जीवो पश्यति नष्टं व्योम्नि लम्बितं, शुक्रो पश्यति सति जले, बुधो पश्यति सति भूमौ, शनि: पश्यति चेत् वायुस्पर्शे अपहृतं च वस्तु निहितमिति वक्तव्यम्। एवमारूढवशाच्चोराहृतद्रव्यस्थितिप्रदेशं चिन्तयेत्। शशी कस्यापि ग्रहादृष्टश्चेत् धात्वादिचन्द्रस्थितिराशिवशात् भाजने न्यस्तमिति भाव:। ध ातुराशिस्थितश्चेद्धातुभाजने न्यस्तं नष्टम्। मूलराशिगश्चेत् मूलभाजने, जीवराशिगश्चेद् कृत्रिमजीवभाजने वदेत्।

## १.८ राशिभिः सकाशाद् कर्मभोगनाशधात्वादिचिन्तनक्रमः

चरराशयः धातुराशयः, स्थिरराशयः मूलराशयः, द्विस्वभावराशयः जीवराशयः वर्तन्ते। एतेषां त्रयाणां विभागानां कृते एव क्रमशः कर्मभोगनाशराशयश्चेति भेदाः वक्ष्यन्ते। मेषतः कर्मधातुचिन्तनं, वृषभतः भोगमूलचिन्तनं, मिथुनतः, नाशजीवचिन्तनं, कर्कटतः नाशधातुः, सिंहतः कर्ममूलं, कन्यातः भोगजीवः, तुलातः भोगधातुः, वृश्चिकतः नाशमूलं, धनुतः कर्मजीवः, मकरतः नाशधातुः, कुम्भतः कर्ममूलं, मीनतः नाशजीवश्चेति चिन्तयेत्।

मेषादिराशीनां कर्मभोगनाशधातुमूलजीवश्चेति विभागः कोष्टके अधो निर्दिष्टवत् एवं सूच्यते।

| राशिः | कर्मभोगादिविभागः | धातुमूलादिविभागः |
|---|---|---|
| मेषः | कर्म | धातुः |
| वृषः | भोगः | मूलम् |
| मिथुनः | नाशः | जीवः |
| कर्कः | नाशः | धातुः |
| सिंहः | कर्म | मूलम् |
| कन्या | भोगः | जीवः |
| तुला | भोगः | धातुः |
| वृश्चिकः | नाशः | मूलम् |
| धनुः | कर्मः | जीवः |
| मकरः | नाशः | धातुः |
| कुम्भः | कर्म | मूलम् |
| मीनः | नाशः | जीवः |

यथा मेषादीनां कृते धात्वादयो कथिताः तथैव तेषाम् अंशकानां कृतेऽपि ध

ातुमूलजीवाः चिन्तनीयाः। नक्षत्रेष्वपि अश्विन्याः कृते धातुः, भरण्याः मूलं, कृत्तिकायाः जीवः, चिन्तनीयाः सन्ति। ग्रहेष्वपि चन्द्रकुजशनिराहवः धातुग्रहाः सन्ति। सूर्यशुक्रौ मूलग्रहौ भवतः। गुरुबुधौ जीवग्रहौ स्याताम्।

मेषे प्रथमद्रेक्काणतः कर्मधातुः, द्वितीयद्रेक्काणतः भोगधातुः, तृतीयद्रेक्काणतः नाशध ातुश्च। इत्थम् एकस्मिन् राशौ त्रयो द्रेक्काणानां कृते कर्मभोगनाशधातूनां विचारो विधेयः। वृषभे प्रथमद्रेक्काणं कर्ममूलं, द्वितीय द्रेक्काणं भोगमूलं, तृतीयद्रेक्काणं च नाशमूलम्। मिथुने प्रथमद्रेक्काणः कर्मजीवः, द्वितीयद्रेक्काणः भोगजीवः, तृतीयद्रेक्काणश्च नाशजीवः। अवशिष्टानां सर्वेषां राशीनां कृते चरस्थिरद्विस्वभावानुगुण्येन अयं क्रमः सर्वत्र ग्राह्यः।

## १.९ धात्वादिक्रमेण विविधनष्टद्रव्यचिन्तनक्रमः

आरूढलग्नं धातुराशिकं धात्वाख्यांशे च स्थितश्चेत् नष्टं वस्तु तावत् लोहपाषाणकांस्य सुवर्णरूप्यमरूपमेतदखिलं सीसादिकं च वाच्यम्। आरूढलग्नं धातुराशौ मूलांशे स्थितश्चेत् कन्दमूलादयः निधिरप्यधस्थमवनेर्मूलं च वाच्यम्। आरूढलग्नगधातुराशौ जीवग्रहः जीवांशे जीवनक्षत्रे च स्थितश्चेत् चोरितं वस्तु तावत् लोहसुवर्णरजतादिना निर्मितं जीवरूपेणस्थितं देवप्रतिमा पशुप्रतिमा-स्त्रीप्रतिमा च स्यात्।

मूलं मूलगतश्चेत् (मूललग्नं मूलांशकं, मूलनक्षत्रं मूलकारकग्रहश्च) फल-वृक्ष-लतादिमूलगधातवः गुड-वस्त्र-काष्ठ-अग्नौ विदग्धं क्वथितं सर्वप्रकारक वस्तुर्वा चिन्तनीयः। मूलोद्भवाः जीवाश्चेत् वृक्षेण निर्मितजन्तूनाम् आकृतयः, वृक्षेषु वासं कुर्वतां विहगानां, तेषां नीडं, गोशालायाः सम्बन्धिनो पदार्थाश्च चिन्तनीयाः। जीवो जीवगतश्चेत् गजाद्युपरिगः बालकः, वाहनं, गर्भिणीस्त्री प्रभृतयो चिन्तनीयाः।

## १.१० चोराकृतेः चिन्तनविधिः तेषां संख्या च

लग्ने बलवति लग्नद्रेक्काणसदृशगश्चोरः। उदये बलहीने सप्तमभावगतबलवद् ग्रहसदृशाकृतिं तस्करस्येति वदेत्। यद्वा केन्द्रगतबलवद्ग्रहसदृशाकृतिश्चोरः। यदि केन्द्रे

चोरसूचकग्रहा: बहवो स्यु: तर्हि तेषु यावन्तो ग्रहा: बलिन: सन्ति तावन्तश्चोरा:। केन्द्रास्थितग्रहै: सकाशाद् चोराणां गुणाकृतयोऽपि चिन्तनीया:। केन्द्रे यद्येको बलवान् तदा एक एव चोर:। सर्वे बलयुक्तास्तावत्संख्याकाश्चोरा:। केन्द्रे उच्चवक्रगता: ग्रहा: स्थिताश्चेत् **''स्वतुङ्गवक्रोपगतैस्त्रिसंगुणम्''** इत्याद्युक्तरीत्या त्रिगुणितसंख्याक- चोरसंख्यां वदेत्।

लग्नादित: कुटुम्ब-सहज-मातृ-पुत्र-भार्यादिभावेषु यस्मिन् भवे चोराख्य: बलवद्ग्रहस्तिष्ठति तद्भावकश्चोर:। तत्रापि स्ववर्गे स्थिते स्वयमेव चोर:। लग्ने बलवद्ग्रहयुते स्वयमेव चोर:। द्वितीये कुटुम्बजन:। चोराख्यो ग्रह: षष्ठभावे अष्टमभावे वा स्थितश्चेत् चोरपुरूष: न केवलं चोर:, किन्तु शत्रुरपि वर्तते।

भ्रात्रादिषु भावेषु परवर्गस्थे ग्रहे तत्सम्बन्धिनश्चोरा: सन्तीति वदेत्। एवं रीत्या भाववशात् चोरस्य चिन्तनं कार्यम्।

### १.११ चोरस्य जन्मस्थलवासस्थलयोः ज्ञानार्थं ग्रहैः सकाशाद् चिन्तनीयाः पत्तनग्रामादयः

गुरुबुधौ ग्रामनिवासिकौ स्त:। शशिशुक्रौ जलनिवासिकौ स्याताम्। अन्ये ग्रहा: वनचरा: सन्ति। इत्थं ग्रहाणां वासस्थलानि ज्ञेयानि। कन्यातुलाधन्विन: नगरवासिन: राशय:। मिथुनकुम्भमेषवृषभा: ग्रामवासिन:। सिंहमकरस्य पूर्वार्धं च वनचरराशी स्त:। कर्कवृश्चिकमीनमकरस्योत्तरार्धं च जलचरराशय:। चोरसूचकग्रहस्य प्रोक्तग्रामपुरादिकेषु चोरस्य जन्मस्थानं, चोराह्वयो ग्रह: यस्मिन् क्षेत्रे स्थित: तद्राशे: विहित ग्रामपुरादिकेषु चोरस्य वासस्थानं वदेत्। चोरसूचकग्रहस्य तस्याधिष्टितर्क्षं च एकैव स्यात्तदा चोरस्य जन्मस्थलं वासस्थलं च एकैव अस्तीति विभावयेत्। इत्थं चोरसूचकग्रहेण खेटाश्रितराशिवशेन च ग्रामपुरादिभेदं, जन्मस्थलंवासस्थलभेदं च विचिन्तयेत्। नगरवासिद्रेक्कागं लग्नं नगरस्वामी ग्रह: पश्यति चेत् नागरिकश्चोर:। जलनिवासद्रेक्काणे जलग्रहदृष्टे वा जलनिवासक:। शैषेद्रक्काणै ग्रहैरेवं निवासभूमिं वेदत्।

## १.१२ ग्रहाणां सञ्चारस्थानानि तस्करस्य शयनाद्यवस्था ज्ञानं च

हिमकरः ग्रामाद् गच्छति काननम्। वनाद् भार्गवः ग्रामे अवतरति। अयं भार्गव अगाध ारहिते जले सञ्चरति, चन्द्रश्च अगाधाम्भसि सञ्चरति। राहुः वल्मीकवटरन्ध्रपल्वलचरः। सूर्यः पर्वते सञ्चरति। शनिः श्मशाने दण्डकारण्ये च सञ्चरणं करोति। भोमः अद्रिकुञ्जे दुर्गविपिने च भ्रमणं करोति। चोरप्रश्ने चोरग्रहस्य कृते विहितसञ्चारस्थितिं पूर्वोक्तरीत्या विचार्य वदेत्। सर्वेषां राशीनां प्रथम द्रेक्काणम् उत्तिष्ठति। मध्यमा शेते। उत्तमास्ते। उदयद्रेष्काणवशाच्चोरस्य अवस्थाविशेषो वक्तव्यः। मनुजाकृतेः लग्नस्य द्रेष्काणो उदिते सति उत्तमजनाः चोराः, वानरवाजिकुक्कुरवराहसर्पादिद्रेक्काणः चोरलग्ने उदिते सति चोर अधमः, दुर्जनो वा वर्तते।

## १.१३ चोराणां नाम विज्ञानार्थम् अक्षराणां ग्रहराशिषु सम्बन्धकथनप्रकारः-

ग्रहैः राशिभिश्च सूच्यमाणवर्गाक्षराः कोष्टके प्रदर्शितवत् ज्ञेयाः सन्ति। तद्यथा-

| ग्रहः | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | राहुः |
|---|---|---|---|---|---|---|---|---|
| वर्गः | अवर्गः | यवर्गः | कवर्गः | टवर्गः | तवर्गः | चवर्गः | पवर्गः | श,ष,स, ह, ळ, क्ष अक्षराणि |

राशिषु अक्षराणां सम्बन्धं कल्पयितुं अत्र अकारादीन् वर्णान् मेषादिषु राशिषु संयोजयेत्। कथमिति चेत् अ, आ, इ, ई, श मेषस्य। उ, ऊ, ऋ, ष वृषमस्य। ॠ, लृ, ॡ, स मिथुनस्य। ए, ऐ, ह कर्कटस्य। ओ, औ, ळ सिंहस्य। अं, अः, क्ष कन्यायाः। कवर्गस्तुलायाः। चवर्गः वृश्चिकस्य। टवर्गः धनुषः। तवर्गः मृगस्य। पवर्गः कुम्भस्य। यरलवाः मीनस्य।

चोरस्य नामज्ञानाय ग्रहेषु कस्य कृते कः वर्गः वर्ततेति पूर्वं प्रतिपादितवत् ज्ञात्वा प्रश्नलग्नस्य कृते यस्य ग्रहस्य दृष्टिः वर्तते तद्ग्रहस्य वर्णः चोरस्य नाम्नो आद्यक्षरः। ग्रहराशीनां बलाधिकेन नामप्रथमाक्षरं वदेत्। ग्रहाणां दृष्टेरभावै सति लग्ने स्थितस्य ग्रहस्य

वर्णो वाच्यः। लग्ने यद्येकोपेक्षया बहवो ग्रहाः स्युः तदा बलीग्रहस्य वर्णः तस्यनाम्नि आद्यक्षरेति मन्तव्यः। आरूढलग्नस्योपरि ग्रहाणां दृष्टिः लग्ने ग्रहाां योगादेरभावे च सति आरूढाधिपतिः, आरूढेशः विद्यमानराशिः, आरूढाधिपतेः नवमांशपतिः, द्वादशांशाधिपतिः, त्रिशांशाधिपतिश्च एतेषु वदेत् नाम्नो आद्यवर्णेति वदेत्। **'चोरो भावेषु षष्ठः इत्युक्तिः'** प्रसिद्धा। अतः चोरस्य स्थानं षष्ठभावः। तस्मात् चोरभावम् ईक्ष्यमाणो ग्रहः, तद् भावेस्थितो ग्रहः षष्ठभावेशग्रहः, षष्ठभावाधिपतिः विद्यमानराशिः, तदंशकराशिः, षष्ठभावराशिश्च एतेषु बलीग्रहस्य अक्षरं चोरस्य नाम्नाद्यवर्णेति कथयेत्।

पूर्वोक्तक्रमे स्वांशके ग्रहे स्थिते स्ववर्णमेव कुरूते। पराशके तद्वर्णयुतम्। संयुक्ताक्षरमित्यर्थः। ग्रहः स्थिरराशौ वर्तते चेत् नाम्नि चत्वारो वर्णाः सन्ति। चरराशिगतश्चेत्। अक्षरद्वयम्। उभयराशिगतश्चेत् वर्णत्रयम्।

### १.१४ नष्टाद्रव्याप्तिचिन्तनप्रकारः

क्रूरराशिस्थितमुदयगतं पापग्रहं पापग्रहो पश्येद्यदि तदा नष्टवस्तुनः लाभो नास्ति। यदि तमेव पापग्रहं शुभग्रहो बलवान् वीक्षेत् तदा अर्धालाभो भवति। अथव तस्य प्रतिनिधि र्वा सिध्यति। चिरकालाद्युदयगतं शुभग्रहः पश्यति चेत्तदा अद्यैव लाभो भवति नष्टवस्तुनः। उदये शुभे सति बलवत्पापदर्शनेन नश्यत इति वक्तव्यम्।

पूर्णचन्द्रः लग्नभावगतः जीवेन दृष्टः यदि वा सितेन स विनष्टस्य वस्तुनः लाभं प्रकरोति क्षिप्रमिति वाच्यम्। बलवान् शुभग्रहः लाभोपयातः तदानीमपि विनष्टस्य वस्तुनः क्षिप्रं लाभो भवति।

यो ग्रहो लग्नं पश्यति स स्वराशिस्वांशगतश्चेद् नष्टं द्रव्यं तत्रैवास्तीति वदेत्। पूर्णचन्द्रः लग्नशतः, लग्नगतः शुभो वा शीर्षोदय राशौ सौम्यनिरीक्षितचेत् नष्टस्य लाभम् आशु कुरुते। इत्थं नष्टप्रश्नविचारः कार्यः।

***

# प्रश्नावली

1. संक्षेपेण उत्तरं लिखित - 5 X 7 = 35

(1) अपहृतवस्तुनः दिक्परिज्ञानरीतिं स्पष्टयत।

(2) धात्वादिक्रमेण विविधनष्टद्रव्यचिन्तनक्रमं निरूपयत।

(3) चोराकृतेः चिन्तनप्रकारं वर्णयत।

(4) नष्ट द्रव्याप्तिचिन्तनक्रमं विलिखत।

(5) राशिभिः ज्ञापनीयवस्तुसंख्यां नष्टवस्तूनां वर्णाश्च के लेख्याः।

II विस्तरेण उत्तरं लिखित - 10 X 4 = 40

(1) मेषादिराशिप्रदेशस्य लक्षणानि कानि?

(2) कर्मभोगनाशधात्वादिचिन्तनं कथं कुर्यात्।

(3) ग्रहाणां रश्मिसंख्याः लेख्याः।

(4) चोरभावविशेषचिन्तनप्रकारं वर्णयत।

III प्रश्नद्वयस्य कृते निबन्धं रचयतः- 12½ X 2 = 25

(1) प्रश्नलग्नात् पृच्छकस्य कीदृक् प्रकारक प्रश्नेति प्रश्नभेदक्रमं निरूपयत।

(2) चोराणां नाम विज्ञानाय ग्रहराशिषु अक्षराणां सम्बन्धाकथन प्रकारं स्पष्टीकुरूत।

*******

**<u>श्रीः</u>**

## ॥ त्रिंशोऽध्यायः॥

## १.० अवतरणिका

अये छात्राः!

जातस्य जन्तोर्जनननोपकालः प्रनष्टे सति तत्कालः येन विधिाना अन्विश्यते तन्नष्टजातकम्। यस्य नरस्य आधानकालः जन्मकालो वा न ज्ञायते तस्य नरस्य शुभाशुभाप्तिं वक्तुं जन्मतिभ्यादिज्ञानं नष्टजातकविधिना करिष्यमाणप्रकारः प्रायः जातकग्रन्थेषु मिलति। अत एव आधान जन्मकालयोरपरिबोधे अर्थाद् अज्ञाते सति संपृच्छतः प्रश्नलग्नात् जन्म वदेदिति वराहमिहिराचार्योऽपि ब्रूते। किञ्च प्रसूतिकालज्ञानं यस्य नास्ति तस्य देहिनः जन्मकालज्ञानं नष्टाभिधानादपि नूनं सम्भवति। अतः अत्र ज्ञातमज्ञातं वा प्रष्टा स्वजन्मराशिं पृच्छति चेत् तस्य जन्मराशिं नक्षत्रं लग्नमतीतकालं च वक्तुं प्रस्तुतं प्रधाानं विषयं नष्टजातकम्।

**उद्देश्यानि** -

- **जन्मनक्षत्रान्वेषणप्रकारः नष्टजातकविधिना सूर्यगुरुलग्नानयनरीतिः**
- **नष्टजातके प्रकारान्तरेण नक्षत्रज्ञानविधिः**
- **जन्मराशेर्ज्ञानप्रकारः**
- **कृष्णीयशास्त्रोक्तजन्मलग्नचन्द्रयोश्च चिन्तनप्रकारः**
- **प्रकारान्तरेण नक्षत्रज्ञानप्रकारः**
- **जन्ममासज्ञानम्**
- **जन्ममासज्ञानाय अन्यविधिः**
- **गुरोः निसर्गसंख्याद्वारा वयोपरिज्ञानम्।**
- **स्पर्शलक्षणैः नक्षत्रपरिज्ञानम्**
- **प्रश्नावली**

**अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।**

## १.१ जन्मनक्षत्रान्वेषणप्रकारः

नष्टजातकप्रश्ने 49 (सप्तानां कृतिः) संख्यां एकां कूटसंख्यामित्यामनय्य प्रश्नारूढराशर्विहितसंख्यां पूर्वोक्तकूटसंख्यायाम् अपास्य शिष्टं सप्तभिः संङ्गुण्य त्रिघनेन भाजयेत्तदा शेषम् एकश्चेत् अश्विनी द्वयश्चेत् भरणी, त्रयश्चेत् कृत्तिका एवम् अग्रेऽपि ज्ञेयम्। इदं पृच्छकस्य जन्मनक्षत्रेति विज्ञेयम्। पूर्वोक्तप्रश्नारूढराशेर्विहितसंख्याः एताः सन्ति। तद्यथा प्रश्नारूढं मेषश्चेत् 12, वृषश्चेत् 5, मिथुनश्चेत् 10, कर्कटश्चेत् 3, सिंहश्चेत् 8, कन्याचेत् 1, तुलाचेत् 6, वृश्चिकश्चेत् 11, धनुश्चेत् 4, मकरश्चेत् 2, कुम्भश्चेत्- 9, मीनश्चेत् 7, इत्थं द्वादशराशेरारूढसंख्याः विज्ञेयाः।

## १.२ नष्टजातकविधिना सूर्यगुरुलग्नानयनरीतिः

यस्य जातकं नास्ति तस्य जन्मकुण्डल्याः निर्माणाय, आदौ जननकालिकगुरु कुत्र आसीदिति दृष्टव्यम्। अतः पूर्वोक्तकूटसंख्या सप्तानां कृतिः नाम '49' तः सप्त संख्याम् अपनीयते चेत् अवशिष्टसंख्या 42 कूटसंख्या भवति। इयं कूटसंख्या जीवस्यानयने सहायका भवति। जन्मकालिकसूर्यं ज्ञातुं पूर्वोक्तसप्तानां कृतिः या अस्ति तया संख्यया 14 संख्यां विशोध्य 35 कूटसंख्येति विभावयेत्। इत्थं कूटसंख्याया अनयनक्रमः विज्ञेयः। सूर्यस्य स्थितिं ज्ञातुं सूर्यस्य पूर्वानीतकूटसंख्यातः आरूढलग्नस्य कृते विहितसंख्याम् अपास्य सप्तभिः संगुण्य सप्तविंशतिसंख्यया भाजयेत्तदा लब्धिः सुर्यस्य भुक्तनक्षत्रसंख्या भवति। शेषेण सूर्यस्य वर्तमाननक्षत्रसंख्यां विजानीयात्। गुरोः जन्मकालिकस्थितिं ज्ञातुं बृहस्पतेः कृते विहितसंख्याः विशोघ्य शेषं सप्तभिः संगुण्य 27तः विभाजिते सति लब्धिः गुरोः भुक्तनक्षत्रम् । शेषं गुरोः वर्तमाननक्षत्रम्।

लग्नस्य कूटसंख्या 28तः आरूढलग्नस्य कृते विहितसंख्याम् अनिकृत्य सप्तभिः संगुण्य 27तः विभाजनेन या लब्धिः तद्गतलग्नम्। शेषं वर्तमानलग्नम् । इत्थं सूर्यगुरूलग्नानयनविधिः ज्ञेयः।

## १.३ नष्टजातके प्रकारान्तरेण नक्षत्रज्ञानविधिः

नष्टजातकप्रश्नकालिकं चन्द्रस्फुटं कृत्वा तच्चन्द्रस्फुटस्य वर्तमाननवांशकस्य गतघटीविघटीनां कृते नवभिः संगुण्य, गुणनफलं पञ्चभिः हरेत्तदा लब्धिः अश्विन्यादिगतनत्रसंख्या भवति। शेषं पृच्छकस्य जन्मर्क्षम् । अत्र आरूढलग्नस्यांशकस्य कलाविकलानां कृतेऽपि एवं क्रियते चेत् जन्मनक्षत्रमायातीति केचन वदन्ति।

## १.४ जन्मराशेर्ज्ञानप्रकारः

नष्टजातकप्रश्नकाले तत्र श्रूयमाण स्नुहि, अर्कपत्रम्, मेषः, मेषनिनदः, मेषस्य नाम, तद्वाचकशब्दः अजस्य चित्रं, तत्प्रतिमा, कम्बल-चेति एते मेषराशेः सूचक शकुनानि सन्ति। गोवृष-तच्चर्म-तदाकारः, धृतं लाङ्गूलं, शकटः गोवृषवाचकशब्दाः तृणाश्च वृषराशेः संसूचकशकुनानि प्रोक्तानि। वीणा, युगपद्स्थितौ स्त्रीपुरूषौ, गदा, शय्या, ताम्बूलं चेति एते मिथुनस्य सूचकाः। मृत्तिका, कर्कटः, जीर्णपर्णः, सलिलं च कर्कटराशेः सूचकलक्षणानि। सिंहः, व्याघ्रः तेषां कथाश्रवणं, तेषां शब्दश्रवणं, गजः, कुरङ्गः, वराहः, पूर्वोक्तिप्राणिनां चित्राणि प्रतिमाः तेषां नखाश्च एते सिंह राशेः सूचकानि नष्टजातक-प्रश्ने। कन्याः, नावः, जलप्रवाहेन दीपवत् दृश्यमाणस्थानं, पट्ट-वस्त्रादीनि च कन्याराशेः सूचकलक्षणानि। प्रश्नकाले विक्रेयवस्तूनि मानकरणप्रस्थरादिकं, तुलावार्ताः क्रयविक्रयसम्बन्धिनी सम्भाषाणानि, तुलाभृत् पुरूषस्यागमनम् एते तुलराशेः सूचकाः सन्ति। कीटः, सर्पः, विषवैद्यः, वृश्चिकः, तेषां चित्र प्रतिमाश्च वृश्चिकस्य सूचकाः। धनुर्धारी चापः अश्वरूपश्च पूर्वोक्तानां चित्रं वार्ता प्रतिमा च प्रश्नकाले दृष्टश्चेत् धनुषः सूचकः। एणः, कुरङ्गवर्गः, कुरङ्गचर्मश्रृङ्गप्रभृतयो मकरस्य संसूचकाः सन्ति। कुम्भः, कुलालः, अम्बुपात्रमखिलं च कूम्भस्य सूचकाः। मीनः, तद्वध साधनं, सकलं तोयं च मीनराशेर्ज्ञापकः। इत्थं मेषादि राशीनां पूर्वोक्तानि निमित्तानि अभिहितानि। यादृच्छिकत्वेन एतानि लक्षणानि विलोकितानि तान्येव ग्राह्यानि । नो इतराणि। कदाचित् तदुद्धेश्येन निहितानि वस्तूनि चेत् निमित्तानि न भवन्तीति भावः।

नष्टजातकप्रश्ने तत्कालोदयलग्नं, तत्पञ्चम राशिः, तन्नवमराशिश्चेति त्रयाणां मध्ये

यो अधिकबलयुतो राशिर्वर्तते तद् पृच्छकस्य जन्मराशिः। पूर्वोक्तानां त्रयाणां राशीनामपि बलं तुल्यबलञ्चेत् तत्सन्देहस्य परिहाराय पृच्छकः स्ववपुषि यद् स्थानं स्पृशति तद् तस्य जन्मराशिः। यदि प्रष्टा राशिस्थानं न स्पृशति तर्हि यस्मिन् दिशि अधिष्टितः सन् पृच्छति तद्दिशि अथवा तद्राशितः पञ्चम नवमराशौ जन्मराशिर्वर्तते। इदमपि अशक्यश्चेत् प्रश्नवचनप्राग् वर्णस्य कृते यः राशिः कथितो वर्तते तदेव जन्मराशिः।

**१.५ कृष्णीयशास्त्रोक्तजन्मलग्नचन्द्रयोश्च चिन्तनप्रकारः**

प्रष्टा दैवज्ञात् यस्मिन् राशौ स्थितःतमारूढराशिं ये ग्रहाः वीक्षेन्ते तेषां बलयुतस्य क्षेत्रं तद् जन्मर्क्षमिति वदेत्। पृच्छकस्थित आरूढराशिम् अवलोक्यमाणो ग्रहः ओजराशौ स्थितश्चेत् बली ग्रहस्य ओजराशिरेव जन्मराशिः। ग्रहवीक्षणरहितमारूढकेन्द्रगं बलयुक्तचेत् तस्मिन् राशौ भवेज्जन्म। तत्कालोदयलग्नं विलोक्यमाणेषु ग्रहेषु बलीग्रहस्य राशिः जन्मलग्नं भवेदिति वक्तव्यम्। चन्द्रराशेः कृतेऽपि पुर्वोक्तवत् ओजादिचिन्तनं कार्यम्। पुरूषराशिमारूढं पुरूषराशौ स्थिताः बहवो ग्रहाः वीक्षन्ते तत्र पुरूषराशौ जन्म। स्त्रीराशिगताः वीक्षन्ते चेत् स्त्रीराशौ जन्म।

**१.६ नक्षत्रज्ञानप्रकारः**

आरूढात् उदयलग्नं यावत् गणयेत्। गणनवशात् या संख्या मिलति तां संख्यां द्वाभ्यां संगुण्य रूपेण परिशोधयेत्। तदनन्तरम् अश्विनीतः प्रश्ननक्षत्रसंख्यां यावत् गणय्य तत्संख्यां पूर्वानीते रूपेणविशोधितसंख्यायां योजयेत्। पुनश्च सप्तविंशति संख्यया परिशोध्य शेषसंख्याम् अश्विनीतः गणयेत्तदा यन्नक्षत्रमायाति तन्नक्षत्रं पृच्छकस्य जन्मर्क्षमिति नष्टजातकविधौ विचिन्तयेत्। यद्वा प्रश्नकाले, दैवज्ञः पृच्छकश्च सम्मील्य जनाः कति सन्तीति गणयेत्। तत् संख्यायां त्रयेण संगुण्य सप्तविंशत्या भाजयेत्। शेषं च ज्ञात्वा प्रश्नलग्नं चरराशिश्चेत् अश्विनीतः स्थिरराशिश्चेत् मघ्यातः, उभयराशिश्चेत् मूलादितः गणयेत्तदा यन्नक्षत्रमायाति तन्नक्षत्रं पृच्छकस्य जन्मर्क्षेति आदिशेत्।

## १.७ जन्ममासज्ञानम्

आरूढात् षड्भावान्तर्गतो सूर्यो वर्तते चेत् पृच्छकस्य उदगयने जन्म। सप्तमभावत् द्वादशभावेषु यत्र क्वापि सूर्यो व्यवस्थितश्चेत् दक्षिणायने जन्म वदेत्। प्रश्नकालिके आरूढलग्ने एव सूर्यो अस्ति चेत् मिथुनमासे जननम्। आरूढात् द्वादशे सूर्यो व्यवस्थितश्चेत् कर्कटमासे जन्म। एकादशे चेत् अस्ति सिंहे, दशमे अस्ति चेत् कन्यामासे, नवमे चेत् तुलामासे, अष्टमे चेत् वृश्चिकमासे, सूर्यो सप्तमे वर्तते चेत् धनुर्मासे, सूर्ये षष्ठे चेत् मकरमासे, पञ्चमे चेत् कुम्भे, चतुर्थे चेत् मीने, तृतीये चेत् मेषे, द्वितीये चेत् वृषे च जननमिति व्युत्क्रमेण वाच्यम्।

अथवा, तत्कालोदयलग्नस्फुटं पञ्चदशभागाभ्यन्तरे वर्तते चेत् जातकस्य जन्म उत्तरायणे अभवदिति वाच्यम्। तत्कालोदयलग्नस्फुटं 15-तः 30-अंशाभ्यन्तरे विद्यते चेत् दक्षिणायने जन्म। यद्वा पृच्छकः प्रश्नकाले वामभागस्याङ्गं संस्पृशति चेत् दक्षिणायने जन्म, दक्षिणभागस्याङ्गं स्पृशति चेत् उत्तरायणे जन्म कथयेत्। अथ च दैवज्ञस्य प्रश्नकालिकश्वासगतिः यस्मिन् भागे वर्तते तस्मिन्नेव भागे पृच्छकोऽपि स्वाङ्गस्पर्शं करोति चेत् वामदक्षिणभेदेन क्रमशः दक्षिणायने उत्तरायणे च जन्म वाच्चम्।

## १.८ जन्ममासज्ञानाय अन्यः विधिः

प्रश्नलग्नं मेषश्चेत् वैशाखमासो जन्ममासः। वृषश्चेत् ज्येष्ठमासः, प्रश्नलग्नं मिथुनश्चेत् आषाढमासः, कर्कश्चेत् श्रावणमासः, सिंहश्चेत् भाद्रपदमासः , एवम् अग्रेऽपि ज्ञेयम्। प्रश्नलग्नं मीनश्चेत् अन्ते चैत्र मासः जन्ममासेति विज्ञेयः। ओजराशेर्लग्नं भवेत्, तल्लग्नं पुंग्रहाः पश्यन्ति चेत् शुक्लपक्षे जन्म वाच्यम्। युग्मराशेर्लग्नं भवेत्, स्त्रीग्रहयोदृष्टिः यदि तदुपरि स्यात्तदा कृष्णपक्षे जन्मेति आदिशेत्। आरूढेशस्य उच्चराशेर्नाथः यस्मिन् राशौ वर्तते तद्राश्याधिपो व्यवस्थितराशिः जातकस्य जन्मराशीति वदेत्। आरूढेशस्य नीचभवनेशो विद्यमानराशिः जन्मलग्नम्। प्रश्नकाले पृच्छकः उपविश्य पुनरूत्थितावस्थायां पृच्छति चेत् आरूढलग्नात् दशमराशिः जन्मराशिः, तिष्ठन् पृच्छति चेत् तत्कालीकलग्नमेव जन्मलग्नम्। पृच्छकःशयन् पृच्छति चेत् आरूढलग्नात् चतुर्थराशिः जन्मलग्नम्। पृच्छकः प्रश्नकाले तटस्थावस्थायां वर्तते चेत् अन्यलक्षणैश्च लग्नराशेः चिन्तनं कुर्यात्।

## १.९ गुरोः निसर्गसंख्या द्वारा वयोपरिज्ञानम्

प्रश्नलग्नम् आद्यद्रेक्काणे वर्तते चेत् प्रश्नकुण्डल्यां गुरूः व्यवस्थितराशिरेव जननाकालिकगुरोरपि राशिरिति भाव्यम्। प्रश्ने मध्यद्रेक्कणो उदितश्चेत् गुरूः वर्तमानस्थानात् पञ्चमस्थाने जन्मकालिकगुरूः वर्तते । अन्त्यद्रेक्काणं प्रश्नलग्ने उदीयमानमस्ति चेत् गुरूः विद्यमानस्थानात् नवमस्थाने जन्मकालिकगुरू रासीदिति वाच्यः।

अत्र प्रकारान्तरेणापि गुरोः सकाशाद् निसर्गसंख्याद्वारेण वयोपरिज्ञानं कर्तुं शक्यते। तद्यथा- प्रश्नकालिक-उदयलग्नस्य द्वादशांशराशौ जातकस्य जन्मकालिकगुरुर्वर्ततेति वदेत्। परन्तु तत्र गुरोः तावत् कतिवारं परिवर्तनमभवत् इति ज्ञानाय उदयलग्ने व्यवस्थितस्य ग्रहस्य नैसर्गिकदशासंख्यातः ज्ञेयं भवति। निसर्गदशाः चन्द्रस्य 1, कुजस्य .2, बुधस्य 3, शुक्रस्य-4, गुरोः -5, सूर्यस्य-6, शनैश्च-7, एते प्रोक्ताः सन्ति। लग्ने विद्यमानग्रहस्य निसर्गदशासंख्याप्रमाणं यावान् अस्ति तावान् भचक्रभ्रमणं गुरुः कृतवान् इति ज्ञेयम्। गुरोः तावत् भचक्रभ्रमणस्य कृते अपेक्षितः कालः 12 वर्षाणि। लग्ने एकापेक्षया बहवो ग्रहा स्युः तर्हि बलीग्रहस्य निसर्गदशासंख्यां स्वीकुर्यात्। उदाहरणार्थम्- लग्ने विद्यमानस्य चन्द्रस्य निसर्ग दशासंख्या वर्तते एकम्। अतः गुरोः एक-भचक्रभ्रमणकलाभ्यान्तरे एव जातकस्य वयः वर्तते इति भाव्यम्। लग्ने कुजः व्यवस्थितश्चेत् 24 वर्षाणि, शनि लग्ने अस्ति चेत् 84 वर्षाणि पृच्छकस्य वयः। लग्ने ग्रहाभावे सति लग्नाधिपतेः निसर्गदशासंख्याप्रमाणं यावत् भचक्रभ्रमणं गुरुः कृतवान् वर्ततेति ज्ञातव्यम्। उदाहरणार्थं लग्नाधिपः शुक्रो यदि स्यात् तस्य निसर्गसंख्या-4, अतः मच. चतुर्थपर्यायेगुरुस्तीति ज्ञात्वा 48 वर्षाणि पृच्छकस्य वयोमानं वर्ततेति ब्रूयात्। यद्वा दृष्टुः वपुं निरीक्ष्य वयसो मानं बुधैः कल्पनीयम्।

## १.१० स्पर्शलक्षणैः नक्षत्रपरिज्ञानम्

नष्टजातकविधौ प्रश्नकाले प्रष्टुः स्पर्शलक्षणेन जन्मर्क्षज्ञानं कोष्टकद्वारा एव सूचयितुं शक्यते। तद्यथा -

| अङ्गानि | नक्षत्राणि |
|---|---|
| मस्तकम् | कृत्तिका |
| फालम् | रोहिणी |
| भुवौ | मृगशीर्षम् |
| कर्णः | आर्द्रा |
| कपोलम् | पुनर्वसुः |
| हनुः | पुष्यः |
| दन्ताः | आश्लेषा |
| कण्ठः | मघा |
| दक्षिणभुजः | पूर्वफल्गुनी |
| वामभुजः | उत्तरफल्गुनी |
| हस्तौ | हस्ता |
| अङ्गुलानि | चित्रा |
| नखाः | स्वाती |
| वक्षस्थलम् | विशाखा |
| हृदयम् | अनुराधा |
| कुचौ | ज्येष्टा |
| उदरः | मूला |
| उदरस्य दक्षिणपार्श्वः | पूर्वाषाढा |
| उदरस्य वामपार्श्वः | उत्तराषाढा |
| नाभिः | श्रवणम् |
| कटिप्रदेशः | धनिष्टा |
| गुह्यस्थानम् | शतभिषक् |
| दक्षिणोरूः | पूर्वाभाद्रा |
| वामोरूः | उत्तराभाद्रा |
| जानुयुगलम् | रेवती |
| जंघाद्वयम् | अश्विनी |
| पादद्वयम् | भरणी |

प्रश्नकाले पूर्वोक्ततत्तद् अङ्गस्पर्शेन जन्मर्क्षं ज्ञातुम् अयं क्रमः विहितः। यदि पृच्छकेन सुस्पष्टतया पूर्वोक्तानाम् अङ्गानां संस्पर्शः प्रश्नकाले क्रियते चेत् जन्मनक्षत्रपरिज्ञानाय अयमेव विधिः ग्राह्यः। यदि अस्पष्टस्पर्शः विलोक्यते तदा अन्यानि लक्षणानि संयोज्य जन्मभं वदेत्।

***

# प्रश्नावली

1. संक्षेपेण उत्तरं लिखित - 5 x 7 = 35

(1) जन्मनक्षत्रान्वेषणप्रकारं निरूपयत।

(2) कृष्णीयशास्त्रोक्तरीत्या जन्मलग्नचन्द्रयोश्च चिन्तनविधिं वर्णयत।

(3) नष्टजातकविधे औचित्यं किम्।

(4) प्रकारान्तरेण जन्ममासज्ञानप्रकारं वर्णयत।

(5) अज्ञातजातकस्य सूर्यगुरुलग्नानपरीतिं प्रदर्शयत।

II विस्तरेण उत्तरं लिखित - 10 x 4 = 40

(1) नष्टजातकप्रश्ने जन्मराशेर्ज्ञानप्रकारं वर्णयत।

(2) नष्टजातकविधौ प्रकारान्तरेण नक्षत्रज्ञानरितिं प्रदर्शयत।

(3) आरूढलग्नात् जन्मर्क्षज्ञानविधिं स्पष्टयत।

(4) नष्टजातकविधौ प्रकारान्तरेण नक्षत्रज्ञानरीतिं प्रदर्शयत।

III प्रश्नद्वयस्य कृते निबन्धं रचयत:-

(1) स्पर्शलक्षणैः नक्षत्रपरिज्ञानक्रमं विशदयत

(2) गुरोः निसर्गसंख्याद्वारा वपसः परिज्ञानं कथं क्रियतेति विशदीकुरुत।

*******

# श्रीः

# ॥ एकत्रिंशोऽध्यायः॥
# १.० अवतरणिका

अये छात्राः!

सृष्टेः प्रारम्भकालतः जन्मजन्मान्तरीयसंस्कारैर्वशात् मानवः शैवशवास्थातः मृत्युपर्यन्तं स्वप्नमवलोकयति। अतः अस्य स्वप्नस्य विषये बहवो विचार विमर्शाः, तर्क-वितर्काश्च निरन्तरं प्रचलितं दृश्यते। वेद-उपनिषद्-आरण्यक-ब्राह्मणग्रन्थेषु, दर्शन-पुराण-इतिहास-काव्य-साहित्य-ज्योतिष प्रभृतिग्रन्थेषु, चरक-सुश्रुत-वाग्भटादिवैद्यकग्रन्थेषु च ऋषयः, मुनय, आचार्याश्च अस्य विषये बहुधाा वर्णयामासुः। मानवस्य जाग्रत्-स्वप्न-स्वषुप्त्यादि अवस्थात्रयं निरूपितं शास्त्रे। तासु अवस्थासु निद्रा विमुक्तः पुरुषः संसारस्य समस्तकार्याकलापानां रसास्वादनं करोति। तदवस्था जाग्रदस्थेति कथ्यते। यदा बाह्यसंसारत इन्द्रियाणां सम्बन्धविच्छेदो भवति किञ्च मनस उपरमोऽपि सम्भवति, तदवस्था सुषुप्तिनाम्ना व्यवहरिष्यते। यदा च बाह्यजगता विच्छेदितो मनः अन्तर्लीलायां प्रवृत्तो भवति तत्कृते स्वप्नावस्थेति संज्ञा प्रदत्ता। अस्य स्वप्नस्य फलं दुष्फलं सुफलञ्चेति परिणामो जायतेत्यनेन कारणेन तत्कृते दुःस्वप्नः सुस्वप्नो वा कथ्यते।

शाब्दिकव्युत्पत्या स्वप्नो नाम कः इति जिज्ञासायां सुप्यते इति स्वप्नः। स्वप् धातोः भावार्थे स्वपोनन् इत्थनेन सूत्रेण नन् प्रत्ययः कृते सति नकारानुबन्धालोपेन स्वप्नेति रूपं सिद्धो भवति। स्वप्नो निद्रा इति सिद्धान्त कौमुद्याम् उणादौ, स्यान्निद्रा शयनं स्वापः स्पप्नः सेवेश इत्यपि अमरः।

स्वप्नो नाम कः? तस्य स्वरूपं किम्? कश्चित् पश्यति स्वप्नमधिकम्। कश्चिच्च्वपश्यति न्यूनम्। केचित् पश्यन्ति स्वप्नान् सततम्, अन्ये पश्यन्ति कदाचित्। स्वप्नानां सामान्येन प्रभावः खलु दृश्यते एव। अत अस्मिन् अध्याये पूर्वोक्त विषयाणां चर्चा क्रियते।

दशाफलं पुरुषेणावश्यं भोक्तव्यमेव। किन्तु बलरहितैः ग्रहैः यत्फलमुक्तं तत् स्वप्नचिन्तासु परिणमति। अतः प्रारब्धाजन्यशुभाशुभफलानि स्वप्नमाध्यमेन संसूचिताः भवन्तीति स्पष्टो भवति। उपक्रमेऽस्मिन् दृष्ट-श्रुत-अनुभूत-भाविक-दोषजादि विविधाप्रकारकस्पप्नानां भेदाः किञ्च स्वप्नजन्यशुभा शुभफलानि कथं चिन्तनीयानि इति अत्र विचर्यमाणो प्रधानः विषयः।

**उद्देश्यानि -**

* **स्वप्नप्रश्नविचारक्रमः**
* **लग्नगतमेषादिराशिसूचकस्वप्नाः**
* **मृत्युसूचकस्वप्नः महारोगसूचकस्वप्नश्च**
* **उन्मादापस्मारकारकस्वप्नः शीघ्रमृत्युकारकस्वप्नश्च**
* **अनिष्टकारकस्वप्नाः तेषां फलानि च**
* **सप्तप्रकारकस्वप्नभेदाः**
* **प्रायश्चित्तेन दुःस्वप्नफलोपशमनोपायः**
* **शुभफलसूचकसुस्वप्नाः**
* **अनूकगतिजस्वप्नाः**
* **स्वप्नस्य कालभेदाः स्वप्नफलपाककालश्च**
* **शुभफलप्रदस्वप्नविशेषाः**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते

## १.१ स्वप्नप्रश्नविचारक्रमः

दैवज्ञमुपेत्य पृच्छकः मया स्वप्नमवलोकितो वा? विलोकितश्चेत् कः स्वप्नः। तस्य फलविशेषः कः? इत्यादिप्रश्नान् पृच्छति चेत् तत्प्रश्नस्य समाधानं कर्तुं अत्र विधिः वर्ण्यते। तद्यथा- स्वप्नप्रश्नका लिकलग्ने सूर्यः, तल्लग्नस्योपरि हिमांशोः दृष्टिः स्यात्, लग्नात् सप्तभावे सिंहराशिरस्तिचेत् बहुसमयं यावत् स्वप्नो दृष्टः, तत्र चरराशिगलग्नञ्चेत् अल्पकालं

यावत् स्वप्नो दृष्टः स्थिरराशिश्चेत् उभयश्चेत् मध्यमकालः। लग्नाधिपतिना स्वप्नस्य समयः वक्तव्यः। लग्नाधिपः चन्द्रश्चेत् अल्पकालमेव दृष्टः स्वप्नः। सूर्यादीनां पूर्वोक्तनिसर्गसंख्यानुसारेण क्षण विघटी-घट्यादीश्च विचिन्त्य कर्तव्यः।

स्वप्नप्रश्ने आरूढलग्ने एव सूर्यो व्यवस्थितश्चेत् प्रदीप्तो अग्निः रक्तवस्त्रं च स्वप्ने दृष्टेति कथयेत्। लग्नस्योपरि चन्द्रस्य दृष्टिः वर्तते चेत् स्त्री श्वेतवस्त्रश्वेतपुष्पप्रभृतयोः दृष्टाः। प्रश्नलग्ने कुजो विद्यमानश्चेत् सुवर्ण-विद्रुम-रक्तस्राव-रक्तेन आद्रमांसश्च स्वप्ने विलोकितमिति आदिशेत्। लग्ने बुधो व्यवस्थितश्चेत् आकाशगमनं, गुरूरस्ति चेत् बन्ध समागमः, शुक्रो अस्ति चेत् जलसम्बन्धं जले सन्तरणं च वदेत्। लग्नस्थेन शनिना तुङ्गारोहः पर्वतश्च दृष्टामिति निर्दिशेत्। लग्नगतग्रहः रिपुनीचर्क्षगतश्चेत् दुःस्वप्नो विलोकितः। लग्ने द्विग्रहयोगो वर्तते चेत् मिश्रस्वप्नः दृष्टेति प्रष्टुः कृते वदेत्। मौढ्यगतोग्रहः लग्ने विद्यमानश्चेत् भग्नं स्वप्नमवलोकितमिति प्रवदेत्। इत्थं स्वप्न प्रश्नविचारः कार्यः।

## १.२ लग्नगतमेषादिराशिसूचकस्वप्नाः

**मेषाद्यारूढराशेः सूचकस्वप्नाः अधोल्लिखित कोष्टकद्वारा एवं सूचिताः सन्ति-**

| **राशयः** | **स्वप्नाः** |
|---|---|
| मेषः | देवालयः देवगृहस्य भागाश्च दृष्टाः |
| वृषः | देवानां विग्रहाः विलोकिताः |
| मिथुनः | ब्राह्मणाः, तपस्विनः तेषां च गतिविधिसम्बन्धिनः |
| कर्कः | तृणाः, सस्यानि, क्षेत्रात् तृणाद्यानयनं च दृष्टः। |
| सिंहः | किरातेक्षणं यद्वा सौरिभदर्शनम् |
| कन्या | युवतिभिः सङ्गमः, काचित् स्त्रिया सह सम्भाषणं च |
| तुला | सुवर्णस्य आभूषणानि, पट्टाभिषेकः, वणिक्पतिः, व्यापारसम्बन्धीनि सर्वलक्षणानि च |
| वृश्चिकः | पुष्पात् पुष्पे गम्यमाणभृङ्गाः विषवस्तूनि, विषजन्तवश्च दृष्टाः स्वप्ने |
| धनुः | चर्माणि, चर्मधारीपुरुषः, उद्याने पुष्पाणि फलानि, फलानां पतनं च |
| मकरः | युगपद् स्थितौ स्त्रीपुरुषौ, स्त्रीपुरुषयोः युगपदेव गमनं, तयोः सम्भाषणं च विलोकितम्। |
| कुम्भः | बृहदाकारेण स्थितं दर्पणं मुकुरे स्वप्रतिबिम्बावलोकनं च दृष्टं स्वप्ने |
| मीनः | समुद्रस्य तरङ्गः, सुवर्णं समुद्रस्नानं च अवलोकितं स्वप्ने |

स्वप्नप्रश्ने उदयलग्नम् आरूढलग्नं, छत्रराशि:, चतुर्थभाव: तद्भावेस्थितग्रहैश्च सकाशाद् स्वप्नं चिन्तयेत्।

## १.३ मृत्युसूचकस्वप्न: महारोगसूचकस्वप्नश्च

स्वप्ने य: मर्त्य: प्रेतै: सह मध्यं पिबन् शुनकै आकृष्यते स शीघ्रं ज्वररूपेण मृत्युना नीयते। स्वप्ने रक्त मालया विभूषित: रक्ताम्बरधर: य: हसन् स्त्रिया ह्रतो विलोकयति स: रक्तपित्तरोगेण मृतो भवति। महिष-अश्व-वराह-गर्दभादीन् आरूह्य याम्यां दिशं य: प्रयाति तस्य राजयक्ष्मणा मृत्यु: सम्भवति। लता-कण्टकिनी-वंश-तालो वा ह्रदि जायमानं स्वप्ने दृष्टश्चेत् गुल्मरोगो भवति। द्रवपदार्था: घृततैल-नवनीतादिचाण्डालै: सह य: पिबेत् स्वप्ने स: प्रमेहेण नश्यति।

## १.४ उन्मादापस्मारकारकस्वप्न: शीघ्रमृत्युकारक स्वप्नश्च

स्वप्ने राक्षसै सह नृत्यन् जले य: निमज्जति स उन्मादरोगेण मरिष्यति। य: मर्त्य: प्रेतेन सह नृत्यन् तदेव प्रेतन नीयमानम् इव अवलोकयति स अपस्माररोगेण मृतो भवति। खरोष्ट्रमार्जाल कपि- शार्दूल-सूकर-शृगाल-प्रभृतीन् आरुह्य करिष्यमाणप्रयाणस्य स्वप्न: तस्य अकारणेन मृत्युकारको भवति।

## १.५ अनिष्टकारकस्वप्ना:

अधोल्लिखितवत् अनिष्टकारकस्वप्ना: ज्ञेया:। सूर्यचन्द्रयो: पतनदर्शनं दृष्टिनाशाय भवति। मूध्नि वंशलतादीनां समुत्पत्ति:, विहगानां मस्तके उपवेशनं, मुण्डनं, काकगृधाद्यै: परिवारणं, प्रेत:, पिशाच: स्त्री, गोमांसभक्षक:, गोमासभक्षकाणां सङ्गम: वंश:, कण्टक:, लता, तृण:, श्मशानं स्मशानस्य समीपे शयनं, शरीरोपरि पांसुभस्मनो: पतनं, जलपङ्कादौ निमज्जनं, शीघ्रेणस्रोतसाह्रति: नृत्य-वाद्य-सङ्गीतादिकरणव्यापार:, रक्तक्षक्-रक्तवस्त्रध ारणं, वयोवृद्धि:, अङ्गवृद्धि, अभ्यङ्गस्नानं, विवाह: श्मश्रुकर्माणि, पक्वान्न भोजनं, स्नेहवस्तूनां

भक्षणं, मद्यसेवनं, प्रच्छर्दनं, विरेचनं, हिरण्यलोहयोर्लाभः, युद्धं, बन्धनं, पराजय, उपानद्वयस्य नाशः, पादचर्मणोः प्रपातः, भृशं हर्षः, प्रकुपितैः पित्रभिश्चावभर्त्सनं, दीपः ग्रहनक्षत्राणि, दन्ताः देवविग्रहः, नेत्रयोः पतनं, तयोर्नाशः पर्वतस्य भेदनं, रक्तकुसुमानां कानने प्रवेशः, पापकर्म प्रचलिष्यमाणस्थाने प्रवेशः, जनन्यागमनं, अन्धाकारे प्रवेशः, प्रासादशैलादिना पतनं, मत्स्येन ग्रहणं, काषायवस्त्रधारिणां, असौम्यानां, नग्नानां, दण्डधारिणां, रक्ताक्षाणां कृष्णानां च दर्शनं नेष्टम्।

एतदुक्तम्-

**सूर्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम्।**
**मूर्ध्निवंशलतादीनां सम्भवो वयसां तथा॥**
**निलयो मुण्डताकाकगृध्राद्यैः परिवारणम्।**
**तथाप्रेतपिशाच स्त्रीद्रमिलान्ध्रगवाशनैः॥**
**सगोवेत्रलतावंशतृणकण्टकसङ्कटे।**
**श्वभ्रस्मशानशयनं पतनं पांसुभस्मनोः॥**
**मज्जनं जलपङ्काद्यैः शीघ्रेण स्रोतसाहृतिः।**
**नृत्यवादीत्र गीतानि रक्तस्रग्वस्त्रधारणम्॥**
**वयोङ्गवृद्धिरभ्यङ्गो विवाहश्मश्रुकर्म च।**
**पक्वान्नस्नेहमद्याशः प्रच्छर्दनविरेचने॥**
**हिरण्यलोहयोर्लाभः कलिर्बन्धापराजयौ।**
**उपानद्युगनाशश्च प्रपातः पादचर्मणोः॥**
**हर्षोभृशं प्रकुपितैः पितृभिश्चावभर्त्सनम्।**
**प्रदीपग्रहनक्षत्रदन्तदैवत चक्षुषाम्॥**
**पतनं वा विनाशो वा भेदनं पर्वतस्य वा।**
**कानने रक्तकुसुमे पापकर्म निवेशने॥**
**चितान्धाकार सम्बाधो जनन्यां च प्रवेशनम्।**
**पातः प्रासाद-शैलादेः मत्स्येन ग्रहणं तथा॥**

**काषायिणा-मसौम्यानां नग्नानां दण्डधारिणाम्।**
**रक्ताक्षाणां च कृष्णानां दर्शनं जातुनेष्यते॥**

### १.६ सप्तप्रकारकस्वप्नभेदाः

(1) दृष्टः (2) श्रुतः (3) अनुभूतः (4) प्रार्थितः
(5) कल्पितः (6) भावजः (7) दोषणश्चेति सप्तप्रकारकस्वप्नाः सन्ति।

१ **दृष्टः** - दृष्टो नाम या घटना जाग्रदवस्थायां दिने विलोकिता सा एव रात्रौ स्वप्नावस्थायां परिदृश्यते चेत् स स्वप्नः दृष्टेति नाम्ना उच्यते।

२ **श्रुतः** - यः विषयः श्रुतपूर्वमस्ति तदेव रात्रौ स्वप्नावस्थायां श्रूयते तादृशस्वप्नः श्रुतशब्देन अभिधीयते।

३ **अनुभूतः** - जाग्रदवस्थायां जिह्वाघ्राणादि इन्द्रियै अनुभूताः विषयाः पुनः स्वप्ने संदृक्ष्यमाणाः स्युः।

४ **प्रार्थितः** - जाग्रदस्थायां मनुजेन येषां पदार्थानां प्राप्तये सर्वदा प्रयतते तेषां सम्प्राप्तिः स्वप्ने सम्भवति तर्हि स स्वप्नः प्रार्थितेति प्रोच्यते।

५ **कल्पितः** - कल्पितस्वप्ने जाग्रदवस्थायां यासां कल्पनां क्रियते तासामेव स्वप्नावस्थायाम् अवलोकनं भवति।

६ **भाविकः** - भाविकस्वप्ने पूर्वं नानुभूतः, न श्रुतः न दृष्टश्च, तादृशस्वप्नानां गणना भवति। भाविकस्वप्नाः भविष्यत्फलसंसूचकाः सन्ति।

७ **दोषजः** - वातपित्तकफश्चेति त्रिदोषविकृतेर्वशात् जनिष्यमाणस्वप्नाः दोषजस्वप्नाः सन्ति। पूर्वोक्त सप्तविधस्वप्नेषु दृष्ट-श्रुत-अनुभूत-प्रार्थित-कल्पितश्चेति पञ्चविधस्वप्नाः शुभाशुभफलसूचकाः न सन्ति। त्रिदोशजनित स्वप्ना अपि निष्फलाः भवन्ति। दिवा विलोक्यमाणस्वप्नस्यापि फलं नास्ति। किञ्च विस्मृतस्वप्नस्यापि फलहीनत्वमुक्तम्। अतिदीर्धास्वप्न अतिह्रस्वस्वप्नयोश्चापि फलं नास्ति। रात्रौ पञ्चदशघटेराभ्यन्तरे दृष्टः

स्वप्नः चिरकालानन्तरं फलप्रदो भवति। एकैव भाविजस्वप्नः शुभाशुभपुलप्रदः। प्रभातसमये अवलोकिताः स्वप्ना एव सद्योफलसूचकाः। स्वप्नालोकनानन्तरं पुनः स्वापः कृतश्चेत् तस्य फलं नास्ति। स्वप्नावलोकनानन्तरं पुनः निद्रा न क्रियते चेत् तदानीमेव स्वप्नफलावाप्तिः भवति। परन्तु निद्रायाः नन्तरं कस्यापि समीपे स्वप्नस्य विषये वक्ष्यमाणसमये तद् प्रतीपवचनै अनुपहतश्चेत् स्वप्नस्य फलं किञ्चिन्यूनं भवतीति मन्तव्यम्।

### १.७ प्रायश्चित्तेन दुःस्वप्नफलोपशमनोपायः

दुःस्वप्नावलोकनवशात् जायमानपापफलस्य नाशाय तत्तद्कृते विहितदानजपहोमादिभिः पापोऽल्पतां याति अथवा अल्पफलप्रदो भवति। एकं अकल्याणकरं दःस्वप्नमवलोक्य पुनः पश्येद्यदि कल्याणकरं सुस्वप्नं तर्हि दुःस्वप्नस्य फलं नोपलभ्यते। अस्य वेपरीत्येन यदि कल्याणकरस्वप्नमवलोक्य दुःस्वप्नः दृष्टश्चेत् तस्यैव दुःस्वप्नस्य दोषदफलं लभ्यते।

### १.८ शुभफलसूचकसुस्वप्नाः

अधो निर्दिष्टवत् शुभफुलसूचकस्वप्नाः ज्ञेयाः सन्ति। देवताः, ब्राह्मणाः, गावः वृषाः जीवित सुहृदः, नृपाः साधवः यशस्विनः, प्रज्वलिताग्नयः, स्वच्छजलाशयाः कन्याः, कुमारकाः, गौरान्, शुक्लवस्त्र धारिणः, सुतेजसायुताः, स्वतेजसासमन्तात् रूधिरोक्षितनवो राक्षसाः, छत्राणि, दर्पणानि, विषस्य पात्रणि, मांसाः, श्वेतपुष्पाणि, श्वेतवस्त्राणि अमेध्यलेपनानि पर्वताः, फलवृक्षाः, सिंहाः, गजाः मानवाः, गजानाम आरोहणानि, पशूनाम् आरोहणानि नदीनां समुद्रानाञ्च तरणानि पूर्वोत्तरेण प्रयाणानि, अगम्यस्थाने गमनानि, मृतयः, सम्बन्धात् निम्नतयः, देवै पित्र भिश्चाभिनन्दनानि, रोदनानि, पतनानि, शत्रूणाम् अवमर्दनानि च एते स्वप्ने दृष्टानि स्युः तर्हि आयुरारोग्यसम्पत्प्रदाः स्युः।

एतदुक्तम्-

**''देवान् द्विजान् गोवृषभान् जीवत्सुहृदोनृपान्।**
**साधून् यशस्विनोवह्निमिद्धं स्वच्छान् जलाशयान्॥**
**कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतेजसः।**
**नराशनं दीप्ततनुं समान्ताद्रुधिरोक्षितम्।**

**यः पश्येल्लभते यो वा छत्रदर्शविषामिषम्॥**
**शुक्लाः सुमनोवस्त्रममेद्यालेपनं फलम्।**
**शैलप्रासादसफलवृक्षसिंहनरद्विपान्॥**
**आरोहेद्गोश्वयानं च तरेन्नदह्रदोदधीन्।**
**पूर्वोत्तरेण गमनमगम्यं गमनं मृतिः।**
**सम्बन्धन्निस्प्रतिर्देवैः पित्रभिश्चाभिनन्दनम्।**
**रोदनं पतितोत्थानं द्विषतां चावमर्दनम्।**
**यस्यस्यादायुरारोग्यं वित्तं च बहुशोश्नुते॥''**

## १.९ अनूकगतिजस्वप्नाः -

आयुषः भागत्रयं कृत्वा आदिमभागे बाल्यकाले विलोक्यमाणस्वप्नानां कृते अनूकस्वप्नेति नाम। विलोक्यमाणावशिष्टभागद्वयस्य स्वप्नस्य कृते गतिजस्वप्नेति प्रोचुः। पूर्वोक्तस्वप्नान् विहाय वातपित्तकफादिभिर्जनिष्यमाणस्वप्नस्य कृते त्रिदोषजनितस्वप्नेति ऊचुः। ग्रहगोचरफलवशात् जायमानस्वप्नः, दशाफलैर्वशात् सञ्जायमानस्वप्नः, मनोचिन्तितस्वप्नः, स्मृतिसिद्धस्वप्नः, आभिचारादिशत्रुकृत्यजनितस्वप्नः, बाधाकारकभूतादिजनितस्वप्नश्चेति स्वप्ने सप्त भेदाः सन्ति। अनूकस्वप्ने गतजन्मनः विचाराणाम् अनुबन्धाः मुख्यानुयायिनः सन्ति। गतिजस्वप्ने आगामिजन्मनः भविष्यत्फलविचारोऽपि आयाति। इत्थम् अनूकगतिजस्वप्नयोः सप्तभेदाः ज्ञेयाः। वातधातुविशेषस्य प्रकोपात् वृक्षारोहण तुङ्गस्थलारोहण अम्बरोल्लंघनप्रभृतयो स्वप्नाः पतन्ति।

पित्तधातुप्रकोपजन्यस्वप्ने तावत् स्वर्णरत्नमाला-सूर्य-अग्निप्रभृतीनि प्रकाशकवस्तूनि विलोक्यन्ते। कफाधिक्यधातुजन्यस्वप्ने चन्द्र-नक्षत्र-श्वेतपुष्प-सरित्-कमल-अम्बुविलंघनप्रभृति स्वप्नाः परिदृश्यन्ते।

## १.१० स्वप्नस्य कालभेदा: स्वप्नफलपाककालश्च

रात्रे: भागत्रयं क्रियते चेत् एकैकस्य भागस्य कृते दशदशघटिका: भवेयु:। वर्षर्तौ वातप्रकोपेन रात्रौ अन्तिम दशघटीनां समये प्राय: बहवो स्वप्ना: पतन्ति। शरद्रर्तौ पित्तप्रकोपात् रात्रे मध्यभागे स्वप्ना: पतन्ति आधिक्येन। वसन्तर्तौ कफप्रकोपात् रात्रे: प्रथमभागे स्वप्ना: पतन्ति। सन्निपाते सति, अर्थाद् त्रिदोषवशात् सर्वदा रात्रौ साधारणेन एकप्रकारकस्वप्ना: विलोक्यमाणा: भवन्ति।

दशाफलं पुरुषेणावश्यं भोक्तव्यम्। बलरहितै: ग्रहै: यत्फलमुक्तं तत् स्वप्नचिन्तासु परिणमति। अत: ग्रहदशाजन्यस्वप्ना: ग्रहगोचरजन्यस्वप्नाश्च न भावीफलसूचका:। चिन्ताजन्यदृष्टजन्यस्वप्नयो: फलं नास्ति। उपद्रवादिभि: बाधाादिभिश्च विलोक्यमाणस्वप्ना: भीभत्सरूपेण आगम्यमाणस्वप्ना: सन्ति। देवयोनिपीडाजन्यस्वप्ना: पित्तदोषजनिता: सन्ति। पूर्वोक्तेषु स्वप्नेषु पूर्वजन्मबन्धात्, चिन्तावशात्, ग्रहगोचरवशात्, परिदृश्यमाणस्वप्नस्य, त्रिदोषजनितस्वप्नस्य, दृष्टफलजनितस्वप्नस्य, अग्रह जनितस्वप्नस्य,द्यु: दृष्टस्वप्नस्य च जायमानं फलं निष्फलमिति भाव्यम्। अन्यत्र अनेकलोकजनितविचारैश्च स्वप्नविशेषस्य सदसत्फलतर्कणं कर्तव्यम्।

केचन स्वप्ना: निद्रायां स्पष्टतया प्रत्यक्षवद् विलोक्यन्ते परन्तु अन्ते जाग्रदस्थायां स्फुटतया स्फुरन्ति। तादृशस्वप्नानां सदसत्फलावाप्ति: अवक्यं भवति। अत: तेषां काल: अत्र उच्यते तद्यथा- रात्रे: प्रथमयामे संदृश्यमाणस्वप्नानां शुभाशुभफलं वत्सरान्तमिति ज्ञेयम्। द्वितीययामे विलोक्यमाणस्वप्ना: षाण्मासाभ्यन्तरे फलप्रदायका:, तृतीययामे संदृश्यमाणस्वप्ना: मासत्रयाभ्यन्तरे फलप्रदा: भवन्ति। चतुर्थयामस्य स्वप्नानां फलं मासाभ्यन्तरे, एवं चिन्तनीयम्। प्रभातसमये संदृष्टा: स्वप्ना: सद्य: फलप्रदा: सन्ति।

## १.११ शुभफलप्रदस्वप्नविशेषाः-

| स्वप्नाः | फलानि |
|---|---|
| ब्राह्मणाः, मदोन्मत्ताः रूधिरसेवनानि च | ब्राह्मणानां कृते दृष्टश्चेत् विद्यालाभः अन्यजातीयानां कृते धनलाभः |
| यः स्वप्ने राज्ञ-गज-हय-स्वर्ण-वृषभ-गो- रोगिणं पुरुषं च पश्यति | सः ईत्सितं लभते। राजा एतादृशं स्वप्नं पश्यति चेत् शीघ्रं तस्य राज्यलब्धिः भवति। |
| चामर-चन्दन-शङ्ख-मौक्तिक-धन-उत्पल-जातिकुसुमानि च दृष्टश्चेत् ..... | धनलाभः |
| स्वप्ने जलुकायाः मधुमक्षिकायाश्च दर्शनं यस्य स्यात् | तस्य अपत्यलाभः, धनप्राप्तिश्च भवति |
| देवालयस्य प्रासादोपरि आरोहणम् सरोवरस्य मध्ये मलिने पङ्कजपत्रे यः मनुजः पायसं सेवति | निकृष्टकुले जातस्यापि राज्यकृद् भवति सः महतीं विद्यां महाजनमान्यश्च भवति |
| यः निगलेन बद्धः, अन्त्रै पाशाद्यै बध्यमानो विलोकयति | स अचिरात् आत्मजं लभते। स्थिरस्थानप्राप्ति ससुखं च प्राप्नोति। |
| स्वप्ने यः आसन-शयनसाधन-गृह-स्वशरीर- निजयानं च ज्वलितं पश्यति | सः मनुज अचिरेण धनमाप्नुयात्। |
| स्वप्ने चक्रवाकं कुक्कुटं बलाकां वा यः मनुजः पश्यन् झटिति बुध्येत | सः मनुजः प्रियभाषिणीं स्त्रीं कन्यां वा लभते। |
| स्वप्ने सूर्यचन्द्रौ विलोकितौ स्याताम् | स रोगी चेत् रोगस्य प्रशमनं भवति। अरोगी चेत् धनलाभः बलवृद्धिश्च भवति। |
| नक्षत्रमण्डलावृतरविचन्द्र-प्रदीप्तपावक-हवि- फलं- दर्पण-रत्न-दधि-कलश-तण्डुल- क्षीरप्रभृतीन् पश्यति | तस्य महासम्पत्समृद्धिः भवति। |

इत्थं शुभफलसूचकस्वप्ना: ज्ञेया: पुन: अन्ते स्वप्नफलप्राप्तिकाल: निरूप्यते। तद्यथा- रात्रौ प्रथमयामे दृष्ट: स्वप्न: वत्सराभ्यन्तरे फलप्रदो भवति। द्वितीययामे दृष्ट: स्वप्न: अष्टमासाभ्यन्तरे फलप्रदेति ज्ञेय:। तृतीययामे दृष्ट: स्वप्न: मासत्रयाभ्यन्तरे फलं प्रददाति। चतुर्थयामे विलोकित: स्वप्न: दशदिनाभ्यन्तरे फलप्रदो भवति। एवं रीत्या चतुर्षु यामेषु क्रमश: चतु: प्रकारककालस्य परिमितिं सूचयामासु:। इत्थं अस्मिन् अध्याये स्वप्नफलमधि कृत्य विमृष्टो अस्तीति शम्।

***

## प्रश्नावली

I. संक्षेपेण उत्तरं लिखित 5x6=30

1 स्वप्नस्य सप्तभेदाः के?

2 मृत्युसूचकस्वप्नाः महारोगसूचकस्वप्नाश्च के?

3 प्रायश्चित्तेन दुःस्वप्नफलशमनोपायानां वर्णनं कुरूत।

4 उन्मादकारकस्वप्नाः के?

5 स्वप्नस्य कालभेदाः स्वप्नकालपरकक्रमम् अनुस्रत्य विलिखत?

II. विस्तरेण उत्तरं विलिखत 10x3=30

1 शुभफलसूचकस्वप्नानां वर्णनं कुरूत।

2 लग्नगतमेषादिराशिसूचकस्वप्नाः के?

3 स्वप्नफलविचारक्रमं स्पष्टयत।

III. प्रश्नद्वयस्य निबन्धात्मकम् उत्तरं प्रदेयम् 20x2=40

1 सप्रमाणम् अनिष्टकारकस्वप्नानां प्रतिपादनं कुरूत।

2 शुभफलसूचकस्वप्नाः किञ्च विशेषाद् अनूकगतिजस्वप्नानां सविस्तरेण वर्णनं कुरूत।

*******

श्री:

द्वात्रिंशोऽध्याय:

## १.० अवतरणिका

अये छात्रा:!

अस्मिन् अध्याये भवन्त: अष्टकवर्गस्य विधये ज्ञास्यन्ति। अत्र लग्नयुक्तग्रहसप्तकस्य जन्मकालस्थानेभ्य: सप्तग्रहाणां चारवशाद्यत्र यत्र राशौ शुभप्रदत्वं भवति तेषां स्थानानां वर्ग: अष्टकवर्गेति नाम्ना व्यवहृतोऽस्ति।

तद्यथा-

**''सूर्यादीनां सलग्नानामष्टनां सर्वभावजम्।**

**अशुभं वा शुभं विज्ञैर्वेद्यमेवमनुक्रमात्।।'' इति।।**

यद्यपि दशाफलं दृढकर्मार्जितफलप्रदत्वम् अवश्यं भोक्तव्यम्। परन्तु अदृढकर्मार्जितानां कर्माणामपि दु:खफलप्रदत्वात् परिहाराय शुभक्रिया कर्तव्या। तस्मात् अदृढकर्मार्जितानां कर्मणां फलद्योतकम् अष्टकवर्गमत्र निरूप्यते। तत्र विशिष्य अष्टकवर्गगोचरफलानाम् अदृढकर्मार्जितत्वं योगफलानां दृढादृढकर्मोपार्जितत्वं च व्यञ्जितं शास्त्रे।

तथा चोक्तं जातकफलचिन्तायाम्-

**''दशाप्रभेदेन विचिन्तयेद्दृढं**

**दृढेतरं चाष्टकवर्गगोचरै:।**

**दृढादृढं योगवशेन चिन्तयेदिति**

**त्रिधाजातकसूक्ष्मसंग्रह:।। इति।**

अत: अत्र अदृढकर्मार्जितफलद्योतक अष्टकवर्ग: प्रस्तुत: प्रधाान: विषय:।

**उद्देश्यानि-**

* **रव्यष्टकवर्गबिन्दुविन्यासक्रम:**
* **चन्द्राष्टकवर्गबिन्दुविन्यासविधि:**

* **कुजाष्टकवर्गबिन्दुविन्यासविधिः**
* **बुधाष्टकवर्गबिन्दुविन्यासविधिः**
* **गुर्वष्टकवर्गबिन्दुविन्यासविधिः**
* **शुक्राष्टकवर्गबिन्दुविन्यासविधिः**
* **शन्यष्टकवर्गबिन्दुविन्यासविधिः**
* **रयष्टकवर्गबिन्दुसंख्याफलानि**
* **चन्द्राष्टकवर्गबिन्दुसंख्याफलानि**
* **कुजाष्टकवर्गबिन्दुसंख्याफलानि**
* **बुधाष्टकवर्गबिन्दुसंख्याफलानि**
* **गुरूशुक्रशनीनांवर्गबिन्दुसंख्याफलानि**
* **अष्टकवर्गवशात् रवेः गोचरफलम्**
* **चन्द्रकुजबुधाष्टकवर्गफलानि**
* **गुरूशुक्रशन्यष्टकवर्गफलानि**
* **सर्वग्रहदिग्विशेषफलचिन्तनक्रमः**
* **भावेषु चिन्तनीयाः पुष्टिहानिकारकाक्षाः**
* **बन्धु-सेवक-पोषक-घातकादिनिर्णयः**
* **जीवनस्य खण्डत्रयम्**
* **भिन्नाष्टकवर्गेण दशाफलानि**
* **प्रश्नावली**

अस्य पाठस्य अध्ययनेन इमे विषयाः ज्ञायन्ते।

## १.१ रव्यष्टकवर्गबिन्दुविन्यासक्रमः

पूर्वं सन्तानप्रश्नादिनिरूपणसमये अष्टकवर्गविन्यासेनापि तत्र तत्र फलं विचारणीयम् इति कथितम्। तदष्टकवर्गबिन्दुविन्यासप्रकारः कथ्यते अत्र। तत्र आदौ सूर्याष्टकवर्गविन्यासः

प्रोच्यते- सूर्यः जातके प्रश्ने वा यत्र व्यवस्थितो वर्तते ततः अग्रे प्रवक्ष्यमाणप्रकारेण अक्षसंख्यास्थाने एकैकं बिन्दुं रेखां वा विन्यसेत्। एवमेव अन्यैः ग्रहैः सकाशादपि तत्तद् स्थानेषु बिन्दुविन्यासः रेखाविन्यासो वा कार्यः। अन्ते लग्नादपि प्रवक्ष्यमाणतत्तद्स्थानेषु बिन्दुविन्यासो कार्यः। ख्यषृकवर्गे सपृग्रहाणां किञ्च लग्नस्यापि बिन्दुविन्यासक्रमो प्रोक्तः। पूर्वोक्त विधौ तत्र तत्र क्रियमाणबिन्दोः रेखायाः कृते वा 'अक्षेति' नाम्ना प्रोच्यतेति अवधानं देयम्। कदाचित् यस्य ग्रहस्य कृते यस्मिन् स्थाने बिन्दुविहितो नास्ति तत्र शून्यं विन्यस्य चिह्नमपि कर्तु शक्यते। एवं रीत्या सर्वेषां ग्रहाणाम् अष्टकवर्गस्य कृते अग्रे कथयिष्यमाणरीत्या अक्षसंख्यान्यासं कृत्वा तेषां योगं कृत्वा तत्तद् राशौ पतितअक्षसंख्यां विलिखेत्। राशिचक्रं विलिख्य तत्र द्वादशराशिषु बिन्दूनां विन्यासः कार्यः।

सूर्याष्टकवर्गे सूर्यात् 'पुरवासदग्धनाक' नाम 1-2-4-7-8-9-10-11 एतेषु स्थानेषु बिन्दुं विन्यसेत्। चन्द्रात् 3-6-10-11, एषु स्थानेषु अक्षविन्यासः कार्यः। कुजात् 12-4-7-8-9-10-11, बुधात् 3-5-6-9-10-11-12, जीवात् 5-6-7-11, शुक्रात् 6-7-12, शनितः 1-2-4-7-8-9-10-11, लग्नात् 3-4-6-10-11-12 स्थानेषु क्रमशः ख्यष्टकबिन्दुविन्यासक्रमो विहितोऽस्ति। ख्यष्टकवर्गे आहत्य 48 बिन्दवः स्युः। तत्रापि विशिष्यबिन्दुपतितस्थाने '1' इदं चिह्नं बिन्दुरहितस्थाने '0' इदं च चिह्नं प्रदर्श्यते चेत् कस्य कृते कुत्र बिन्दुर्नास्तीति सम्यक् विज्ञातुं शक्यते।

## १.२ चन्द्राष्टकवर्गबिन्दुविन्यासविधिः

जातके प्रश्नकुण्डलयां वा ग्रहस्थित्यनुसारेण चन्द्राष्टकवर्गबिन्दुविन्यासक्रमः कोष्टके प्रदर्शितवत् ज्ञेयः-

| **ग्रहाः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| रवितः | गतिसहनीयम् | 3,6,7,8,10,11 |
| चन्द्रतः | कलितस्थानाप्त्यै | 1,3,6,7,10,11 |
| कुजतः | रोगमौषधनित्यैः | 2,3,5,6,9,10,11 |
| बुधात् | कुलवंशसञ्जनयन् | 1,3,4,5,7,8,10,11 |

| | | |
|---|---|---|
| गुरूतः | पीठानासो जनस्य | 1,2,4,7,8,10,11 |
| शुक्रात् | गोवशासिद्धिर्नाके | 3,4,5,7,9,10,11 |
| शनितः | गुणचयः | 3,5,6,11 |
| लग्नतः | गतनित्यम् | 3,6,10,11 |

इत्थं पूर्वोक्तचन्द्राष्टकवर्गे विहितस्थानेषु तत्तद्ग्रहैः सकाशाद् एकैकं बिन्दुं विन्यसेत्। सूर्यस्य आहत्य बिन्दवः 48 प्रोक्ताः सन्ति। चन्द्रस्य -49, कुजस्य -39 बिन्दवः, बुधस्य 54बिन्दवः, गुरोः 56 बिन्दवः, शुक्रस्य 52 बिन्दवः शनेः 39 बिन्दवश्च कथिताः वर्तन्ते। इत्थं सर्वेषां ग्रहाणाम् अष्टकवर्गबिन्दवः ज्ञेयाः सन्ति।

**कुजाष्टकवर्गबिन्दविन्यासक्रमः कोष्टके प्रदर्शितवत् विज्ञेयः।**

| **ग्रहाः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| सूर्यात् | बागनयनम् लिप्ताद्यम् | 3,5,6,10,11 |
| चन्द्रात् | पुत्रवत्सदीनाढ्यम् | 1,2,4,7,8,10,11 |
| कुजात् | पुत्रवत्सदीनाढ्यम् | 1,2,4,7,8,10,11 |
| बुधात् | गुणतुष्टम् | 3,5,6,11 |
| गुरूतः | तनयारिः | 6,10,11,12 |
| शुक्रात् | तेजः पात्रम् | 6-8, 10,12 |
| शनितः | कविस्सदाधनिकः | 1,4,7,8,9,10,11 |
| लग्नतः | कलितनयः | 1,3,6,10,11 |

**बुधाष्टकवर्गविन्यासक्रमः अधोल्लिखितवत् एवं सूचयितुं शक्यते-**

| **ग्रहः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| सूर्यात् | शीतलपात्रम् | 5,6,9,11,12 |
| चन्द्रात् | रम्भातज्जनकम् | 2,4,6,8,10,11 |
| कुजात् | पुत्रवास दुग्धनयम् | 1,2,4,7,8,9,10,11 |

| | | |
|---|---|---|
| बुधात् | योगशतं, धनपारम् | 1,3,5,6,9,10,11,12 |
| गुरुतः | तोदकरम् | 6,8,11,12 |
| शुक्रात् | पुत्रगर्भमदधान्यम् | 1,2,3,4,5,8,9,11 |
| शनितः | यात्रावसुदलनष्टम् | 1,2,4,7,8,9,10,11 |
| लग्नात् | पुरभक्तजनाढ्यम् | 1,2,4,6,8,10,11 |

**इत्थं कोष्टकै कथितसंख्यास्थानेषु तत्तद्ग्रहैः सकाशाद् बिन्दुविन्याक्रमः विज्ञेयः। गुर्वष्टकवर्गबिन्दुविन्यासक्रमः अधोल्लिखितकोष्टके एवं सूच्यते-**

| **ग्रहाः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| सूर्यात् | पुत्रलाभैस्सन्धिग्दतनयम् | 1,2,3,4,7,8,9,10,11 |
| चन्द्रात् | रणार्थिधैर्यम् | 2,5,7,9,11 |
| कुजात् | पुरवसंजनकम् | 1,2,4,7,8,10,11 |
| बुधात् | परवशतालनटम् | 1,2,4,5,6,9,10,11 |
| गुरूतः | पुत्रलाभस्सौजनिकम् | 1,2,3,4,7,8,10,11 |
| शुक्रात् | श्रीमतिधनिकम् | 2,5,6,9,10,11 |
| शनितः | गौणीतारम् | 3,5,6,12 |
| लग्नात् | तुच्छधानुष्टकम् | 1,2,4,5,6,7,9,10,11 |

**शुक्राष्टकवर्गबिन्दुविन्यासरीति अधोनिर्दिष्टरीत्या प्रदर्श्यते-**

| **ग्रहाः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| सूर्यतः | दैत्येन्द्रम् | 8-11-12 |
| चन्द्रात् | पात्रलवणदुग्धकरम् | 1,2,3,4,5,8,9,11,12 |

| | | |
|---|---|---|
| कुजात् | लाभस्तब्धाकारम् | 3,4,6,8,11,12 |
| बुधात् | गुणेषुधन्यम् | 3,5,6,9,11 |
| गुरूतः | महीधनिका | 5,8,9,10,11 |
| शुक्रात् | पुरलवणदुग्धनष्टम् | 1,2,3,4,5,8,9,10,11 |
| शनितः | लवमदधनिका | 3,4,5,8,9,10,11 |
| लग्नात् | परागविशदधियम् | 1,2,3,4,5,8,9,10 |

**शन्यष्टकवर्गबिन्दुन्यासक्रमः निम्नलिखतवत् विज्ञेयः -**

| **ग्रहाः** | **वर्गाक्षराणि** | **विहितस्थानानि** |
|---|---|---|
| सूर्यात् | परावस्थाजनकम् | 1,2,4,7,8,10,11 |
| चन्द्रात् | लतिका | 3,6,11 |
| कुजात् | गुणस्तनाकारम् | 3,5,6,10,11,12 |
| बुधात् | तेजोधिनाकारम् | 6,8,9,10,11,12 |
| गुरूतः | मोक्षकरम् | 5,6,11,12 |
| शुक्रात् | तस्करम् | 6,11,12 |
| शनितः | गुणस्तेयम् | 3,5,6,11 |
| लग्नात् | कुलवित्तनयम् | 1,3,4,6,10,11 |

## १.८ रविचन्द्रकुजबुधानाम् अष्टकवर्गबिन्दुसंख्याफलानि -

सूर्याष्टकवर्गे अष्टौ बिन्दवः पतितराशौ रविः गोचरवशात् परिभ्रमणकाले राज्ञः सकाशाद् ऐश्वयधानादिप्राप्तिर्भवति। सप्तबिन्दवः पतितराशौ गोचरवशात् सूर्यस्य भ्रमणेन अद्भूतकान्तिः, सौख्यं, विभवश्च फलं ज्ञेयम्। षट्सु प्रतापोन्नतिः, पञ्चसु अर्थसमागमः, चतुष्के शुभाशुभमिश्रं फलं, त्रेके मार्गायासः द्विके पापप्रवृत्तिः, एकैव बिन्दुपतितस्थाने

सूर्यस्य सञ्चारवशात् रोगभयं, बिन्दुरहितशून्यस्थाने गोचरवशात् भ्रमणकाले मृतिश्च फलं विचिन्तनीयम्। चन्द्रचारवशात् चन्द्राष्टकवर्गे बिन्दुसंख्याफलानि तत्तद्राशौ पतितअक्षसंख्याया आधारेण कोष्टके प्रदर्शितवत् क्रमशः एतानि सन्ति-

| **राशौ अक्षसंख्या** | **फलानि** |
|---|---|
| अक्षाष्टकैः | सुखानुभूतिः ऐश्वर्यवृद्धिः, कान्तिवृद्धिः बन्धुसुखञ्च |
| सप्त अक्षैः | वस्त्रलाभः, अन्नलाभः, सुगन्धद्रव्यलाभश्च। |
| षड्क्षैः | सन्मन्त्रेण सुखं, द्विजसंगमश्च |
| पञ्चाक्षराशौ भ्रमणेन | धैर्यं, मनसोल्लासश्च। |
| चन्द्रस्य चतुरक्षराशौ भ्रमणेन | दुःखम्, आरोग्यहानिश्च |
| त्र्यक्षराशौ भ्रमणेन | बन्धुजनैः द्वेषः |
| द्विके भ्रमणेन | भार्याकलहः धननिमित्तेन विवादश्च |
| एकाक्षराशौ भ्रमणेन | अकस्मात् दुःस्तरा विपत्तिः |
| शून्याक्षराशौ भ्रमणेन | दुःखं, भयं, वधञ्च |

**कुजाष्टकवर्गे बिन्दुसंख्या फलानि तस्य गोचरीभ्रमणवशात् कोष्टके प्रदर्शितज्ञेयानि-**

| **राशि** | **फलानि** |
|---|---|
| अक्षाष्टकराशौ भ्रमणवशात् | द्रव्यलाभः, भूलाभः, शत्रोः पराजयश्च |
| अक्षसप्तकराशौ भ्रमणवशात् | भ्रातृमूलात् सम्पत्प्राप्तिः |
| षडक्षराशौ भ्रमणकाले | राज्ञः प्रीतिप्राप्तिः |
| पञ्चाक्षराशौ भ्रमणकाले | प्रसन्नता गुणवृद्धिश्च |
| चतुरक्षस्थाने भ्रमणकाले | शुभाशुभमिश्रफलं विपत् सम्पदश्च |
| त्र्यक्षराशौ भ्रमणकाले | भ्रातृ स्त्री विरहः |
| द्विके भ्रमणकाले | भार्यानिमित्तेन द्रव्यानिमित्तेन च कलहः |
| रूपे | रोगपीडा, देहे शास्त्राग्नि पित्तज्वरस्फोटैः दूषितत्वम्। |
| शून्याक्षराशौ भ्रमणकाले | उदररोगः, मूर्च्छारोगः, अक्षिरोगः, मृत्युभयश्च |

**बुधाष्टकवर्गे बिन्दुसंख्या फलानि तस्य गोचरीभ्रमणवशेन अधो निर्दिष्टवत् चिन्तनीयानि।**

| अक्षसंख्या | फलानि |
|---|---|
| 8अक्षाणां राशौ | राजमान्यता |
| 7 अक्षाणां राशौ | धनलाभः, बुद्धिवृद्धिः, शिल्पशास्त्रज्ञानं, सुखप्राप्तिश्च। |
| 6 अक्षाणां राशौ | सर्वोद्योगे फलोदयः |
| 5 अक्षाणां राशौ | बन्धुलाभः |
| 4 अक्षाणां राशौ | निरुद्योगः |
| 3 अक्षाणां राशौ | चिन्ताव्याकुलता |
| 2 अक्षयोः राशौ | वातादित्रिदोषजनितरोगप्राप्तिः |
| एकाक्षराशौ | बलात् बन्धनं, कारागृहवासः विविधप्रकारकविपत्तयश्च |
| शून्याक्षराशौ | सर्वस्व हान्या मृतिः |

**१.१० गुरूशुक्रशनीनाम् अष्टकवर्गबिन्दुसंख्याफलानि**

**गुर्वष्टकवर्गे बिन्दुसंख्याफलानि गुरोः गोचरीभ्रमणवशात् अधोनिर्दिष्टवत् चिन्तनीयानि**

| अक्षसंख्या | फलानि |
|---|---|
| 8 अक्षाणां राशौ | राज्यभारः, नानार्थ सौख्यादयश्च |
| 7 अक्षाणां राशौ | विविधप्रकारेण धनागमः |
| 6 अक्षाणां राशौ | वस्त्रवाहन-सुवर्णनां लाभः |
| 5 अक्षाणां राशौ | शत्रुध्वंसक्रियासिद्धिः, |
| 4 अक्षाणां राशौ | लाभच्छेदः, |
| 3 अक्षाणां राशौ | कर्णरोगः, |
| 2 अक्षयोः राशौ | राजकोपः, |
| एकाक्षराशौ | धननाशः, बन्धुनाशः, अनर्थश्च, |
| शून्याक्षराशौ | बुद्धिनाशः, अर्थनाशः, पुत्रक्षयः, |

शुक्राष्टकवर्गे बिन्दुसंख्याफलानि भार्गवस्य तत्तद्राशौ गोचरीभ्रमणवशात् अधोनिर्दिष्टवत् चिन्तनीयानि

| **अक्षसंख्या** | **फलानि** |
|---|---|
| 8 अक्षाणां राशौ | अखिलभोगप्राप्तिः, वस्त्रलाभः, स्त्रीलाभश्च |
| 7 अक्षाणां राशौ | मौक्तिकाभूषादिवस्तूनां लाभः |
| 6 अक्षाणां राशौ | इष्टभार्यासुखम्, स्त्रीसुखम्, |
| 5 अक्षाणां राशौ | बन्धुसङ्गमः |
| 4 अक्षाणां राशौ | मध्यमं फलम् |
| 3 अक्षाणां राशौ | स्वदेशस्य जनानां ग्रामे स्थितानां च मध्ये द्वेषः |
| 2 अक्षयोः राशौ | स्थानभ्रंशः, रोगभयम्, |
| एकाक्षराशौ | कफरोगः, जलभयं, विषभयं च |
| शून्याक्षराशौ | सर्वापत्संङ्गमः |

**शन्यष्टकवर्गे बिन्दुसंख्याफलानि शनेः गोचरीभ्रमणवशात् अधोनिर्दिष्टवत् चिन्तनीयानि।**

| **अक्षसंख्या** | **फलानि** |
|---|---|
| 8 अक्षाणां राशौ | ग्रामपुराधिकार-पतित्वलाभः |
| 7 अक्षाणां राशौ | दासीजनाः खरोष्ट्राप्तयः |
| 6 अक्षाणां राशौ | चोरैः निषादैश्च पूजाप्राप्तिः |
| 5 अक्षाणां राशौ | धान्यसमूहानां लाभः |
| 4 अक्षाणां राशौ | सुखदुःखसमत्वम् |
| 3 अक्षाणां राशौ | धनं मृत्य-स्त्रीणां नाशः |
| 2 अक्षयोः राशौ | बन्धनं भयं रोगश्च |
| एकाक्षराशौ | मलिनता |
| शून्याक्षराशौ | सर्वभाग्यक्षयः |

अष्टकवर्गे बिन्दुविरहितराशौ ग्रहः सञ्चरिष्यमाणकाले अनिष्टफलानि सम्भवन्ति। न तु फलस्य शून्यता सम्भवति। अष्टौ अक्षबिन्दवः यस्मिन् राशौ पतिताः तस्मिन् राशौ ग्रहस्य सञ्चारकालो उत्तमफलदः। कदाचित् एकस्मिन् राशौ सप्तअक्षबिन्दवः पतिताः सन्ति चेदपि यस्य ग्रहस्य अक्षः तत्र न पतितोऽस्ति स ग्रहः तद्राशौ सञ्चरिष्यमाण कालः शुभफलप्रदायको न भवति। परन्तु तदक्षराशौ अन्ये ग्रहाः आगमिष्यमाणकाले शुभफलदातारो भवेयुः। एकैव बिन्दुः यस्मिन् राशौ पतितोऽस्ति तद् बिन्दुः यस्य ग्रहस्य वर्तते स ग्रहः तत्र आगमिष्यति चेत् शुभदः। इत्थं प्रायः अस्य नियमस्य समन्वयः सर्वत्र फलकल्पनावसरे कार्यः। अक्षैर्युतस्य कक्षा राशौ एकैकस्य कक्षायाः कृते त्रयो अंशाः पञ्च चत्वारिंशत् कलानां च विभागो कथितः। एकस्मिन् राशौ अष्टौ अक्षैः सकाशाद् अष्टौ कक्षाः सम्भवन्ति। कक्षाणां कृते क्रमशः शनि-गुरू-कुज-रवि-शुक्र-बुध-चन्द्र-लग्नाधिपश्चेति कक्षाधिपाः सम्भवन्ति। इत्थं पूर्वोक्तकक्षाविभागानुसारेण कक्षाधिपानां फलविचारोऽपि कार्यः।

तद्यथा- ख्यष्टकवर्गे अक्षयुतअष्टअंशराशेः कक्षायां सूर्यः सञ्चरिष्यमाणकाले अत्यन्तं शुभफलं प्रदास्यति। अवशिष्टाक्षाणां संख्यानुसारेण फलं वक्तव्यम्। स रविः यद्यद् धातूनां रत्नानां च कारको वर्तते तद् विषयं तस्य यद्यद्भाव-कारकात्वं भावाधिपत्यं च विमर्श्य फलं प्रवदेत्। एतद्तिरिच्य तस्मिन् कक्षायां यस्य ग्रहस्य अक्षो पतितोऽस्ति तद् अक्षदाताग्रहस्यापि कारकत्वादिसर्वम् अयं रविः परिगृह्य फलं ददाति। तत्तद् ग्रहस्य कारकत्वं भावस्थितिः, भावाधिपत्यं, धातुमूलजीवादि सर्वस्व च चिन्तनीयम्।

सूर्याष्टकवर्गे यस्य ग्रहस्य अक्षः यस्मिन् राशौ शून्यो भवति, तद्राशौ तद्ग्रहस्य कक्षायां तद्ग्रहस्योरपि विहितकाकरत्वादिसर्ववस्तूनि अशुभानि परिणमन्ति। यस्य ग्रहस्य बिन्दोः शून्यत्वं यस्मिन् भावे विलोक्यते तद् भावः किञ्च रवेः भावजफलं च अशुभो भवति। अक्षाष्टकानां यावत् इत्थं चिन्तयेत्। सूर्याष्टकवर्गवत् चन्द्रादितरग्रहाणां कक्षाधिपत्यं भावजकारकत्वादिसर्वं शुभाशुभफलं विचिन्तयेत्।

## १.१० अष्टकवर्गवशात् रवेः गोचरफलम्

5-6-7-8 अक्षैर्युतस्य सूर्याष्टकवर्गराशौ रवेः परिभ्रमणकाले विवाहादिकं सर्वं शुभकर्म दूरप्रयाणं, धर्मकर्मानुष्टानं, शुभकार्येषु प्रवृत्तिश्च चिन्तनीयम्। यद्यपि सूर्यः एकराशौ एकमासं यावत् तिष्ठति। अत इदं फलं मासफलम्। अक्षचतुष्टययुतस्य राशौ पूर्वोक्तं फलं मध्यमम्। अल्पाक्षराशौ पूर्वोक्तफलस्य प्रवृत्तिरेव स्यात्। शून्याक्षराशौ सूर्यस्य सञ्चारकाले आसां प्रवृत्तीनां नाशो सम्भवतीति भावः। ख्यष्टकवर्गे यस्मिन् राशौ बिन्दवः आधिक्येन पतिताः तद्राशेः कृते विहितदिशः सकाशाद् विशिष्टफलं लभ्यतेति चिन्तनीयम्। तादृशि स्थितस्य शिवस्य सेवया शिवानुग्रहप्राप्तिः भवति। तद्दिशि स्थितस्य राज्ञः सकाशाद् ऐश्वर्यावाप्तिः। तद्दिशि लोक्यमाण शिवप्रदीपअवनिपाश्च शुभकराः स्युः। तद्दिशि विद्यमानदेवार्चनेन देवानुग्रहप्राप्तिर्भवति।

ख्यष्टकवर्गे सूर्यो व्यवस्थित राशितः राशितुष्कपर्यन्तं स्थितानां बिन्दूनां योगं कुर्यात्। ततः परं स्थितस्य राशिचतुष्टयस्य किञ्च तदनन्तरं स्थितस्य राशि चतुष्कस्य च बिन्दूनां योगं कुर्यात्। इत्थं सूर्यो विद्यमानराशितः द्वादशराशिं यावत खण्डत्रयसंख्याम् अन्विश्य आद्यंशे अक्षाधिाक्यं वर्तते चेत् दिने दशघटिकां यावत् शिवदर्शनं, राजदर्शनं विवाहादिशुभकार्यस्य कृते उत्तमं फलकालेति विचिन्तयेत्। मध्यमअक्षबाहुल्यं दृष्टश्चेत् दिने मध्यांशकालः (20 घटिकां यावत्) पूर्वोक्तकार्याणां कृते कालो उत्तमेति विभावयेत्। तृतीयभागे अक्षबाहुल्यं यदि परिलक्ष्यते चेत् सायङ्काले 30 घटिकां यावत् उत्तमफलदः। परन्तु स्वल्पाक्षभागो अशुभदः।

## १.११ चन्द्रकुजबुधाष्टकवर्गफलानि -

चन्द्राष्टकवर्गे बाहुल्येन यत्र बिन्दवः पतिताः तत्र चन्द्रो विद्यमानसमये चौलकर्म स्वाभिमतं कार्यं च यदि प्रारभ्यते तदा उत्तमफलदायकः। अल्पाक्षराशिरशुभः। पूर्णाक्षराशेर्दशायाः स्त्री विवाहयोग्या स्यात्। तद्दिशि राज्ञः संदर्शनम् उत्तमम्। तत्काले भृत्यशिष्यगुरूमित्राणि च सम्प्रत्प्रदानि भवन्ति। चन्द्रेण स्त्रीग्रहत्वात् राज्ञीमपि चिन्तनीया। पूर्णाक्षराशेर्दिशि व्यवस्थितायाः

दुर्गायाः सेवनमुत्तमम्। स्त्रीजातके च पूर्णाक्षराशेर्दिशायाः पुरूषः विवाहयोग्येति विचिन्तयेत्। चन्द्रस्य पूर्णाक्षराशेः दिशि प्रातर्दर्शनमुत्तमम्। तेभ्यः वस्त्रदानादिकं च नूनं समृद्धये भवति। शून्याक्षराशौ चन्द्रो विद्यमानकाले शुभकर्माणि न कुर्यात्। कदाचित् प्रारभ्येत तर्हि सकलं कार्यं विफलं भवति। पूर्णाक्षराशेर्दिशि तटाककूपादिकं निर्माय तज्जले नित्यं स्नानादीनां करणेन शुभं स्यात्। पूर्णाक्षराशेर्दिशि स्थिता दुर्गा अनुग्रहं करोति। तद्धिशि स्थिता राज्ञी इष्टप्रदा भवति। परन्तु अल्पाक्षराशौ पूर्वोक्तं समस्तं अशुभदं भवति।

भौमाष्टकवर्गे तावत् 5,6,7,8 बिन्दवः यस्मिन् राशौ पतिताः तद्राशौ कुजस्य सञ्चारकाले भूकनकस्वीकारप्रभृतिमखिलं कर्म समृद्धिदं स्यात्। बाहुल्येन अक्षाः पतितराशेः दिशः सकाशाद् भूमेः कार्यं, सुब्रम्मण्यस्वामिनः सन्दर्शनं, सेनान्योः दर्शनं, राजदर्शनं, देवतासन्दर्शनं च सशुभदं स्यात्। कुजस्य स्वगृहे पूर्णाक्षयुतिर्वर्तते चेत् ऐश्वर्यवृद्धिः सम्भवति। अधिकाक्षराशेः विहितदिशि शत्रुजयदिकं स्यात्। अल्पाक्षराशेः शून्याक्षराशेश्च दिशि पूर्वोक्तफलम् अनिष्टदं स्यात्।

बुधाष्टकवर्गे तावत् बुधो विद्यमानराशेः द्वितीये यद्येकोऽपि अक्षो न स्यात्तर्हि मूको भवति। 1,2,3 बिन्दवो स्युः सः चपलवाग्युतो भवति। चत्वारि अक्षाः यदि स्युः अल्पवक्ता स्यात्। बुधो विद्यमानराशेः द्वितीयस्थाने 5,6 बिन्दवः स्युः तदा सत्सम्मतियुता औचित्यपूर्णा वाण्या सम्भाषयति। द्वितीये सप्ताक्षाः स्युः तर्हि काव्यादीनां रचयिता भवति। बुधात् द्वितीये स्थाने अष्टौ अक्षाः यदि स्युः तस्य भारत्याः न कोऽपि उत्तरं दातुं समर्थो भवति। बुधात् द्वितीये शून्याक्षो यदि स्यात् तर्हि स्वकार्यमपि वक्तुम् असमर्थो भवति, वधो व्यवस्थितराशितः द्वितीयराशौ पापानाम् अक्षः पतितश्चेत् डम्भदार्ष्ट्र्ययुतं वाचं वदति। शुभग्रहाणाम् अक्षबिन्दवः तत्र पतिताः स्यु तर्हि गुणढ्यं वचनं ब्रूते। द्वितीये सूर्योक्षो वर्तते चेत् ज्ञानोपदेशात्मकं वाणिं, शून्याक्षश्चेत् निन्दापरकं वाणिं कुजाक्षश्चेत् कलहपरकं वाणि बुधाक्षश्चेत् मनः सन्तोषकरं वाणिं गुर्वक्षेण युक्तियुक्तं स्फुटं वाणिं, शुक्राक्षेण पुराणकाव्यार्थवती प्रमोदवतां वाणीं, शन्यक्षेण व्याजवतीं वाणीं च चिन्तयेत्।

## १.१२ गुरूशुक्रशन्यष्टकवर्गफलानि

गुरू: स्वाष्टकवर्गे अक्षाधिक्यराशौ (5,6,7,8) सञ्चरिष्यमाणकाले मन्त्रोपदेशग्रहणं पुरश्चरणं च कार्यम्। अग्न्याधानं, यागः, वेदाभ्यासः, ब्राह्मणभोजनं, पुत्रप्राप्तेः कार्यं, द्रव्योपार्जनं द्रव्यसंग्रहश्च फलदो भवति। अल्पाक्षराशौ गुरोः सञ्चारकाले पूर्वोक्त फलस्य निष्फलत्वं वाच्यम्। गुरू: स्वगेहे अक्षाधिाक्यराशौ सञ्चारकाले तद्राशेः दिशि स्थित-ब्राह्मणान् तोषयेत्। मन्त्रजपः नमस्कारश्च विशिष्य तद्दिशि फलदः। स्वर्णसंग्रह-गुरू-द्विज मन्त्रिणां च सन्दर्शनं तत्काले शुभदो वाच्यः। बह्वक्षराशेः विहितदिशि कस्यापि कार्यार्थं निर्गमः क्रियते चेत् कार्यसिद्धिः भवति।

शुक्राष्टकवर्गे तावत् बह्वक्षभवने शुक्रस्य सञ्चारकाले शय्याद्यंशशयनोपकारी सकलं सम्पादनीयम्। संगीताभ्यासः, विवाहकरणम् उत्तमवस्त्रं कामोपभोगवस्तूनां च सम्पादनं कार्यम्।

शन्यष्टकवर्गे तावत् शनिः अक्षाधिक्यराशौ सञ्चारकाले दासादिग्रहणं कृषिश्च फलदः। बह्वक्षराशेः दिंशिः कृषिधान्यसंग्रहो शुभदः। बह्वक्षराशेः दिशि मूत्रोच्छिष्टमलादिविसर्जनाय आलयविशेषस्य निर्माणं शुभदः। तद्दिशि काष्टसंग्रहार्थं ग्रहनिर्माणोऽपि फलदः।

## १.१३ सर्वग्रहदिग्विशेषफलचिन्तनक्रमः-

अष्टकवर्गे त्रयाणां मेषसिंहधनुराशीनां मध्ये आहत्य पतितबिन्दूनां योगः पूर्वदिशायाः बिन्दुः, वृषकन्यामकरेषु आहत्य पतितबिन्दूनां योगः, दक्षिणदिशायाः बिन्दुः, मिथुनतुलाकुम्भानां पश्चिमादिशायाः बिन्दुः, कर्कवृश्चिकमीनानां मध्ये पतितबिन्दूनां योगसंख्यान् उत्तरदिशायाः बिन्दुरिति कल्पयेत्। तासु अक्षबाहुल्येन स्थिता दिशा उत्तमा। न्यूनाक्षेन स्थिता दिशा निष्फलदा भवति। तत्तद्ग्रहस्य अष्टकवर्गं प्रविलोक्य तद्ग्रहस्य कारकत्वविचारक्रमे पुष्टिहान्यादि शुभाशुभफलं तद्दिशि विजानीयात्।

भूचक्रे मेषवृषौ पूर्वदिशि, मिथुनं आग्नेय दिशि, कर्कसिंहौ दक्षिणादिशि, कन्या नैऋत्यदिशि, तुलावृश्चिकौ पश्चिमे, धनुः वायव्यां, मकरकुम्भौ उत्तरे, मीनः ईशान्ये च

संस्थिता:। सर्वेषां ग्रहाणाम् अष्टकवर्गे तत्तद्ग्रहस्य दिशा विदिशायां च अधिकाक्षसंख्य विलोक्य शुभाशुभफलचिन्तनं किञ्च तत्तद्ग्रहस्य कारकपदार्थानां वृद्धिं हानिं च विचिन्तयेत्। पूर्वोक्त प्रकारद्वयस्य दिग्विभागेन अक्षसंख्यां गणयेत्। गणनावशात् अधिकाक्षयुतो राशि: ज्ञेयो शुभफलदेति। अल्पाक्षयुतराशि अशुभफलदो भवति।

## १.१४ भावेषु चिन्तनीया: पुष्टिहानिकारकाक्षा:-

| भाव: | संख्याबोधकशब्द: | अक्षसंख्या |
|---|---|---|
| तनुभाव: | तत्वानि | 25 अक्षा: |
| द्वितीयभाव: | आकृति: | 22 बिन्दव: |
| तृतीयभाव: | आकांक्षा | 29 बिन्दव: |
| चतुर्थभाव: | छन्दांसि | 24 बिन्दव: |
| पञ्चमभाव: | तत्वानि | 25 बिन्दव: |
| षष्ठभाव: | चतुस्त्रय: | 34 बिन्दव: |
| सप्तमभाव: | एकोनविंशति: | 19 बिन्दव: |
| अष्टमभाव: | छन्दासि | 24बिन्दव: |
| नवमभाव: | नवाक्षी | 29 बिन्दव: |
| दशमभाव: | षट्त्रय: | 36 बिन्दव: |
| एकादशभाव: | वेदेषव: | 54 बिन्दव: |
| द्वादशभाव: | नृपा: | 16 बिन्दव: |

कोष्टके प्रतिपादिवत् तत्तद् भावेषु कथिताक्षबिन्दव: अथवा तदपेक्षया यद्यधिकाक्षा: तत्तद्भावे पतिता: स्यु: तर्हि भावस्य पुष्टि: समृद्धिश्च विभाव्य:। तदपेक्षया न्यूना: अक्षा: यदि तत्तद् भावेषु पतिता: भवेयु: तदानी तद् भावस्य हानि: कल्प्य:। इत्थं भावे विद्यमानक्षै: सकाशाद् तत्तद्भावस्य पुष्टिं हानिं च विचिन्तयेत्।

## १.१५ बन्धु-सेवक-पोषक-घातकादिनिर्णयः-

लग्नपञ्चमवनमभावेषु पतितानाम् अक्षानां योगः बन्ध्वाह्वयः। 2,6,10 भावेषु पतित अक्षबिन्दूनां योगसंख्या तावत् सेवकाह्वयः। 3–7–11 भावेषु पतिताक्षसंख्यानां योगस्य कृते पोषकेति नाम। चतुर्थाष्टमद्वारशभावेषु पतिताक्षसंख्यायाः योगस्य कृते घातकेति नाम। यदि घातकापेक्षया पोषकसंख्यायाः आधिक्यं स्यात् तदा धनाढ्यो भवति। पोषकापेक्षया घातकाक्षसंख्याया आधिक्यं वर्तते चेत् दारिद्रतायाः कारणेन कष्टमवाप्नोति।

सेवकसंख्याक-अक्षसंख्यानाम् अपेक्षया बन्धुकसंख्याक अक्षसंख्यायाः अधिकता यदि स्यात् तदा बन्धुबान्धवानां सहायः बन्धुसौख्यं च लभते। बन्धुकापेक्षया सेवकाक्षसंख्या यदि अधिक स्यात्तदा भृत्यवत् सेवावृत्ति करोति।

## १.१६ जीवनस्य खण्डत्रयम्-

मीनादिचत्वारि राशीनां समुदायबिन्दूनां संयोगेन आगतो भवति जीवनस्य आद्यखण्डम्। कर्काटकतः चतुर्णां राशीनाम् अक्षसंख्यायाः योगवशात् जीवनस्य मध्यखण्डं, वृश्चिकादितः चतुर्णां राशीनां समुदायबिन्दूनां संख्यायाः जीवनस्यान्तखण्डेति कल्प्यते। इत्थं पूर्वोक्तखण्डत्रये आद्यखण्डे अक्षानां बहुल्यमस्ति चेत् जीवनस्य आदिमो भागः विदद्यात् सुखम्। द्वितीयखण्डे यदि अक्षबाहुल्यं विद्यते मध्ये वयसिसुखसम्पदादिसमृद्धिं विभावयेत्। यद्यन्त्यखण्डे अक्षबाहुल्यं विद्यते चेत् जीवनस्यान्तिमे भागे सुखसम्पदादिसमृद्धिं भावयेत्। न्यूनाक्षाः यस्मिन् खण्डे विलोक्यमाणाः भवन्ति तस्मिन् खण्डे व्याधिः दुःखोद्भवश्च भाव्यः।

तत्रैव प्रकारान्तरेणापि जीवनस्य खण्डत्रयविचारः विधीयते। तद्यथा- लग्नात् केन्द्रभावेषु पतितानां बिन्दुसंख्यानां योगः जीवनस्य आदिमो खण्डेति, फणपरस्थानेषु पतितानां बिन्दूनां योगः मध्यखण्डेति, आपोक्लिमे स्थितानां बिन्दूनां योगः अन्तिमो खण्डेति कल्प्यते। अत्रऽपि अक्षानां संख्यावशात् जीवनस्य सुखदुःखविचारं पूर्वप्रतिपादितवत् चिन्तनीयम्।

## १.१७ भिन्नाष्टकवर्गेण दशाफलानि

ग्रहाणाम् अष्टकवर्गं निक्षिप्य यस्य ग्रहस्य अष्टकवर्गो अस्ति तस्य ग्रहस्य नक्षत्रदशा वत्सराणि मासीकृत्य तान् मासान् पुनर्द्वादश विभागं कृत्वा तद्ग्रहो व्यवस्थित राशितः गणयेत्। जननकालादारभ्य इत्थं गणय्य यस्मिन् राशौ पञ्च-अक्षाः अथवा तदपेक्षया अधिकाः अक्षाः सन्ति तन्मासे शुभस्य प्राप्तिः अथवा तद्ग्रहस्य कारकत्वफलसमृद्धि वदेत्। चतुर्णाम् अक्षाणां राशिः मध्यफलदायकः। तदपेक्षया न्यूनाक्षराशि अल्पफलदः। एवं रीत्या अष्टकवर्गविचारो विधेयः

***

## प्रश्नावली

I. संक्षेपेण उत्तरं लिखित 5x7=35

1 अष्टकवर्गो नाम कः? तस्य औचित्यं किम्?

2 रव्यष्टकवर्गबिन्दुविन्यासक्रमं प्रतिपादयत।

3 बुधाष्टकवर्गबिन्दुविन्यासक्रमं वर्णयत।

4 शुक्राष्टकवर्गबिन्दुविन्यासक्रमं निरूपयत।

5 शनेः गोचरीभ्रमणवशात् शून्यष्टकवर्गेण चिन्तनीयानि फलानि कानि?

II. विस्तरेण उत्तरं विलिखत - 10x4=40

1 चन्द्रकुजबुधाष्टकवर्गफलानि कानि?

2 अष्टकवर्गवशात् रवेः गोचरफलं निरूपयत?

3 गुरुशुक्रशनीनाम् अष्टकवर्गबिन्दुसंख्याफलानि कानि?

4 चन्द्रकुजबुधानाम् अष्टकवर्गबिन्दुसंख्याफलानि कानि?

III. द्वयोः प्रश्नयोः निबन्धात्मकम् उत्तरं प्रदेयम् - 12½ x 2 =25

1 गुरुशुक्रशन्यष्टकवर्गफलप्रतिपादनपूर्वकं सर्वग्रहदिग्विशेषफलचिन्तनक्रमं विशदयत?

2 बन्धुसेवक-पोषक-घातक निर्णयपुरस्सरं जीवनस्य खण्डत्रयविभागं भिन्नाष्टकवर्गेण दशाफलञ्च सम्यक् निरूपयत।

*******